स्थितिगत्यात्मकः प्रगतिवादः

पुराणमित्येव न साधु सर्वम्
न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद् भजन्ते
मूढः परप्रत्ययनेयबुद्धिः ॥

महाकविः कालिदासः
(मालविकाग्निमित्रम्)

नेपालीमूलम्
डा. निर्मलमणि अधिकारी

संस्कृतानुवादः, सम्पादनञ्च
गोविन्द घिमिरे (आकाशनीलम्)

स्थितिगत्यात्मकः प्रगतिवादः

<u>नेपालीमूलम्</u>

डा. निर्मलमणि अधिकारी

काठमाण्डुविश्वविद्यालयः(भाषा-आमसञ्चारविभागः)

<u>संस्कृतानुवादः, सम्पादनञ्च</u>

गोविन्द घिमिरे (आकाशनीलम्)

उपप्राध्यापकः, त्रि.वि.संस्कृतकेन्द्रीयविभागः, कीर्तिपुरम्

<u>प्रकाशकः</u>

सहृदयतासमाज-नेपालः

भक्तपुरम्

स्थितिगत्यात्मकः प्रगतिवादः

रचयिता	–	डा. निर्मलमणि अधिकारी
अनुवादकः, सम्पादकश्च	–	उपप्रा. गोविन्द घिमिरे (आकाशनीलम्)
प्रकाशकः	–	सहृदयता-समाज-नेपालः, भक्तपुरम्
समूहसम्पादकः	–	बलराम प्रजापति
पाण्डुलिपिसम्पादकः (नेपाली-संस्करणम्)	–	कमलेश दवाडी
लिप्यन्तरणम् (नेपाली-संस्करणम्)	–	धीरेन्द्र चन्द सोडारी, समीर गौतम, उत्तम गुरुङ, राजीव बछार, उत्तम खत्री च
संस्करणम्	–	प्रथमम् २८ आश्वयुजः, २०८०, *घटस्थापनादिनम् (जरोकिलो महाभियानस्य सङ्कल्पदिवसः)
सर्वाधिकारः ©	–	डा. निर्मलमणि अधिकारी
मुद्रितप्रतयः	–	५००
सज्जा	–	सीतालक्ष्मी प्रजापति
मूल्य	–	रु. १२५।-
ISBN	–	978-9937-1-4745-3
मुद्रकः	–	डिजिटल प्रिन्टलिङ्क, भक्तपुरम् 01 -6620555, digitalprintlink@gmail..com

STHITIGATYATMAK PRAGATIVAD
(By Dr. Nirmala Mani Adhikary)

प्राक्कथनम्

प्रगतिवादियुवासमाजनेपालेन २०७६ वैशाखस्य १४ दिनात् फाल्गुनस्य पञ्चमदिनावधौ नव प्रवचनकार्यक्रमा आयोजिता आसन् । तत्र नवसु प्रवचनश्रृङ्खलासु डा. निर्मलमणि अधिकारीवर्येण स्थितिगत्यात्मकप्रगतिवादस्य व्याख्यानं कृतमासीत् । जरोकिलोमहाभियानस्य युटुब-तन्त्रे विद्यमानानि तानि प्रवचनानि बहूनां वीक्षकाणां प्रियकराणि समभूवन् । स्थितिगत्यात्मक-प्रगतिवादस्य प्रवचनश्रृङ्खलाः लिप्यन्तरं सम्प्राप्य 'सञ्चारयोगः' इति त्रैमासिकपत्रिकायां पर्यायेण प्रकाशिताश्च जाताः ।

पत्रिकाया अस्या विभिन्नेष्वङ्केषु प्रकाशितानां प्रवचनानां एकस्मिन्नेव स्वरूपे पुस्तकरूपेण प्रकाशयितुं बहूनां जनानाम् अनुरोधं पुरस्कृत्य पुस्तकाकारेण प्रकाशमानेतुं संस्थया निर्णयो विहितः । प्रगतेः मौलिकं सिद्धान्तं ज्ञातुकामानां समेषां हिताय इदं पुस्तकं भविष्यतीति संस्थानस्य विश्वासो वर्तते । अस्माकं निवेदनं स्वीकृत्य युक्तं प्रवचनं दत्तवते गुरवे अस्माकं वर्तते हार्दी कृतज्ञता । अस्य पुस्तकस्य सज्जीकरणाय गुरोः प्रवचनं लिप्यन्तरं नीतवन्तौ संस्थायाः अध्यक्षचरौ धीरेन्द्रचन्द्रसोडारी, समीरगौतमः, उपाध्यक्षचरः उत्तमगुरुङ, सचिवचरः राजीव बछार, कार्यसमितिसदस्यः उत्तम खत्री इत्येतेभ्यो जनेभ्यो हार्दा धन्यवादा विलसन्तु । गुरुणा प्रोक्तम् । लेखनाय कालो न्यूनो भूतः । अस्माभिः लेख्यस्वरुपे समानीतम् । पुस्तकप्रकाशनाय देश-विदेशादिभ्यो धनसाहाय्यं कृतवद्भ्यः सर्वेभ्यो जनेभ्यः हार्दाः साधुवादाः सन्तु । पुस्तकस्य शुद्धाशुद्धिं विलोकितवते दीनानाथपोखरेलाय, पाण्डुलिपिसम्पादनं कृतवते कमलेशदवाडीवर्याय च धन्यवादाः ।

अन्त्ये पुस्तकस्य साकल्येन समन्वयाय जरोकिलोमहाभियानस्य समूहसम्पादनभूमिकां च साधुतया विदधते बलरामप्रजापतिवर्याय च भूरिशो धन्यवादाः ।

टेकराज कोइराला
अध्यक्षः
प्रगतिवादःयुवासमाजः नेपालः

प्रकाशकीयम्

कालक्रमेण नानाविधराजनैतिकसिद्धान्तानां प्रयोगो नेपालदेशेऽप्यभूत् । तेषां सिद्धान्तानां वैकल्पिकरूपेणानेके वादाः प्रणाल्यश्चोदिताः । तादृशवादसिद्धान्ताभासाः तावदसाफल्यभारं वहन्तो हृद्यमवसादमाच्छाद्य बहिश्च विदूषकवत् जनान् सम्मोहयितुं यतमानाः दृश्यन्ते । कालेऽस्मिन् जनजीविका जीर्णप्राया । तादृशाः पातकिनः देशं रसातलं पातयेयुः इति महती चिन्ता । न च विकल्पान्वेषणे इदानीमवसरः । तेन च निर्विकल्पपद्धतिरावश्यकीति सर्वजनानुभवसिद्धः । अस्यैव परिणामविशेषः स्थितिगत्यात्मकप्रगतिवादान्वेषणपरकोऽयं ग्रन्थः ।

अवश्यं विश्वसिमो यत्- मनीषिभिः चिन्तकैः पाठकैश्चास्य ग्रन्थस्यावलोकनेनाध्ययनेन वा अस्य महत्वमुपादेयत्वञ्च सर्वोपरि भविष्यतीति निश्चप्रचम् । स्थितिगत्यात्मकप्रगतिवादमिममादाय प्राज्ञैः स्वीयवक्तव्यानां विचाराणाञ्च प्रकटीकरणेनोपर्युक्ततथ्यानां सत्यापनं भवत्येव । बहुविधासु भाषासु अस्य ग्रन्थस्यानुवादोऽचिरमेव भविष्यतीति तु गौरवमस्माकम् ।

प्रतिक्षणं प्रतिकालं वा नवनवोन्मेषशालीन्येषा कृतिराविश्वं प्रथिता सर्वोपयोगिनी च भविष्यतीति मे विश्वासः । एतदर्थं समेषां राष्ट्रहितचिन्तकानां पथप्रदर्शकस्यास्य सिद्धान्तस्य प्रतिपादकश्चिन्तकश्च डा.निर्मलमणि अधिकारी इत्यभिधो विद्वान्नाादर्तव्यः सदा । मूलतो नेपालीभाषया प्रणीतेयं कृतिः कालानुरोधेन संस्कृतभाषयानूदिता संस्कृतविदुषा उपप्राध्यापकेन गोविन्दघिमिरे (आकाशनीलम्) प्रथितेन स्वनामधन्येनेति मोदावहो विषयः । अस्याः कृतेः वैयक्तिकमुत संस्थागतं वा प्रकाशनं बहुभिः वाञ्छितम् । अस्याः कृतेः संस्कृतसंस्करणस्य प्रकाशनदायित्वं सहृदयतासमाजनेपालाख्यसंस्थयाङ्गीकृतम् ।

प्रकाशनानन्तरमतिशैघ्र्येण जिज्ञासुजनहस्तमङ्गीकरिष्यतीत्यस्याः कृतेः सुमहत्त्वं गौरवं भवेद् ।

शास्त्रालोडनकुशलो लेखकश्चाग्रेऽप्यन्वेषणपरकान् निर्विकल्पान् एवंविधग्रन्थान् रचयेदित्याशयेन तस्मै डा. श्रीनिर्मलमणये शुभाशयाः विन्यस्ताः । संस्कृतानुवादकाय विदुषे गोविन्दाय च शुभाशयाः प्रकटिताः सन्ति । एवञ्च अग्रे जायमानानां तेषां ग्रन्थानां प्रकाशनदायित्वञ्च संस्थेयमवश्यं वहतीत्यपि विज्ञापयामि ।

॥ अस्तु ॥

तिलकप्रसादलुइटेलः

अध्यक्षः सहृदयतासमाजनेपालः ।

अनुवादकानुभवः

एकस्मिन् दिने स्वकीयवैदुष्येण समाजं नितरां प्रवाहयन् विद्यमानः काठमाण्डुविश्वविद्यानिलयस्य सहप्राध्यापकः डा.निर्मलमणिः अधिकारीमहाभागः दूरध्वनिमकरोन्मह्यम्। त्वया मदीयस्यैकस्य पुस्तकस्य संस्कृतेनानुवदनं विधेयमिति सस्नेहमवोचच्च । अलसेन नानाविधप्रपञ्चलग्नेन च मया कथं ज्ञानात्मकमिदं विपुलमनुष्ठानदायित्वं वोढव्यमिति संभ्रमो भूतो मम कतिपयकालम् । परेद्युः कथञ्चित् करिष्यामीति सङ्कल्पना भूता मम । प्रायः वैशाखमासे इदं पुस्तकं मद्धस्तगतमभूत् । दिनत्रयेणाऽन्तं परिशील्यान्वभवं यद् विचारप्रधानोऽयं ग्रन्थः । अधुनातने विश्वस्मिन्नपि विश्वे समाजवादसञ्चितिवादयोः परिणामकारिताविषये मूललेखकेन धीमता डा.निर्मलमणिमहोदयेन अन्याँश्च काँस्कान् पाश्चात्त्यवादान् विविच्य पौरस्त्यविचाराँश्चालोड्य न केवलमस्मद्देशायापि तु सकलविश्वस्मै महदुपकारकोऽयं स्थितिगत्यात्मकः प्रगतिवादोऽग्रेसारितो वर्तते नूनम् । जरोकिलो महाभियानस्य संकल्पदिवसं नवरात्रारम्भदिनं (घटस्थापनादिनम्)आलक्ष्य जरोकिलोसंस्थानकर्तृके भव्यसमारोहे पुस्तकमेतद् विदुषां करतलमारूढं भविष्यतीति संस्मृत्य संस्मृत्य मे रोमहर्षो जायमानो वर्तते नितराम् । प्रायः नेपालीभाषायामुपनिबद्धान् सप्तोत्तरशतमितपुटान् अनूदितुमुद्यतेन मया मध्ये मध्ये तेषु तेषु सन्दर्भेषु युक्तानि पदानि नैव समधिगतान्यपि । परन्तु कोषसाहाय्येन विदुषाञ्च सहायतया ग्रन्थोऽयमनुवादकर्मणि पूर्णताङ्गतो वर्तते । नूनं सनिश्चयं वच्मि यदेतस्य कार्यस्य कृते मया विशिष्य उपप्राध्यापकत्रयस्य बौद्धिकं साहाय्यं स्वीकृतमस्ति। सन्दर्भे युवविद्वान् नैयायिको मे भ्राता उपप्राध्यापको माधव घिमिरे, अथ च व्याकरणविद्वान् उपप्राध्यापकः उपेन्द्र दाहालः, अथ च लब्धस्वर्णपदवीको नैयायिकः उपप्राध्यापकः पुरुषोत्तम आचार्यश्च मया कार्तज्ञ्यभावनिवेदनपुरस्सरं स्मर्यन्ते ।

मध्ये मध्ये मह्यं युक्तं परामर्शं दत्तवते संस्कृतवाङ्मयस्य गभीरविदुषे वारिधिकल्पाय मे गुरुचरणाय केशवशरण-अर्यालवर्याय च हार्दीं कृतज्ञतामावेदयामि। अपि च विद्यावारिधिकाय शास्त्रस्य गूढरहस्यविदे मम गुरवे

डा.रघुनाथ नेपालमहोदयायापि हार्दं कार्तज्ञ्यमभिव्यनज्मि । एवञ्चोचितं परामर्शं दत्तवते आधुनिकविज्ञानस्य कुशलाऽध्येत्रे पुराणेतिहासाचार्याय चैतन्यकृष्णमहाराजाय च विलसन्तु मे सुभावाः । इदमनुवादकार्यं निपुणं निरीक्ष्य युक्तं परामर्शं दत्तवद्भ्यः क्रमशः त्रिभुवनविश्वविद्यालयस्य नेपालीकेन्द्रीयविभागस्य महते विदुषे प्रा.डा. नारायणप्रसादगौड्तौलावर्याय, पौरस्त्यवाङ्मयस्य विशिष्य साहित्यनिकायस्य महते विदुषे नेपालसंस्कृतविश्वविद्यालयस्य प्रा.डा.मुकुन्दप्रसादलामिछानेमहाभागाय, संस्कृतकेन्द्रीयविभागस्य (त्रि.वि.) विद्यावारिधिकल्पाय उपप्राध्यापकाय रोहिणीराजतिमिल्सिनावर्याय च कृतज्ञताभावं निवेदयामि । मे पत्नी दिव्या चापागाईं च धन्यवादार्हास्ति । यद्यपि बहुवारं परिशीलितमस्ति तथापि बहुत्रुटयोऽवशिष्टा भवेयुः । विद्वासः संशोध्य स्वीकुर्युरित्यासाशे अन्त इदं वदामि यत्-एतत्कार्यार्थं श्रीमतो भगवतो राघवेन्द्रस्य कृपा दिवानिशं सञ्जातेति कृत्वा श्रीजानकीनाथचरणयोः, मत्पित्रोः, मम सकलानामाचार्यपादानां श्रीचरणेषु च भावपुष्पमवनतशिरस्कोऽर्पयामि । इतोऽग्रे मूललेखकस्य तत्सम्बद्धसंस्थानस्य जरोकिलोप्रतिष्ठानस्य च मुद्रणादिदायित्वं विज्ञापयन् एभिरेव शब्दैः विरमाम्यस्माद् व्यापारादिति ।

॥ कोशलेन्द्रोऽवतान्नः ॥

अनुवादकः
आकाशनीलम्

विषयसूचिः

विषय	पृष्ठसंख्या
१) युगानुरूपं चिन्तनम्	१
२) प्रमाणप्रमेययोः स्वरूपम्	१६
३) प्रतिमानरूपेण स्थितिगत्यात्मकप्रगतिवादः	३७
४) बन्धनाद् मुक्तिः	५२
५) सम्मेयता असम्मेयता च	५९
६) ऋतस्य युगं प्रति अरेखीया यात्रा	७२
७) व्यक्तिः, समाजो राज्यञ्च	८१
८) स्थितिगत्यात्मकः समन्वयः	९०
९) स्थितिगत्यात्मिकी संरचना	९९

प्रथमं प्रवचनम्

युगानुरूपं चिन्तनम्

नूनं समीपकाले हि कृष्णरन्ध्रस्य छायाचित्रं विज्ञानिभिः गृहीतमिति महती चर्चा बभूव। एवमुक्ते सत्यपि तस्य कृष्णरन्ध्रस्य वास्तवतया भावचित्रं नास्ति। अस्य छायाचित्रग्रहणमशक्यमेव। प्रकाशाद् अधिगम्यते किल छायाचित्रम्। कृष्णरन्ध्रम् तु प्रकाशमेव तिरोहयति तस्य ग्रहणं तु न शक्यमेव। किन्तु कृष्णरन्ध्रमध्ये आबध्यमानं प्रकाशपुञ्जं स्वीकृत्य तस्य बहिर्भागस्थं वृत्तम् आवरणचक्रमिव किञ्चन वस्तुजातं दृष्टिपथमागतम्। प्रायः शताब्दीतः प्राक् यो विषयः सिद्धान्तरूपेण प्रतिपादितः। तस्य प्रमाणम् इदानीं लभमानदशायां वर्तामहे वयम्।

कतिपयकालात् पूर्वम् ईश्वरकण (हिग्स बोसोन पार्टिकल) सम्बन्धे शोधकानां महदनुसन्धानं सञ्जातम्। एतेन सहैव अस्माकं भूतजगतोऽभूतजगतश्च सन्दर्भे नूतन आयामः प्रवृद्धो विलोक्यते। अपि च अयं तावत् संस्कृतभाषायाः विस्तारः एतेषु दिनेषु भूयशा प्रमाणेन सञ्जायमानोऽस्ति। केवलं विश्वविद्यालयादिष्वेव पठ्यमानं संस्कृतमद्यत्वे प्राथमिकादिविद्यालयेषु हि नहि विविधशोधसंस्थानेषु अन्ताराष्ट्रियनिकायेषु च विषयोऽयं सम्पठ्यमानो वर्तते। पश्चिमदेशेषु इव अस्माकं प्रतिवेशिनि चीनदेशे यत्र सभ्यता प्राचीनास्ति तत्रापि इतरैः साकं तद्देशराष्ट्रपतिरपि महता औत्सुक्येन संस्कृतविषये रुचिं वहमानः सम्बद्धकार्येभ्यः निर्देशं प्रायच्छदिति परिघटनाद्वारा इदं सिद्ध्यति यत्- किमपि नूत्नं जायमानं विद्यते। अस्मादेव प्रसङ्गात् अद्यतनविचारं प्रस्तोतुं कामये। छान्दोग्योपनिषदि - ऋष्योर्द्वयोः संवादः (आरुणि-श्वेतकेत्वोः) प्रवर्तते तेन परीक्षणम् (Expriment) पर्यवेक्षणम् (Observation) विधिः

एवं कार्यकारणसम्बन्ध इति रीत्या आधुनिकविज्ञाने आमान्यते तद्विषये वैदिकाः ऋषयः ज्ञातचराः आसन् । अथ च प्राचीनग्रीसस्य मिलटेसनगरे वास्तव्यो थेल्सः (Thales of milwtus) च परीक्षणपर्यवेक्षणविधेः उपयोक्तासीदिति स्वीक्रियते नूनम् । उद्दालकथेल्सयोः अन्वेषणविधौ सामान्यतया तादात्म्यं स्फुटीभवत्येव 'एक्सपेरिमेन्टल अब्जर्वेसन' इति आधुनिकविज्ञानस्य उपकरणत्वेन विद्यते । यद्यपि उद्दालकस्य थेल्सस्य च निष्कर्षः । आधुनिकविज्ञानस्य च निष्कर्षः तयोः तुलनात्मकं परिशीलनं चाद्यतनो नैव विषयः । जीवनजगतोः अन्वेषणार्थं युक्तियुक्ता प्रणाली (Systemetic Methodology) इत्यस्याः विकासप्रयत्नः पौरस्त्यपाश्चात्त्योभययोः वाङ्मययोः प्राच्यकालाद्धि भवति स्म इति प्रमाणीकरोति थेल्सोद्दालकयोः मिथः प्रसङ्गः । एकत्र चिन्त्यते चेत् पूर्वपश्चिमयोर्भेदः व्यवहारदृशा हि सङ्गच्छते । गूढतया चिन्त्यते चेत्तु ज्ञानसन्दर्भे सृष्टौ तथाविधं भेदं युक्तं न मन्यामहे ।

प्रमाणाय - "वसुधैव कुटुम्बकम्" "आत्मवत् सर्वभूतेषु" इत्यादयो भावा नैव विभाजनमूलाः । एवं सत्यपि चिन्तनान्वेषणादिप्रक्रमेषु पद्धतिपूर्णां प्रणालीं निर्मातुं च क्षेत्रद्वयेऽपि संयुक्तः प्रयासो विलोक्यते ।

अस्तित्वचिन्तनं हि दर्शनशास्त्रस्य मूलः प्रश्नो दृश्यते । एतं मतमवलम्बमानानां विवेचकानां तर्कोऽयं सुविस्तृतो दृश्यते यत् - भौतिकाभौतिकतत्त्वोत्पत्तिः, तद्गतं कारणम्, अन्तःसम्बन्धः, पदार्थचेतसोः मिथः सम्बन्धश्च तद्द्वारा समाजजीवने जायमानः प्रभाव इत्येतेषु विषयेषु ये प्रश्नाः बलादुपतिष्ठन्ते तेषां समाधानं विना जीवनजगतोः युक्तं ज्ञानं नैवाप्यते । जगदिदं बोधगम्यं न वा ? अस्य पुरोदृश्यमानजगतो याथार्थ्यं किम् ? सत्यं यदुच्यते तस्य वस्तुनिष्ठः कश्चनाधारो भवति न वा ? तज्ज्ञातुं शक्यमुताहो अशक्यमेव । यदि जीवजगतोः रहस्यं साकल्येन एतेनैव मस्तिस्केन बोद्धुं पार्यते वा ? महत्या कया चित् गवेषणया एव रहस्यमिदं स्फुटं परिलक्ष्यते इति चिन्तनमपि पुनः पुनः आ बहोः कालात् पश्चिमदार्शनिकैः च विधीयमानं विलोक्यते ।

यद्यपि पौरस्त्यनिकाये मन्त्रद्रष्टृमहर्षीणां समयादेव पाश्चात्त्यजगति च तेषां द्वारा प्रबोधयुगं ज्ञानोद्दीपनयुगं किं वा तैः कथ्यमानात् (ENLIGHTMENT) ज्योतिर्मयात् कालात् जगदिदं नितरां बोधगम्यमिति मान्यता विद्यते । नो चेत् "ऋषयो मन्त्र द्रष्टारः" इत्युक्त्वा आध्यात्मिकम्, आधिदैविकम्, आधिभौतिकमिति सर्वविधमपि

सत्यं साक्षात्कृतवन्तः ऋषयः इत्यामान्यते । इयं मान्यता न स्वीकृता भवति स्म । मुनयः तपोबलादेव साधनायाः परां काष्ठां प्रापुः । कान्ट इत्यादयो दार्शनिकाः डेयर टु नो (DEONTOLOGY) इति अवोचन् । न्युटनस्य क्याल्कुस इत्यत्र शून्यादनन्तपर्यन्तमायोजितुं शक्यमभूदिति सिद्धान्ततः प्रमाणीभूतमस्ति । आधुनिकविज्ञानस्य समग्रोऽपि सम्प्रति यावज्जातो विकासो मूलतया प्रविधिक्षेत्रे दृग्गोचरीभवति । ज्ञानोद्दीपनयुगस्यानन्तरं मान्यतेयं विकासमागता सर्वं मानवबुद्धिकृतमिति । सारतो वक्तुं शक्यते यत् जगदिदं बोधगम्यमिव । किन्तु पौरस्त्यजगति पुराणसाहित्ये आख्यानमूलं सङ्कथनं पाश्चात्त्यनिकाये च उत्तरसंरचनावादः, विनिर्माणवादः, उत्तराधुनिकतावादः इत्यादयो वादाः यदि सविषयं विचार्यन्ते तर्हि इमे विचाराः सत्यतथ्ये आधारीकृत्य न तदपेक्षया विषयवस्तुदृशा हि पाश्चात्त्यवादाः विकासमागता इति मन्तुं शक्यते । यद्वा भवतु नाम जगतः मानवजीवनस्य वार्तायां जातायां सत्यां विविधाः सर्जनमूलाः प्रश्नाः, चिन्तनम्, विमर्शः, ऊहापोहौ इत्यादि क्रियाणां कर्तारः नानासामर्थ्ययुताः पठितारः, चिन्तकाः, सिद्धान्तकारकाः इत्येतेषां समेषां संयुक्तं वैशिष्ट्यं ज्ञानप्रकटनोपक्रमे निःसन्देहं वर्तत एव ।

अत्रास्मिन् घट्टे विविधेषु कालखण्डेषु विभिन्नेषु चरणेषु विविधाः मान्यताः स्थापिताः बभूवुः । तेषां प्रतिष्ठापनार्थं विधीयमाना कार्यसरणी नूनं प्रतिविषयं भिद्यत एव । वयं सूक्ष्मेक्षिकया समीक्षामहे तर्हि उपनिषदामभिव्यक्तिः संवादमूला हि । आधारशीलास्ताषां शास्त्रार्थरूपा हि ।

विक्रमसंवत्सरे २०७६ वैशाखमासस्य षष्ठे दिनाङ्के तदनुरूपं अप्रिलमासस्य १९ विंशे दिने २०१९ इति काले क्यानडादेशस्य "सोनी सेन्टर" जोर्डन पितरसन इत्यस्य स्लाभोज जिजेकस्य च सुखिसञ्चितिवादं विरुध्य इति शीर्षिकामये विमर्शे आविश्वं प्रसृतानां विदुषां जिज्ञासूनाञ्च ध्यानमाकृष्टमासीत् । सः कार्यक्रमः योजनानुबद्धः सव्यवस्थितश्चासीत् । नराः बहुमूल्यं प्रदाय विमर्शं श्रोतुं द्रष्टुं च समवेता आसन् । परं तेषां व्याख्यानेन बहुभिः नैराश्यमेव समधिगतमिति कार्यक्रमं साक्षात्कृतवन्तो हि बहवः अवोचन् । विश्लेषकाः पर्यवेक्षकाश्च विमर्षकार्यक्रमेण भ्रान्तिर्व्याप्ता इत्यवोचन् । आरम्भे आसीदुत्साहः । परं प्रतिभागितास्वीकारानन्तरं सहभागिनां समुत्साहानुरूपं परिणामं नाजनयत् ससमवाय इति । एकविधा भ्रान्तिमूलो विचारो हि व्यक्तीभूतः इति निर्णीय महती निराशता एव ततः प्रवृद्धा ।

कथं बभूव सृष्टिः ? पुरोदृश्यमानस्य जगतः स्वरूपं किम् ? अस्योत्पत्तिः किमर्थम् ? चेतनायाः पदार्थस्य च मिश्रः सम्बन्धः कः ? जीवनस्य अस्ति कश्चनप्रयोजनमूलो हेतुः उताहो न किञ्चित्प्रयोजनमस्य । अस्ति चेत् जीवनस्य परमं लक्ष्यं किम् ? मृत्योरनन्तरं किं भविष्यति ? आत्मा नाम किम् ? ज्ञानं किम् ? ईश्वरसत्ता का ? एवंभूताः प्रश्नाः मनुष्यसृष्टेरारम्भादेव बलात् उदिता वर्तन्ते । इतः परं प्रश्नेष्वेतेषु वयं समीक्षामहे यदि तर्हि पुनश्च जिज्ञासाभावो हि विलसति समीक्षकाणाम् । पुनरपि ज्ञानं किम् ? आत्मा कः ? ज्ञानसाधनानि कानि ? सत्यज्ञानस्य स्वरूपं तस्य सीमा च का ? ईश्वरसत्त्वं किम् ? "परब्रह्म" इत्युच्येत, "ईश्वर" इत्युच्येत, "गड" इत्युच्येत । "अल्लाह" इति वा व्यवह्रियेत.. यद्वा कथ्येत नाम । नामानि यान्यपि भवन्तु नाम परन्तु तस्य स्वरूपवैशिष्ट्यं किम् ? सुखं किम् ? तच्च प्राप्यते कथम् ? प्रगतिः का ? समाजस्य प्रगतिर्भवति केनोपायेन ? वर्तमानसमस्यानां परिहारः कथम् ? मानवजगत् भविष्यत्काले कीदृशं जायेत ? किं नाम नैतिकत्वम् ? नैतिकमान्यतानां मानवसमाजे एव आवश्यकतास्ति उत सम्पूर्णं प्राणीसमवायं प्रति ? एवंविधाः नानाः जिज्ञासाः प्रबुद्धस्य मानवसमुदायस्यैव अभेद्या अवयवाः ?

भाषा पृथक् भवेत् । अन्वेषणपद्धतिः भिन्ना स्यात् । परमस्माभिः समीक्ष्यते चेत्तु अत्यन्तं प्राचीनकालादेव पूर्वोक्तप्रश्नानामुत्तराणि मनुष्यैः अन्विष्यमाणान्येव सन्ति । ये पशुवत् खगवच्च भोजने, पाने, शयने, मैथुने च रममाणाः विलोक्यन्ते नितराम् । पशूनां खगानाञ्च कथा अन्या । क्रमोऽयं कियत्कालं अवस्थास्यत इति निश्चेत्तुं सहजमपि नास्ति तावत् । एवञ्च दूरदर्शनस्य शृङ्खला इव कतिपयकालं चलित्वा विरामं प्रत्यपि न गच्छति ।

वर्तमाने जगति बहुविधसमस्याः सम्मुखीकृतवन्तः ताषां परिहारं चाल्पशः विहितवन्तो दृश्यन्ते परन्तु दृढतया समूलं समाधानं दातुं प्रभवन्ति वा ? असौ बहु प्रखरः प्रश्नो भवति ।

प्रातः काले भ्रमणावसरे उताहो क्वचिदुपविश्य चायपानादिसन्दर्भे वा भवतु समस्याविषये तु चर्चा जनानां जायमाना हि बोभवीति परन्तु गृहव्यवहारादारभ्य विश्वब्रह्माण्डस्यैव । एतावद् गभीरान् विषयानुपादाय विमर्शः प्रचलन् भवति । विशिष्य समस्यापरिहारपक्षमादाय । परन्तु एतावच्चर्चाषु सञ्जातासु सतीष्वपि समाधानस्य किं

मुखम्। इति विषयो नितरां जटिलो जाजायते। पिटरसन जिजेकयोः संवादं श्रुतवतां कृते तथ्यमेव विचारितां भवतीव ऊह्यते - वित्तसञ्चितिवादः मार्क्सवादश्चेति द्वाभ्यामपि सुखं किं सुखी च कः इति निश्चेतुं न शक्यते। तयोर्द्वयोरेव विचारोऽस्मिन् पक्षे समानो विलोक्यते। तथापि अधुनातने काले सञ्चितिवादः नियमयितुं यथा कथञ्चित् सञ्चितिवादपद्धतावेव सन्तोष्टव्यमिति बाध्यदशायां बद्धं दृश्यते। सकलमेव जगद् इत्येव विचारणा पूर्वोक्तविदुषोः विमर्शजन्यो भाव इव सारतो ग्रहीतुं शक्यते पौनः पुन्येन। सन्तोषः तस्मान्नास्ति सञ्चितिवादस्य विकल्पः प्राप्यते चेद् वरमिति परन्तु इदानीमितो बहिर्भवितुमपि तावन्न सम्भवति। वरम् नियमयामः काँस्कानुपायानवलम्बामहे। एतमेवात्मसात्करणं विना उपायान्तरमपि तु न दृश्यते। विकल्पराहित्यं सम्प्रति। नेपालीसाहित्यस्य कविशिरोमणेः लेखनाथ पौडेलस्य "पिञ्जराको सुँगा"(पिञ्जरस्य शुकः) इति कवितायां प्रतिपादितरीत्या बहिरागन्तुमिच्छन्नपि यथा पिञ्जरबद्धः शुकः बहिरागन्तुं न शक्नोति तथैव प्रबद्धं विलोक्यते अधुनातनं जगत्। किं सञ्चितिवादस्य पिञ्जरे बद्धाः वयम् ? ततो बहिरागन्तुं सत्यमेव न शक्यते ? मानवसमुदायस्य इयमवस्था युक्ता वा ?

अधिकानां जनानां हितकारी सञ्चितिवादो नास्तीति धिया जोसेफ स्टिग्लिजेन प्रगतिशीलः सञ्चितिवादः (Progressive Capitalism) अग्रेसारितो विद्यते। अयं विषय इह उल्लेखनीयोऽस्ति। समकालीने विश्वस्मिन्नपि विश्वे सम्पदां वैषम्यं (Wealth In Equality) इत्यस्य चर्चा थोमसः पिकेटीवर्यः सञ्चितिवादस्य नकारात्मकं पक्षं तु समुद्भूतवान्, किन्तु राज्यस्य हस्तक्षेपः (State Entervention) इति माध्यमेन समस्यानिकरणाय मान्यतेयं पुरस्कृता वर्तते। परन्तु समस्यापकरणाय इतो दूरं न शक्यते। उपायोऽपि नास्ति। इत्येव परितोऽभिलक्ष्य अस्मादेव वादात् किञ्चित् संशोध्य अंशतो इतस्ततो विधाय नूतनः कश्चन प्रवादो भवितुमर्हेद्वा इति दृशा विचाराः, विमर्शाः व्याख्यानानि च भवन्ति। भूताश्च। एवमेव क्रमे "सोसाना जुहफ"इत्यनया सर्वेलियन्स क्यापिटलिजमिति रूपेण सञ्चितिवादस्य नवीनं रूपमग्रे कृतं वर्तते। सिद्धान्ततो नूतनोऽयं वादः। अधुनातनसञ्चितिवादेन कियन्मात्रेण एडमस्मिथ तथा म्यक्स-बेवरस्य उत्तराधिकारित्वम् ऊढमस्ति किं वा वर्तमानाऽऽविष्करणानां हेतुताऽवलम्बिता विद्यत इत्यत्र भूयसा प्रमाणेन विमर्शः कर्तुं शक्यते। किन्तु सारतः सर्वजनहितं तु दूरे स्यात् आदर्शावस्थां स्वीकृतवतोऽस्य

सञ्चितिवादस्य कारणादधिकानामधिको लाभोऽपि तद्वारा जातो नास्ति । किं पुनस्तेषां समेषां लाभस्य कथा तु । इदं स्पष्टीभूतमेव । सः चमत्कारविषयो भवति स्म कृते सति । किन्तु अस्माभिरधुना वीक्षते चेदपि इतरेषां विचारानपहाय एव तेनैव स्वीकृतादर्शरूपस्य सञ्चितिवादस्य अधिकानामधिको लाभः इत्यपि मान्यता साफल्यमधिगताऽस्ति । एतत्तु बहूनां देशानां बहुविधसन्दर्भप्रसङ्गानुरूपं नानाविधशोधानाञ्च तथ्यरूपेण स्पष्टतां गतमेव संख्यादृशा बहवो जनाः एतस्य वादस्य हेतुतया सम्प्रति समृद्धिरागता जगति इति मन्यन्ते ते वृथा चिन्तयन्ति । केवलं चाकचिक्यजालमेव । एतस्मादेव युगमिदं पश्चगामित्वं वहति नितरां किं दूरे गम्यते । अस्माकं नेपाले हि एकतः जगतीतलेऽस्मिन् यत् सौविध्यं श्रेष्ठं सुखञ्चावाप्यते तत्सर्वमपि वैभवं भुञ्जानाः धनाढ्याः व्यक्तयोऽपि विद्यन्ते भूरिशः । अपरत्र तावत् सामान्यां मानुजीमावश्यकतां पूरयितुमपि अक्षमाश्च विलोक्यन्ते भूयशा प्रमाणेनैव । इयमेतादृशी दशा आविश्वं व्याप्तास्ति ।

सञ्चितिवादस्य अल्पपरिमाणमकारितां चर्चयन्तो वयमेतदपि नैव विस्मरामो यत् - समाजवादः लाभद इति । एवं विचिन्त्य आत्मानं समाजवादिनं मान्यमानानां मुखं प्रसन्नतां यातञ्च । माभूद् एतावता । यतोहि इमौ द्वौ वादौ (सञ्चिति-समाजवादौ) एकस्यैव हि द्रुमस्य शाखाद्वयरूपेण वर्तेते । सञ्चितिवादः असाफल्यं गतः । इतः समाजवादः भृशं प्रभावं जनयेदित्यपि नैव मन्तव्यम् । नैव तदौचित्ययुक्तम् । अधुना चर्च्यमाणस्य समाजवादस्य विशिष्य दक्षिण-अमेरिकायां प्रभावो जायत इति सङ्कथनभाष्यं रचयितुं प्रवृत्तानां हाइटेजप्रभृतीनाञ्जनानां तर्काः अपि भेनुजुएला सङ्कटघटनया क्षीणीप्रायाः कृताः सन्ति । संस्कृते सदुक्तिः वर्तते यत् - "प्रत्यक्षे किं प्रमाणम् ।" इति । प्रात्यक्षानुभवात् बलिष्ठं प्रमाणं किं भवितुं शक्नुयात् । प्रत्यक्षपरिशीलतादनन्तरं तर्कवितर्कादीनां किं स्थानं स्यात् । यत् सङ्कटं भेनेजुएलाप्रभृतिषु देशेषु गोचरीभूतं तादृशसमाजवादेनापि न किञ्चिज्जगतो हितं सेत्स्यति इति प्रत्यक्षमेवास्ति विदितम् ।

बहुकालं जातो नास्ति ड्यारन् एकमग्लु, एरविन्सनश्च किमर्थं राष्ट्राणि न सफलीभवन्ति इति विषये स्वीयं विश्लेषणं प्राकाश्यमानीतवन्तौ स्तः । तौ साम्प्रतमेव समये इदं सार्वजनीनत्वं कृतवन्तौ । वर्तमानवेलायां सङ्कटानां बहुमुखित्वं भवतीति तयोः निष्कर्षो वर्तते । विश्वस्मिन् काचिदपि सभ्यता कांस्कान् कालान् प्रभावं

जनयित्वा पुनः किमर्थं पतनतां प्राप्नुवन्ति । इत्यत्रापि गवेषणं जातं विद्यते । तत्र विविधानि कारणानि प्रदर्श्यन्ते - यथा कदाचित् जलपवनपरिवर्तनं कदाचिददतितरां जानसांख्यवृद्धिञ्च कारणत्वेन प्रदर्शितम् । आधुनिके युगे तु प्राक्तनकारणप्रभावापेक्षया नवनवतया हेतवोऽविलक्ष्यन्ते सन्दर्भेऽस्मिन् । समस्या दिनदिनशः जाटिल्यं प्राप्नुवती विलोक्यते । तैः एवंविधवादनिर्मातृभिः पृष्टानामपृष्टानां विषया अपि शतशः इतस्ततोऽव्यवस्था प्राप्ताः सन्ति । गूढतया अन्तो वीक्ष्यते चेत् विषयोऽयं सञ्चितिवाद-समाजवादयोः द्वितले फलके हि उहापोहयोरेव सीमाबद्धं न जायते । समाजवादे सति किं स्यात् ? सञ्चितिवादे वा किं प्रकुर्यात् ? अस्याभावे तदायाति सहजा समस्या नास्ति । समाजः, संस्कृतिः, सभ्यता, स्वास्तित्वं, राजनीतिः, प्रविधिः इत्येवंविधानि बहूनि तत्त्वानि अवसरसङ्कटादिसम्भावनाभिः सह बहुषु आयामेषु प्रबद्धानि सन्ति नितराम् । समाजपक्षाः संस्कृतेश्च भागाः सभ्यतापक्षाः स्वत्वबोधस्य च लहर्यः आविश्वं सुव्याप्ताः सन्ति । वयं स्वत्वबोधविषयान् कुर्महे परं स्वत्वराजनीतिरूपेण सम्प्रति संसारे घृणावादिन्याः अभिव्यक्तेः हिंसाक्रमणानाञ्च कलापा नूनं विवर्धमाना विद्यन्ते । इह पुनः राजनीतेः पार्श्वपरिवर्तनं तावत् परम्परागतपाश्चात्त्यराजनीतेः वादानां भाष्यैरेव समीकर्तुं शक्यं नावगम्यते । तत्तद्देशेष्वेव पश्चिमानां एकस्मादन्यत् क्रमसातत्येन यज्जायमानं परिदृश्यं विद्यते तस्य सम्बोधनं तेषामेव वादग्रन्थेषु प्रतिपादिताः सिद्धान्ताः एव व्यक्तीकर्तुं नैव पारयन्ति । प्रविधेरपि विचिन्तनं कदाचिदहितं यथासीत् तादृशमेव नास्ति । इदानीं तु मानवसमुदाय साकल्येन प्रविधिं नियन्त्रयितुं नैव क्षमो भवति । प्रविधिः दूतः तस्मात् कालात् स्वसामर्थ्यं प्रवर्धयन् मानवजगतो हि समस्याविषयीभविष्यति वा प्रविधिस्वरूपमिति वा ? कित्थं प्रवर्तेत इति परिचर्चा नितरामावश्यकी भवतीव वर्तते । सामग्र्येणाधुना प्रविधिजगदपि । इत्थमग्रे पदानि निदधाति प्रविधिः । स्यामुअल पी हन्टिङ्टनस्य प्रभावकारिणा विश्लेषणेन वैश्विके स्तरे अग्रे सारित सभ्यता वर्गः (Class Of Civilization) इति सभ्यतानां सङ्घर्षस्य विषयः समाहितो नास्ति ! किन्तु न्यूजिल्याण्ड-देशे जातायाः घटनायाः प्रतिरोधितया श्रीलङ्कायाम् आत्मघातमाक्रमणं यज्जातं तेनैव सविषयः ततोऽपि सशक्तः सन्नुपतिष्ठते बलात् । इतिहासे इव ह्यो दिने अमेरिकया अस्मदुपरि महदन्याय्यं कृतमस्ति अतोऽस्माभिरपि अमेरिकायाः बम्ब–आक्रमणेन क्षतविक्षतता रचिता इति अलकायदाद्वारा कृतमिव स्थितिरधुना नास्ति । यासु घटनासु येषां जनानां

कीदृश्यपि प्रतिभागिता नास्ति परं तेषां वसतिस्थलादिष्वपि तादृशाक्रमणानि जायेरन्। नेपाले तु एवंविधरणनीतेः निर्माणन्तु कल्पनायाः बहिरेव दृश्यते। येऽधुना सत्तासीनाः सन्ति शासनार्थं सुरक्षासंयन्त्रादिषु वर्तन्ते ते तादृशदुर्घटना इह न भवेयुरित्यत्र भूरिशोऽवधानवन्तः जायन्ताम्। पूर्वोक्ताऽप्रिया घटना इहापि कुत्रचिदपि कस्यामपि दशायां भवितुमर्हन्ति क्वासुचिदपि संरचनासु।

रबर्ट डी.कप्लानवर्येण स्वलेखन्याऽभिव्यक्ता अराजकता याः भयं ततोऽपि महत् प्रखरं जातमस्ति। आर्नोल्ड तोयनवी-दाइसाकु इकेदा - प्रभृतीनामन्तःशालीनसंवादापेक्ष्ययापि साम्प्रतं तु जोर्डन पिटरसन - स्लाभोज जिजेकसदृशानां बाह्यविमर्शा हि बाहुल्येन प्रचारतां प्राप्नुवन्ति। तथाविधा स्थितिरस्ति। आइन्स्टाइन-महात्मगान्धीप्रभृतीनां मौनसंवादेनैव भावानां साधारणीकरणं विधातुं सक्षमः संवादो वर्तमाने काले कैः कैः सह साधनीयस्तावत् ?

कदाचित् सम्प्रदायैः सह कदा पुनः जातिप्रजातिनश्लेत्यादिभिः कदाचन भाषाभिः समं वा एवं कादाचित्कतया भौगोलिकाभिः साकं कदाचिद् इतिहासबन्दिनां जडसूत्रवादिनाम् आक्रोशं वोढ्वा एवंविधानेकविधघट्टानां स्वरूपरङ्गादिषु परिवृत्य वर्तमाना विश्वराजनीतिः स्वजातिमतादिप्रतिष्ठापनमूला प्रवर्तते। अयं हि अधुनातनविपुलो विषयोऽस्ति। इतिहासस्यान्त्यं मत्वा सञ्चितिवादिन उदारवादप्रभुत्वस्य गीतं गायतः फुकुयामा इत्यस्य तर्कास्तु तस्य पुस्तकप्रकाशनस्य समकालमेव बौद्धिकैर्बहुभिः स वादः स्वीकृत आसीत्। किन्तु प्रतिष्ठा राजनीतिः एवं तथाकथितराष्ट्रवादस्य प्रहारेण उदारवादिलोकतन्त्रसंज्ञकप्रणाल्या एव आधारभित्तेः कम्पनं जायमानमस्तीति अधुनातनसमये विद्यत एव। गतार्थो भूतस्य यूरोपदेशीयप्रतिमानानुसारिणो राष्ट्रवादस्य पुनरुदयो जायत वा ? एवंविधराष्ट्रवादस्य लहर्यापि च कीदृशं सङ्कटमानीयेतेति विषये बहूनां प्राज्ञानां ध्यानमाकृष्टमस्ति।

एन्थोनीडेभिडस्टेफेनस्मिथेन (सिमिकनेशन) सिभिकनेसनालिटि इथ्निकनेशन एवं इथ्निकनेशनालिटी इत्यस्य परिभाषा पुरस्कृता इति तु अभिन्नो विषयः। अधुना ब्रेकाजिट इत्यस्य तापे वर्तमाने सति हि एतस्मिन् समये रोजरक्रष्टनप्रभृति इङ्ग्ल्याण्डदेशं संयुक्ताधिराज्यात् पृथक्कुर्मः इति तर्कोऽपि वादान् जनयेद्वा इति मन्यमानाः अपि महता प्रमाणेन सन्ति। कथितराष्ट्रवादस्य समस्याग्रस्ता मान्यता एव वामपथिक्वानां द्वितीयान्ताराष्ट्रिया परिषद् विनशनं गता।

समाजवादस्य स्वप्नः फ्रान्सदेशीयक्रान्त्या सह आबद्धो विद्यते। अपि च रवट्ट ओवेन इति जनेन बेलायतदेशे स्वीय कारखाना इत्यादिषु कृतप्रयोगेण समं च समाजवादः क्षीणप्रायो जातः। अथापि समाजवादतुल्यायामेकस्यामेव संज्ञायामत्र अन्तर्भूताः नैकविधपरिभाषाः (कदाचिन् मिथो विरोधिनः विपरीतभावश्च) वर्तन्ते। इत्थं विवादास्पदविषयः संसारे नान्यो भवेत्। परन्तु कालमार्क्सस्य वामपथसिद्धान्तः मेनोफेस्टोद्वारा अग्रेसारित कम्युनिजम (वामपक्षसिद्धान्तः) ततोऽपि पूर्वतनविश्रान्तिरूपेण विद्यमानः समाजवाद एव चर्चाशिखरेऽधिरूढः। काल मार्क्सद्वारैव कृतनेतृत्व प्रथमान्ताराष्ट्रियराष्ट्रवादविषयः अपि च फेडरिक एङ्गल्सद्वारा कृतनेतृत्वान्ताराष्ट्रियराष्ट्रवादः लेनिनेन विहितनेतृत्वान्ताराष्ट्रियराष्ट्रवादः इत्येतेषां वादानां विषयः प्रखरतया अभूत्। अद्यापि वामपन्थमन्यमानाः अन्ताराष्ट्रियतायाः विषयगीतं गायन्त किन्तु राष्ट्रवादनाम्ना भाषणं विधाय बहुराष्ट्रियतायाः अग्निसम्पर्कविधानाय दुर्यशसो विद्यन्ते। मार्क्सवादः, लेनिनवादः, माओवादः इत्येवंविधविचारधाराणां शब्दाम्रडनं कुर्वन् जनो वा जनसमूहः कस्यां वेलायां कथं जातिवादमान्यतायां ग्रस्तो जायेत इति ऊहितं महती सम्भावना बोभवीति। उत्तरसंरचनावादः, विनिर्माणवादः, उत्तराधुनिकतावादः, वान्येऽपि, येऽपि, केऽपि वादाः स्युस्ते सर्वेऽपि सञ्चितिंवादस्यैवानुकारिणः इति स्पष्टतया गोचरीभवति। नवमार्क्सवादः समाजवादस्य धारायां स्थितोऽस्तीति विमर्शे आत्मानं प्रतिष्ठाप्य घोषणापुरःसरं शब्दाम्रेडने स्वीय मौलिकतां दर्शयितुं चापल्यं विहाय सामाजिक-सांस्कृतिक-आर्थिक-संरचनासु सञ्चितिवादस्यैव सेवां विदधानोऽस्ति सकलः समाजः। नेपालसन्दर्भे तु सञ्चयवादसमाजवादयोः पृथक् पृथक् धारा नास्त्येव। तद्वयोरेव वादयोः सम्मिश्रणेन निर्मितं कपूतन्त्रमेव नेपाले सर्वथाधिपत्यं रचयति। कोषे शून्यधनो जनो विफल इति लज्जाराहित्यं वहमाना उपभोगवादिनां मतमवलम्बमानाः प्रवर्धका एते हि सन्ति। इत्थं परिप्रेक्षे हर्षान्वेषणाय द्वयोर्वादयोर्मध्ये एकस्य पक्षग्राहिता नूनमवलम्बनीया इति हास्यगर्भो विषयः।

स्थितिगत्यात्मकः प्रगतिवाद इति विश्वराद्धान्तः विचारेषु आगमनात् प्राग् दर्शनविचारसमाजशास्त्रीया दिशा पूर्वाग्राहाणां याऽसमीचीना भीतिरारचितास्ति सा कथञ्चनापि छेत्तव्या हि। भीतिरेषा चीनदेशस्य ग्रेटवाल इतीव वैभवद्योतिका सम्पदा

नास्ति। इयन्तु अनीप्सिता वादास्ति काचित्। पदार्थचेतनयोर्द्वैविध्यतयोर्मध्ये एकस्य प्रभूतं मत्वा पक्षग्राहितायां मानवमस्तिष्कस्य ज्ञानसर्वश्रेष्ठतायाः अज्ञेयतायाश्च मध्ये द्वयोर्ध्रुवीकरणात् सङ्कटापन्ने दर्शनविमर्शे स्थितिगत्यात्मकः प्रगतिवादस्य संवादेन कीदृक् तात्त्विकः प्रभावो भवेत्। सुखं कथं प्राप्तव्यमिति प्रश्नः शाश्वतोऽस्ति। एवं सम्बोधयितुं सञ्चितिवादः मार्क्सवादः इति। द्वावपि वादौ अक्षमौ विद्येते तावत्। (कतिपयानां मते तु न कथञ्चित् शक्नुवन्ति) इति विमर्शे भूते सत्यपि तयोर्द्वयोरेव पक्षधर्मितयोः केन्द्रीकृत्य क्रियमाणो बुद्धिव्यायामोऽपि वृथा हि। अस्माकं यो राष्ट्रियसिद्धान्तो वर्तते। सोऽधुना यावदपि पश्चिमदेशेषु गतो नास्तीति हेतुनापि अद्यत्वे ज्यारेड डायमण्डप्रभृतिविद्वांसः राष्ट्रवादराष्ट्रियपरिचयोर्भेदान्वेषणप्रक्रमेष्वेव बद्धाः सन्ति। कथितराष्ट्रवादो दुष्टः परं राष्ट्रियस्वत्वतावश्यकीति विश्लेषयन्ति। देशभक्तेः राष्ट्रवादस्य च पृथक् पृथक् परिभाषाः कण्ठस्थीकृत्य बुद्धिविलासङ्कुर्वतां जनानामाविश्वमेव महती लहरी विद्यते। राष्ट्रियतायाः परिधावेव सीमाङ्कनं माभूत्। अन्ताराष्ट्रियबन्धुत्वमेवात्मसात्कर्तव्यमिति "सेक्रो हेर्भात"इत्यस्य लेखः पठने प्रियकरः सन्नपि तन्मार्गे कथं प्रवेष्टव्यमिति विषयस्य समाधानं पश्चिमदेशेष्वेव नास्ति। तत्रैवान्वेषणेन न प्राप्यते च। वर्तमानयुरोपभूखण्डेषु पारेशतं राष्ट्रियतायाः प्राधिरित्वं प्राप्यते। अपि च राज्यं राष्ट्रञ्च पृथक् पृथक् वस्तुजातं वर्तत इति राद्धान्तः समग्रयुरोपभुवमेव अस्तव्यस्ततां प्रतिनयेदिति सङ्कटं घनीभूतमस्ति। यहुदी-प्यालेस्टिनी च सिंहाला तमिलश्च अनेकदेशेषु विभक्ताः आसंसारं शास्तारः खलिकासहितस्य इश्लामी खिलाफतः (Calaphate) इत्यस्य जेहादिनः बहुषु देशेषु कथितराष्ट्रवादिनां निर्वाचने जयः इति वर्तमानविश्वस्य सत्यता विद्यते। सर्वेषां सार्वत्रिकी जिज्ञासा इतः किं भवेदित्यत्र वर्तते। "मिचियो काकु" इत्यस्य विचाराः श्रुयेरन् चेत् प्रविधिकारणाज्जायमानसकारात्मकपरिवर्तनानां परिचर्चया प्रफुल्लता विलसति चेत् युवाहनोहहरारीद्वारा ए.आई. इत्यादि तत्त्वसहाकारेण दृष्टिपथमागतया चतुर्थऔद्योगिकक्रान्त्या च साकं निर्थकजनानाम् अनीप्सित संख्यासम्मर्दताबीजेन जनिष्यमाणायाः हानेः सन्दर्भे ते अवधानयुततां दातुमुद्यताः सन्ति।

वैदिकदर्शनानां मूलधारायाः मुख्यं वैशिष्ट्यं नाम व्यावहारिकत्वं विद्यते। वेदमन्त्राणां सम्परिशीलनेनेदं स्पष्टीभवति यत् दर्शनस्योद्देश्यमेव जीवनस्य व्यवहारगतानां प्रायोगिकाणाञ्च समस्यानामपाकरणमेव। जीवनं खलु

आयामत्रययुतमस्ति (आदिदैविकमाधिभौतिकमाध्यात्मिकं च)। एवमेव जीवनं त्रिशरीरयुक्तञ्चास्ति। (स्थूलम्, सूक्ष्मम् कारणञ्च) इति मतत्वाद् दर्शनस्यान्तर्वस्तु च तथाविधमेवास्ति। भौतिकाध्यात्मवादाविति द्विविधे फलके पक्षग्राहितया क्रियमाणा द्विचक्रिया प्रणाली इह नास्ति। अधिभूतम्, अधिदैवम्, अध्यात्मञ्च सातत्येन मिथः सम्बन्धतया पश्यन्ति वैदिकाः। वैदिका बौद्धा जैनश्च स्वीयचेतसा दार्शनिकजिज्ञासायाः तात्पर्यं नाम ज्ञानाय ज्ञानं नापि तु सुखायास्ति। अविच्छिन्नं परमं सुखमेव मोक्षः। आश्चर्येणोत्सुकतया च विधीयमानोहापोहद्वाभ्यां वैदिकपरम्परायां सोद्देश्यं विहिताः संवादाः (उपनिषत्सु इव) अपि च शास्त्रार्थानां प्राधान्यकल्पनं तावत् तात्पर्यतया किमिति चेत् स्यामुएल्, पी हन्टिङ्गटनः, युवालनोह हरारी, ज्यारेड डायमण्ड एवञ्च सेक्रो होर्भात किं वा इतरैश्चोहितसमस्यानां निराशः व्यवहारः मूलतया विधातुं समर्थं स्यात् तावद् दर्शनम्। अस्याः शताब्द्या एव विशेषो विमर्शः इति विश्वसितस्य जोर्डन पिटरसन-स्लाभोज जिजेकयोः विमर्शः कुतो विशेषोपलब्धिमूलो नाभूत्। इदं ज्ञातुं तावत् विगतवेलायाः उदाहरणैः ततोऽपि साहाय्यं भविष्यति। ईश्वी संवत् -१९७८ वर्षे जर्मनदेशे ड्युस्सेल डोर्फमध्ये दर्शनशास्त्रिणा षोडश्याः सभायाः मूलो विषयो दर्शनशास्त्रम् आधुनिकविज्ञाने विश्वदर्शनसमस्या इति। यद्वा भवतु नाम तत् काङ्ग्रेसदले मुख्यः कोलाहलस्तु सञ्चितिवादसमाजवादयोर्मध्ये धाराद्वयविवादेन जातो वर्तते। ततोऽपि प्राग् ईश्वी सं - १९७१ संवत्सरे नेदरल्याण्डदेशे आयोजितकार्यक्रमे नोमचोम्स्की तथा मिसेल फुकोद्वारा मानवप्रवृत्तिः (Human Nature) सन्दर्भे कृतो विचारविमर्शोऽपि सम्प्रति इह स्मर्तव्योऽस्ति। परन्तु सविमर्शो भूरिशः प्रचारतां गतः सन्नपि निष्कर्षुमुखितां नैवाप।

तैः सत्यं वा स्थापितवादेषु तत् तत्परिधिषु सीमाङ्कनं विधाय पूर्वतो निर्धारितेष्वेव पक्षग्रहेषु स्वात्मानमायोज्य विमर्शो विहित इति कारणात् तथाभूतमस्ति। ते तेषां हि पूर्वकृतसमर्थनव्यूहेष्वन्तर्भूताः सञ्जाताः। कविः स्यामुयेल-टेलर-कलेरिजः प्रत्येकमपि जनः जन्मनः समानान्तरमेव प्लेटोकर्तृकमतावलम्बी किं वा एरिटोटलवादी भवतीति भावो वेगवशाद् अतिशयोक्तिपूर्णा विचाराणां प्राचीकटत् इत्येव नापि तु कस्यचित् वादस्य वन्दिनं कृतवान् स्वात्मनमिति। ततोऽग्रे न कश्चिद्राद्धान्तः विकल्पत्वेन विश्वसमस्यायाः दूरीकरणाय नास्तीति नूनमाग्रहगता मान्यता किल।

भविष्यत्कालेऽपि कश्चिदपि विमर्शः सञ्चितिवाद-मार्क्सवादयोः

द्विधारात्मकबुद्धिविलासप्रक्रमे हि सीमानं लभते चेत् तादृशविमर्शेण न कश्चिल्लाभो भवति। विमर्शस्य विपणीकरणं तस्य भव्यता सम्पादनञ्च विधाय भूरिशो धनार्जनं विदधानां कारणात् परिणामकारिता कित्थं भवेदिति तु निश्चयेनाचिरं दृश्यते। पूर्व-पश्चिमोत्तरदक्षिणादिष्वपि दिक्षु विद्यमानं ज्ञानं पुरस्कृत्यैव तत् तद् ज्ञानजातस्य सम्मिश्रणमन्तरा यावन्तोऽपि विमर्शकार्यक्रमा आयोज्यन्ते चेदपि तेन सार्थकतां भजन्ते। अन्यस्तावानेव महिमयो विषयोस्ति किं प्रजातन्त्रम्। सञ्चितिवादः एतयोर्द्वयोः अपृथत्वं वा इति विषयमधिकृत्य तयोः पृथगस्तित्वस्वीकारयुतमध्ययनं विना साध्यमेव नास्ति। कान्टेन युरोपे इन्लाइन्टमेन्टसमयः इत्युच्यमाने काले उक्तमिव ज्ञानायोत्साहं कृत्वा न भवति। यस्य कृते अद्यतनसन्दर्भे सञ्चितिवादसमाजवादयोः द्वैविध्यसीमाङ्कनात् मुक्तैर्भाव्यमेव।

शास्त्रार्थस्य प्रभावः समाजे जायते न वा ? उताहो दर्शन-सिद्धान्त-वादादीनां स्तरेषु जातानां बौद्धिकृत्यानां समाजे प्रभावो भवेन्न वा ? अवश्यं भवति। सिमो द बोउवार एवं च अन्येषाञ्च बहूनां जनानां विचारधारायाः (नारीवादः - Femisism) इत्यस्य प्रभावं पश्यामः। सिग्मनफ्रायडस्यैव वार्तां कुर्मः।

एडमस्मिथः काल मार्क्स म्याक्सवेवर इत्येतेषां प्रभावं विलोकयामः। महात्मगान्धिनो हि प्रभावं पश्याम। अस्माकमेव स्थानादुच्यते चेत् वयं सहृदयतादर्शनं राज्यराष्ट्रसिद्धान्तः स्थितिगत्यात्मकः प्रगतिवादः आधारशीलाचतुष्टयं (विज्ञानस्य बुद्धिः, प्रविधेः प्रगतिः, धर्मस्य विवेकः, सहृदयतायाः सम्बन्धः) इत्यादीन् विषयान् वैश्विके विमर्शे प्रस्तोतुं शक्येरन् चेत् कश्चित् सार्थकः प्रभावो भविष्यतीति मन्यामहे। सञ्चितिवादः - मार्क्सवादौ कस्य सेवां कुरुतः ? तेषां विषसम्पृक्ता परिणामकारिता कीदृशीति ? एडमस्मिथः, म्याक्सवेवरः, कालमार्क्सः अन्ये च येऽपि केऽपि प्रभावशालिनः विचारकाः सन्ति। तेषां निष्कर्षेण मानवसमुदायं कश्मिँचित् विशिष्टे घट्टे प्रापय्य तद्गतावधानस्य नीरक्षीरात्मकविवेकार्थं वयं मताग्रहाणां वन्दिनो भवेम वा ? आम् तेषु सिद्धान्तेषु विद्यमानानुत्तमान् विषयान् नूनं स्वीकुर्महे विना कार्पण्यभावम्। परन्तु तेषां अतिव्याप्तिपूर्णाग्रहेभ्योऽपि मुक्ता भवेम। सर्वजनकल्याणार्थं मानवतावादादपि बृहत्तरसहृदयतावादस्य मानकानुसारेण प्रगतिः, समाजस्य समाजिक-साँस्कृतिक-आर्थिक-औद्योगिकाद्यायामादिविकासार्थमग्रसरतायाः संवाहकं दर्शनं सिद्धान्तः, वादश्च विश्वदृष्टिकोणेषु अद्यतनयुगस्यावश्यकता वर्तते।

स्थितिगत्यात्मकप्रगतिवादस्य चिन्तनविमर्शे कृते युगीनावश्यकतायाः परिप्रेक्षे हि विधेयो विचारः।

व्यवहारस्तरे उदाहरणार्थं कथयेम चेत् ए.आई. इत्यनेन क्रियमाणे प्रभावे सामाजिक-साँस्कृतिक-आर्थिक-नैतिकादिप्रभावसन्दर्भे चानुसन्धानं चिन्तनं विमर्शं च विधातुं स्थितिगत्यात्मकप्रगतिवादपरिधौ न लभ्यते चेत् एतस्मिन् वर्तमाने समीपस्थे भविष्यति च न सान्दर्भिकतां वहते। सममेव एतदपि ध्यातव्यं यत् - क्षणिकव्यवहाररेखायां हि दर्शनं नान्तर्भावनीयम्। दर्शनशास्त्रेण सम्बोधनीयाः शतशो विषया नित्यनूतना भवन्ति। सांख्यदर्शने यत् - प्रकृति-पुरुषयोश्चिन्तनं वर्तते। तस्याद्यापि सार्थकत्वं तावदेव वर्तते। वैशेषिकदर्शनेन प्रदत्तं चिन्तनं प्रमेयात्मकमधुनापि सान्दर्भिको हि। जैमिनी-शबर-कुमारिलानां परम्परायामुत्तरत्र प्रवृद्धा विकासपद्धतिः वर्तते तद्वर्तमानयुगेऽपि महती अर्थपूर्णा पद्धतिः वर्तते। अस्माकं विधौ नैमिषारण्ये अष्टाशीतिसहस्रसंख्यकाः ऋषय आसन् इति ऐतिह्यमस्ति तस्मात् प्राच्यकालेऽपि जनसभायां याज्ञवल्क्यः, गार्गी, अष्टावक्र इत्यादीनां शास्त्रार्थं प्रसङ्गमपि वयं जानीमः। गौतमबुद्धस्य देहावशानादनन्तरं विभिन्नेषु कालेषु जाताः भिक्षुसङ्घपरिषदां महासभाश्चोल्लेख्याः सन्ति। ततोऽर्वाचीनकालेषु आचार्यः शङ्करः, आचार्यः कुमारिलोभट्टः अपि चान्येषां बहूनां जनानां द्वारा सम्पादितशास्त्रार्थबलात् बृहत्तरसमाजे पुनर्जागरणं यज्जातं तस्य प्रबलान्युदाहरणानि अस्मत्समीपे वर्तन्ते। अस्माकमेतेषु क्षेत्रेषु मिथिलायाः राजा शताब्दीद्वयाद् वा शताब्दीत्रयात् प्राक्कारितानां पारेशतमितसभानां महासभा हि परम्परागतान्तिमा सभा स्यात्। वैदिकर्षीणां परम्परायां वशिष्ठेनस्थितेः विश्वामित्रेण च गतेः प्रातिनिधित्वं विधीयते। तस्मादपि वशिष्ठेन वैदिकपरम्परायाः सनातनचरित्रस्य प्रतिनिधित्वं बोभवीति। विश्वामित्रद्वारा नित्यनावीन्यस्य प्रतिनिधित्वं जातं भवति। अविच्छिन्नतायाः प्रतीकं वशिष्ठं मन्तुं शक्नुमः। अपि च विश्वामित्रं तावत् प्रवर्तनस्य प्रतीकं मन्यामहे। वशिष्ठेन सन्तुलनं विश्वामित्रेण च प्रगतिर्विज्ञापिता स्वचरितेन। कतिपयावस्थासु वशिष्ठविश्वामित्रयोः मिथो द्वन्द्वं वैमत्यं वा द्रष्टुं शक्यते। अद्यतनकालेषु वशिष्ठं संस्कृतेः, विश्वामित्रं च विज्ञानप्रविधेः प्रतिनिधिको वर्तत इति मन्तुं शक्यते। यथा वशिष्ठविश्वामित्रयोर्मध्ये मिथो वैरोधं दृश्यते तद्वदेवाधुनापि स्थितिगत्योः सनातनतायाः नवीनतायाश्च मध्ये अविच्छिन्नताप्रवर्तनयोः प्रगतिसन्तुलनयोः संस्कृतिविज्ञानप्रविध्योः

स्वीयस्वीयमौलिकचरितकारणात् मिथो वैमत्यद्वन्द्वं नितरां स्वाभाविकमेव। परं द्वन्द्वं नाम तेषां सम्बन्धस्य कश्चिल्लघुको विषयः। वशिष्ठविश्वामित्रयोरन्तिमे यन्मैत्री प्रथिता। तेन ज्ञातव्यमेव यत् - सहृदयतायाः सम्बन्धे द्वयोः सुयोगः आवश्यक एव। अपरो विशेषः तयोस्तयोः पूर्वोक्तयोः मध्ये समन्वयः जायतामेव कर्तव्यश्च। पुराणकथानां तात्पर्यं जानीमः।

वशिष्ठविश्वामित्रयोः समन्वयस्य सहृदयतायाः फलं कीदृशं भवेत् ? अस्योत्तरत्वेनागतो दृष्टान्तो वर्तते - रामराज्यम्। यत् त्रेतासमये श्रीरामस्य कार्यकारितायां तन्नायकत्वे च विकसनं गतं रामराज्यम्। रामराज्यस्य तात्पर्येण सहास्माकम् अवधानतास्ति। इयं वास्तविकी परिघटना वा कल्पनमूला हीति विवादे नैरपेक्ष्यचिन्तनं मौनं वाकलय्य पश्चिमस्य थियोलोजिकल (Thelogical) इति विषये प्रवेशं विनैव किम् ? कल्पनामन्तरा हि किमपि मानकं स्थापितमस्ति चेत् कदाचित् तत् प्रतिमानत्वेन कदाचित् पुनरुपमानत्वेनोपयोगितां प्राप्नोति। वैज्ञानिकसत्ययुगस्य कृतेऽपि उपमानं तु आवश्यकमेव न्यूनातिन्यूनमपि सन्दर्भेऽत्र गृहीतमस्ति। सुखमेव प्रभूत्वमिति मतव्यवस्थाकाले दत्ता संज्ञा सा। सत्ययुगस्य चित्रमपि सुखाय मानवाकाङ्क्षायां समं सीमाबद्धमस्तीति तथ्यं वयं वैज्ञानिकसत्ययुगस्याधारशीलेति पुस्तके गृहीतमासीत्। सुखायानन्दाय प्रसन्नतायै च अग्रसारिता नूनमावश्यकीति। योग्यमपि च तत्।

आमस्माभिः वैज्ञानिकतायुक्तो धर्मः धार्मिकतायुक्तं विज्ञानं चेति कथयित्वा समन्वयात्मकमार्गः वृद्धिं नीतः। एतन्नाम वशिष्ठविश्वामित्रयोः तामुज्ज्वलां परम्परां वयमायोजयामः आयोजितञ्च।

आधारशीलाचतुष्टयमिति विज्ञानस्य बुद्धिः, प्रविधेः प्रगतिः, धर्मस्य विवेकः, सहृदयतायाः सम्बन्धः इति प्रोच्य स्थितिगत्योः समानता नवीनतयोः, प्रवर्तनाविच्छिन्नयोः प्रगतिसन्तुलनयोः संस्कृतिवज्ञानप्रविध्योः समन्वितरूपमेव चिन्तितमस्ति। राज्यराष्ट्रमपि एतस्मिन् सन्दर्भे वशिष्ठपरम्परायाः, विश्वामित्रपरम्परायाश्च समन्वितं स्वरूपं वर्तते। समन्वयद्योतकमेव तत्। ह्यस्तनेतिहासे वशिष्ठविश्वामित्रयोः सहकारेण समन्वयेन सहृदयतया च रामराज्यं स्थापितं बभूव।

अधुनातनं युगं वैज्ञानिकं सत्ययुगमिति नाम्ना उद्घोषितमस्ति यावदपि

नीरसं मन्यताम् । तत्त्वमीमांसा, सत्त्वमीमांसा, ज्ञानमीमांसा, प्रमाणमीमांसा वा प्रमाणविज्ञानं नीतिविज्ञानं वा नीतिशास्त्रं सौन्दर्यमीमांसा इत्यादिसम्बद्धविषयवस्तुषु प्रविश्य यथायथं चिन्तनविमर्शमकृत्वा दार्शनिकजिज्ञासानां समाधानं समुचिततया सम्बोधनञ्च भवितुं नार्हति । अतोऽपि स्थितिगत्यात्मकप्रगतिवादः सत्सङ्गेऽपि तेषां विषयवस्तूनां परिचर्चा आवश्यकी एव । स्थितिगत्यात्मकप्रगतिवादस्य विमर्शो हि आधारशीलाया युगसापेक्षचिन्तनमस्ति ।

द्वितीयं प्रवचनम्

प्रमाणप्रमेययोः स्वरूपम्

परह्यस्तनीं घटनां संयोज्य वक्तुमारभे - इहैव काष्ठमण्डपे विकासस्य नाम्नि सम्पदां विनाशस्य, प्राचीनवसतेः विस्थापनस्य च विरुद्धे विपुलसङ्ख्यायां जनप्रदर्शनी दृष्टा। अधुना तावद् विकास इत्युक्ते विस्तृतमार्गाः, बृहान्ति गृहाणि अपि च जलविद्युतः, महान्त आलापाः जायन्ते। तत्रापि विशिष्य जलविद्युत आयोजनायाश्चर्चा भवति परियोजनावश्यकीति विषये। यस्या कस्यापि आयोजनाया विषये अत्यन्तं भीमकायो दैत्याकारो वा विकासो वर्तते चेदेव विकासत्वेन मन्यते। खोकनास्थानस्य उदाहरणं वयं गृह्णीमश्चेद् एकस्मिन्नेव स्थाने तावत्यः परियोजना उद्घुष्टा यतस्तत्रत्यवासिनस्तु ताभ्यः परियोजनाभ्यः भूक्षेत्रदानादेव स्वयं भूमिहीनावस्थां प्राप्ताः।

इहैव काठमाण्डुनगरेऽपि षड्शतात्, अष्टशतात्, द्वादशशताच्च वर्षेभ्योऽपि प्राच्यमन्दिराणि मार्गविस्तारस्य क्रमे त्रोटनीयावस्थां प्राप्तानि। अर्थाद् मार्गाणां मापदण्डानां निर्माणाद् प्राक्तनानि गृहाणि च ध्वंसनीयावस्थां प्राप्तानि। ये च काठमाण्डुनगराद् बहित आगतवन्तो ते जना एवं वदन्ति यत्- विस्तृता मार्गा भवेयुः। मार्गे गृहनिर्माणं किमर्थम्? सम्बद्धनिकायेन क्षतिपूर्तिश्च दीयत एवेति असंवेदनशीलां टीप्पणीं कुर्वन्ति। परन्तु इदानीन्तनजनसङ्ख्यां दृष्ट्वा काठमाण्डुनगरम्, ललितपुरम्, भक्तपुरञ्चावलोकयामश्चेत् अत्यन्तं सुव्यवस्थितानि नगराणि प्रतीयन्ते। अत्र हि लिच्छवीकालादेव अविच्छिन्नता दरीदृश्यते। तैः तत्समये सुव्यवस्थितं नगरं कथं निर्मातव्यमिति गाढं विचिन्त्य नगरनिर्माणस्य परियोजनानुसारेण कार्यं कृतं दृश्यते।

अत एव संसारे व्यवस्थिततया निर्मितेषु नगरेषु इमानि त्रीणि नगराण्यपि समागच्छन्ति। परन्तु तत्र व्यवस्थापकीयन्यूनता, अनियन्त्रितस्थानान्तरणम्, नूतनप्राचीनवसतीनां पारस्परिकान्तःसम्बन्धः कः ? कथञ्च प्राचीनवसतीः संरक्ष्य नूतनवसतीनां निर्माणं विधेयम् ? चेत्यादिविषयाणां व्यवस्थापनस्य ज्ञानाभावादव्यवस्था दृश्यते । एतादृशविषये विकासस्य अज्ञानजनितपरिभाषां कुर्वतां प्राक्तनानामिदानीन्तनानाञ्च जनानां दृष्टिः नूनमेव भिन्ना भिन्नैव भवति । कतिपयजनानां त्विदानीं यत्र गृहं वर्तते, तदतिरिक्तं गृहं नान्यत्र कुत्रचिदप्यस्ति । क्षतिपूर्तिप्रदानेनापि स्वस्थानं परित्यज्यान्यत्र कुत्रचिद् गमने सति स्वकीयपर्वसंस्कारसंस्कृतिपरम्परादिभ्यः दूरं गच्छन्तो जनास्तावता धनेन नूतनक्षेत्रं गृहं वा क्रेतुं समर्था भवन्ति न वा ? इति चिन्तनीयः पक्षः । अत एव सर्वेषां समाना दृष्टिः तत्र न दृश्यते ।

संसारे बहुषु देशेषु पूर्वत एवाविच्छिन्नतया प्रचलतः पक्षस्य, परिवर्तनस्य गतेर्वा पक्षस्य समाधानं कर्तव्यमिति विचारणायाः सामर्थ्याभावात् महतयुद्धं सङ्घर्षो वा सञ्जातः । अत्रत्यमूलवासिभिः शासकैश्च ज्ञाते विकासे महदन्तरं वर्तते। अस्मद्देशे येषां दीर्घपरम्परा वर्तते, तस्य सभ्यता उत्कृष्टा भवतीति तु समीचीनपक्षः। तादृशसभ्यतायाः समीचीनपक्षस्य ज्ञानेन शिक्षणेन वा वर्तमाने भविष्ये चाग्रे गन्तुं शिक्षा लभ्यते। परन्तु एतेन कूपमण्डूकवत् प्रवर्तनीयं भवति वेति असमीचीनपक्षोऽप्यत्र ध्येयः। वस्तुतोऽस्मद्देशे यस्य कस्यापि विचारस्यास्थया सह तुलना क्रियते चेत्तस्य प्रतिरक्षां कर्तुं सन्नद्धो भवति मानवः । तथा सति मौनस्वीकृतेः, वितण्डायाः, अन्धभक्तिप्रस्तुतेश्च सम्भावना नूनमेव भवति । राजनीतावपि नेपाले अहन्तु पितामहकालादेव राजनीतिसम्बद्धामुकविचारे सन्नद्धः, अमुकविचारे मम प्रवृत्तिस्तु बहुवर्षेभ्य एवास्ति, अतः एतद्विपरीततया अन्यत्र मतदानं कथं कुर्याम् ? इति जनानां वार्ता बहुशः श्रूयते, परन्तु एतेन स्थिरगत्यभावात् समाजहितं न कथञ्चनापि भवितुं शक्नोति। नेपाले वर्तमानपरिस्थितिं दृष्ट्वा नेपालस्य साम्प्रतिकदुर्दशामव्यवस्थाञ्च विलोक्य शासनसत्तायां ये सन्ति, तान् विस्थाप्य नूतनशासनव्यवस्थया भाव्यम् । परन्तु तेषां विस्थापनमसम्भवप्रायो दृश्यते। परन्तु एतादृशी गतिरिदानीं नास्ति ।

किञ्च गतेरङ्गीकारानन्तरं नूतनवस्तुप्राप्त्यनन्तरं वा ततः किमुपादेयम् किं वानुपादेयम् ? इत्यस्य निर्णयन क्षमाभावे महती समस्या आपतति। अत एव स्थितिगत्यात्मकप्रगतिवादस्य चिन्तनमेतादृशसमस्यानां समाधानायैव । परन्त्वत्र

सर्वविषयाणामान्तर्ये सैद्धान्तिकविचारा दार्शनिकविचारा एव वा भवन्तीति ज्ञातव्यम् । यस्य कस्यापि सिद्धान्तस्य, नीतेः, दर्शनस्य वा सार्थक्यं तेषां व्यावहारिकता-प्रायोगिकता-आनुभविकतादिष्वेव भवति । तस्माद् विलम्बेन वा भवतु, शीघ्रं वा भवतु स्थितिगत्यात्मकप्रगतिवादस्य क्रियान्वयनानन्तरमस्माकं समाजे सञ्चितिवादे, मार्क्सवादसहितसमाजवादे च केन्द्रीभूय राज्यस्य अर्थतन्त्रस्य च सञ्चालनम्, शिक्षासंस्कृतौ समाजतन्त्रे च कार्यकरणापेक्षया अनेन स्थितिगत्यात्मकप्रगतिवादस्वीकारणेन जनाः सुखं कया रीत्या प्राप्नुयुरिति हि मुख्यो विषयः । यतो हि सिद्धान्तस्य कृते समाजः, उत समाजस्य कृते सिद्धान्तः ? किञ्च सिद्धान्तस्य कृते व्यक्तिर्वा व्यक्तेः कृते सिद्धान्तः ? इति विषये विवादो निरन्तरं जायमानो वर्तते ।

समीचीनसिद्धान्तोऽपि देशकालपरिस्थित्यनुसारं वैभिन्यं भजते । स्थितिगत्यात्मकदृष्ट्या विचारयामश्चेत् कस्मिँश्चित् समये बहुकार्यसाधकसिद्धान्तः समयान्तरे किञ्चनापि कार्यं सम्पादयितुमसमर्थोऽपि भवति । एकस्मिन् देशे क्रियान्वितस्य विचारस्यान्यत्र देशेषु क्रियान्वयनं भवत्येवेति न नियमः, परन्तु यावत्पर्यन्तं एकस्य सिद्धान्तस्य इदमित्थमिति निर्णयो न भवति, तावत्पर्यन्तं सिद्धान्तस्य निर्मातृभिः समाजः सञ्चालनीयः । समाजहितं कथं कार्यम् ? इति धिया समाजस्य कृते सिद्धान्तो विधातव्यः । यदा सिद्धान्तो निर्मीयते, तदा निर्मितसिद्धान्तो मूलतः चतुर्विधविचारान् विस्तारयति । प्रथमन्तावत् यस्याः कस्याअपि परिघटनायाः परिभाषां ददाति । द्वितीयञ्च तस्य व्याख्यानं करोति, इदमित्थं भवतीति निर्दिशति, कार्यकारणसम्बद्धः स्याच्चेत्तत्र कारणस्य तत्प्रभावस्य च व्याख्यानं करोति । तृतीयं हि इतः परं किं भवति ? इति निरीक्षणं विदधाति । यथा सोडियम-क्लोरिनतत्त्वयोरुभयोः निश्चिततापक्रमे सम्मिश्रणं क्रियते चेत् सोडियम-क्लोराइडतत्त्वस्वरूपं प्राप्नोतीति निश्चयेन वक्तुं शक्यम् । तेन सुनिश्चिततापि तत्र भवति । प्रकृतिवत् समाजेऽपि तथा तु दुःशकमेव । कुतः ? शीघ्रमेव तस्य परिवर्तनशीलत्वात्, नानाविधावरोधसत्वाच्चेति । तथाप्यन्ते तस्य नियन्त्रणं नियमनञ्च कर्तुं शक्यत इति प्रवृत्तिस्तत्र दृश्यते ।

यस्मिन् दिने सिद्धान्तः स्थिरीभवति, तदा तत्सिद्धान्तानुयायी यः कोऽपि भवेत् तादृशावस्थायान्तु तस्य कार्यं सिद्धान्तस्य कृते समाजः, उत सिद्धान्तस्य कृते व्यक्तिरिति भवति । इदञ्च पाश्चात्त्यदेशे कान्टप्रभृतिभिः दार्शनिकैः 'क्याटागोरिकल

इम्पेरिटीभ' इति नाम्ना विश्लिष्टम् । अयञ्च विषयः तत्पूर्वमेव पौरस्त्यदेशे मीमांसकैः दार्शनिकैरपि 'अथातो धर्मजिज्ञासा' ततः 'चोदनालक्षणोऽर्थो धर्मः' इतिरीत्या विश्लिष्टो वर्तते। धर्मनिरूपणानन्तरं वैयक्तिकजीवने, अभ्यासे, व्यवहारे, प्रयोगे च धर्मोऽवलम्बनीय इत्युक्तम् । विचारोऽयं खलु आधुनिकदर्शनशास्त्रस्य भाषायां 'डिओन्टोलोजिकल' इति नाम्नावबोध्यते । एतदनुसारेण विचार्यते चेत् सिद्धान्तस्य कृते व्यक्तिः सङ्घटनं वेति ज्ञातं भवति ।

साम्प्रतं वयं यद्विषये चर्चां कुर्वन्तः स्मः, तस्य विषयस्य प्रमाणपद्धत्या प्रारभमाणत्वात् सः ज्ञानात्मक इति । यं ज्ञानमीमांसा, प्रमाणविज्ञानम्, प्रमाणमीमांसा चेति नाम्ना जानीमो वयम् । तत्रैव संयोज्य प्रमाणम्, प्रमाता, प्रमेयञ्चागच्छन्ति। प्रमेयन्नाम पदार्थः, वस्तु, ज्ञेयं वा बोध्यम्। तच्च (ओन्टोलोजिकल) सत्त्वमीमांसासम्बद्धम् । नैकविधदर्शनेषु इदानीन्तनविभागानुसारेण नैकविधाः शाखाः वर्तन्ते। तथाविधानेकशाखासम्बद्धा विचारा अप्यत्र समायान्ति। विशेषतो मदीयानुसन्धानस्य निष्कर्षस्तु षट्प्रमाणयुता या प्रमाणपद्धतिः, सा मया स्वीकृता वर्तते । तादृशप्रमाणपद्धतौ प्रत्यक्षम्, अनुमानम्, शब्दः, उपमानम्, अर्थापत्तिः, अनुपलब्धिश्चेति षट् प्रमाणानि स्वीकृतानि । प्रत्यक्षस्य कृते आङ्गलभाषायां 'पर्सेप्सन' इति शब्दः प्रयुज्यते। अनुमानस्य कृते 'इन्फेरेन्स' इति शब्दः प्रयुज्यते, शब्दस्य कृते 'वर्ड, भर्बल टेस्टिमोनी, टेस्टिमोनि' वेति शब्दाः प्रयुज्यन्ते, उपमानस्य कृते 'कम्प्यारिजन, एनालोजी' इति शब्दौ प्रयुज्येते, अर्थापत्तेः कृते 'पोस्टुलेसन, डेरिभेसन फ्रम सर्कमस्ट्यान्सेस' इति शब्दौ प्रयुज्येते, अनुपलब्धेः कृते 'नन्-पर्सेप्सन, निगेटिभ अफ कग्निटिभ प्रुफ' इति शब्दौ प्रयुज्येते। प्रमा नाम यथार्थज्ञानम्, तच्च प्रामाणिकं भवति । तच्च ज्ञानं कथं प्राप्तुं शक्यते ? तत्साधनेनैवेति वक्तव्यम् । तत्साधनं विधिप्रक्रिया वा प्रमाणेन सह सम्बद्धा भवति । कस्य ज्ञानम् ? इति विषयस्तु प्रमेयसम्बद्धो भवति। यावन्तः पदार्थाः दृश्यमानाः अदृश्यमानाश्च सन्ति, ते पदार्था एव प्रमेयपदवाच्याः ।

ज्ञानं कथं समुत्पद्यते ? कस्मिन् विषये ज्ञानं प्राप्तव्यमित्यत्र विभिन्नदर्शनानां स्वस्वमतं दरीदृश्यते। प्रायः बहुशः जनाः दर्शनगतगूढरहस्यं विचिन्त्यैव तदनुसारं स्वात्मानं अमुकदर्शनानुयिन इति मन्वते । परन्तु तादृशचिन्तनकोटिं प्राप्तुं किमर्थं समाजे जायमानां समानप्रकृतिकपरिघटनां मार्क्सवादिनः भिन्नप्रकारेण

प्रतिपादयन्ति ? कन्फ्यूसस्वादिनः भिन्नतया प्रतिपादयन्ति । सांख्याः बौद्धाश्च तदेव भिन्नतया प्रतिपादयन्ति । पुराणादिषु च पुनः भिन्नतया प्रतिपाद्यते । एवं भिन्नभिन्नरूपेण प्रतिपादनन्तु प्रमाणपद्धत्यनुसारेणैव । पूर्वोक्तेषु षड्विधप्रमाणेषु प्रत्यक्षन्नाम इन्द्रियजन्यं ज्ञानं भवति । तदतिरिक्तं पञ्च प्रमाणानि परोक्षज्ञानस्य साधनानि सन्ति । दर्शनेषु चार्वाकाः प्रत्यक्षमेकमेव प्रमाणं स्वीकुर्वन्ति ।

साम्प्रतम् आधुनिकविज्ञाने एक्ट्रीमिस्टनामकः कश्चन समूहो वर्तते । तेऽपि प्रत्यक्षमेकमेव प्रमाणं स्वीकुर्वन्ति । क्वान्टिटेटिभ वर्डभ्यूद्वारा सर्वेऽपि विचाराः वस्तुनिष्ठाः गणनात्मकाश्च भवेयुरिति प्रतिपाद्यते । किञ्च सत्यन्तावत् बहिः परीक्षणीयम् । न व्यक्तिपरकम्, न च विषयनिष्ठम्, न वा वस्तुनिष्ठम्, अपितु सत्यस्य परीक्षणं हि उपकरणमाध्यमेन कर्तुं शक्यत इति मन्तव्यम् । नैतावन्मात्रम्, सत्यस्य नैकविधा आयामाः तद्रीत्या उद्घाटिताः स्युरिति वरमेव । तदतिरिच्यान्यो मार्ग एव नास्तीत्याकारक आग्रह आसीत् कस्मिँश्चित् समये । यश्च 'पाश्चात्त्यदेशे मोडर्निष्ट पिरियड' इति नाम्नोच्यते । तात्कालिकसिद्धान्तोऽवलोक्यते चेत् सर्वदा 'एब्स्युलुट ट्रुथ' इति कथनं कृतं दृश्यते । एतावन्मात्रं न, तत्प्राप्तये साधनमपि एकमेवेति निश्चयकारिपद्धतिः भवति ।

अत्र पौरस्त्यचिन्तने चार्वाकदर्शनस्य यावद् **जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत्, भष्मीभूतस्य देहस्य पुनरागमनं कुतः ?** इति प्रसिद्धश्लोके प्रसङ्ग आयाति यत् यावत्पर्यन्तं जीवति जनः, तावत्पर्यन्तमानन्देन जीवनं यापनीयम् । अत्रोदाहरणरूपेण घृतं प्रस्तूयते - अयं देहः क्षणभङ्गुरः, अतः भष्मीभूतस्य शरीरस्य पुनरागमनं न सम्भवतीति धनाभावे ऋणं कृत्वापि घृतं पातव्यमेवेति । तद्वद् यथा कथञ्चनापि अद्यैव महार्घवस्त्रं धारणीयम्, गृहं वाहनादिकञ्च क्रेतव्यम्, राजनीतेर्माध्यमेन यथा कथञ्चनापि सर्वकारीयक्षेत्रं सामुदायिकक्षेत्रं वा लुण्ठितव्यम् । अन्येषां वंशजान् भुशुण्डिं वाहयित्वा युद्धार्थं नियोज्य स्ववंशजानां कृते विदेशेषु पठनाय क्रियमाणा व्यवस्था च चार्वाकदर्शनस्यैव सिद्धान्तरूपेति । पाश्चात्त्ये विकसितो मार्क्सवादोऽपि तथैव । 'इम्पेरिसिजम' इति नाम्ना विज्ञानस्य प्रचारः कृतः । तस्यापि कदाचित् 'चर्च' इत्याख्यसंस्थया सह विद्रोहः सञ्जात आसीत् । 'चर्च' इत्यनया संस्थया अज्ञेयवादस्य (ईश्वरस्य) प्राधान्येनाङ्गीकृतत्वात् तद्विरुद्धतया प्रवर्तने नैकविधप्रतिक्रियाः स्वभावत एव जायेरन् । अत एव एतादृशविषयाणां

वैज्ञानिका अपि विरोधं कृतवन्त इति दृष्टिपथमायाति । तथापि गच्छता कालेन आइन्सटाइनाख्यवैज्ञानिककालादेव 'रिलेटिभिटि' इत्यस्य चर्चा समागता। टेस्टानामकं विद्वांसं पश्यामश्चेत्, सः ऋषितुल्यो दृश्यते । तत्रापि पद्धत्यन्तरं प्रारब्धमिति ।

दार्शनिकदृष्ट्या मार्क्सवादमवलोकयामश्चेद् मार्क्सवादानुयायिन इदानीं यावत् प्रत्यक्षातिरिक्तं प्रमाणान्तरं नाङ्गीकार्यमिति वदन्तस्सन्ति । शास्त्रीयसिद्धान्तदृष्ट्या मार्क्सवादः सर्वदापि पदार्थस्य प्राधान्यं प्रतिपादयति। चेतना नाम पदार्थस्य विकासरूपम्, अथवा हावभावादिभ्य उत्पद्यमानं वस्तु इति ते मन्वते। किञ्च प्रत्यक्षातिरिक्तमन्यत् प्रमाणं नास्तीति विषयोऽस्माभिश्चिन्तनीयः। ततः पौरस्त्यचिन्तने सांख्ययोगन्यायवैशेषिकमीमांसावेदान्तादीनि षट् आस्तिकदर्शनानि सन्ति । तेषु वैशेषिकदर्शने बौद्धदर्शने च प्रमाणद्वयमेव स्वीक्रियते। तच्च प्रत्यक्षम्, अनुमानञ्चेति। अनुमानन्नाम आङ्ग्लभाषानिबद्धः 'गेस' इति शब्दो न, अपितु विद्यमानप्रमाणस्याधारेण सम्प्रति एवं दृश्यत इति रीत्या अर्थापनमेवानुमानम् । सांख्यदर्शने योगदर्शने च प्रत्यक्षम्, अनुमानम्, शब्दश्चेति प्रमाणत्रयं स्वीक्रियते । कुत्रचित् शब्दस्य कृते आगमप्रमाणमित्यपि प्रयुज्यते । समग्रतया प्रमाणत्रयमेव सांख्ये योगे च विश्लिष्यते। न्यायदर्शने जैनदर्शने च चत्वारि प्रमाणानि अङ्गीक्रियन्ते। तानि प्रत्यक्ष-अनुमान-उपमान-शब्दादीनि । मीमांसादर्शने तु षट् प्रमाणानि प्रतिपाद्यन्ते । तच्च पूर्वमेव चर्चितम् । मीमांसायाः प्रमाणपद्धतिं वेदान्तदर्शनमपि स्वीकरोति । तस्माद् दर्शनशास्त्रेषु (विशेषतः यं सम्प्रति इपिस्टोमोलोजी इति कथयन्ति) कुमारिलभट्टस्य योगदानमद्वितीयमस्ति । अनेन ज्ञानमीमांसीयविषये यावच्चिन्तनं विहितं तदुपरि इदानीं यावत् नान्येन केनापि अधिकं चिन्तितम् । पाश्चात्यास्तु कुमारिलापेक्षया शङ्कराचार्यप्रतिपादितोऽयं विषय इति ज्ञातवन्तः । शङ्कराचार्योऽद्वैतवेदान्ती, पाश्चात्यास्तु 'मोनोथेयिस्टिक' धर्मवादिनः । अतः कतिपयविषयसम्बद्धसंरचनायां खलु एकरूपत्वादेव तेषां कृते तादृशविषयो बोधगम्यो भवति ।

पौराणिकास्तु ऐतिह्यं सम्भवञ्चेति प्रमाणद्वयं स्वीकुर्वन्ति। ऐतिह्यं नाम इतिहासविषयकं प्रमाणं तच्च अस्मिन् वृक्षे यक्षो वर्तत इति श्रवणानन्तरं गच्छता कालेन सर्वेषां वृक्षेऽस्मिन् यक्षो वर्तत इति जायमानं पारम्परिकं ज्ञानम् । सम्भवो नाम शते पञ्चाशत् सम्भवतीति ज्ञानस्य कारणम् । दार्शनिकदृष्ट्या विचार्यते चेत् प्रमाणविज्ञाने ये ये अवयवा आवश्यका भवन्ति, तद्दृष्ट्या विस्तृतचिन्तनं

मीमांसाशास्त्रं विहाय दर्शनान्तरेषु न प्राप्यते । अतः विकसितप्रमाणपद्धतिः मीमांसाशास्त्रस्य प्रमाणपद्धतिरेवेति । मीमांसाशब्देन पूर्वोत्तरमीमांसा ग्राह्या । मीमांसासम्बद्धप्रमाणविज्ञाने प्रत्यक्षम् (पर्सेप्सन), अनुमानम् (इन्फेरेन्स), शब्दः (वर्ड), उपमानम् (कम्प्यारिजन, एनालोजी वा), अर्थापत्तिः (पोस्टुलेसन), अनुपलब्धिः (नन् पर्सेप्सन) चेति षट् प्रमाणानि समागच्छन्ति । एतानि षट् प्रमाणानि स्वीकुर्वतां दार्शनिकानां या पद्धतिः, सा प्रमाणविज्ञानस्य (इपिस्टिमोलोजि-इत्यस्य) सर्वापेक्षया विकसितं सिद्धान्तं प्रतिपादयति ।

प्रमाणं ह्येकः पक्षः । प्रमाणेन कथं ज्ञानं प्राप्तुं शक्यत इत्युक्तम् । परन्तु ज्ञानं कस्य ? इति विषयेऽपि बहुचिन्तनं विहितं शास्त्रेषु । यथा सरलतया ज्ञातव्यञ्चेत् - हे ! पुत्र ! बहिः मा गच्छ । किमर्थम् ? प्रेतात्मा आगच्छति । इदानीं प्रेतात्मा अस्ति न वा ? प्रेतात्मा नाम किम् ? इति महान्तः सैद्धान्तिकप्रश्नाः खलु । यः प्रत्यक्षमेकमेव प्रमाणं स्वीकरोति, तस्य कृते प्रत्यक्षन्तु तद् नास्ति । एवञ्च सः वदति यत्- प्रेतात्मा न भवति । अयञ्चान्धविश्वास एव । संसारे प्रेतात्मा न भवतीति वदन्तो बहवो जनाः तद्विषये बहु कार्यं कृतवन्तः । तेषु प्रायशो जनाः प्रेतात्मा एव कार्यं करोतीति मन्वानाः आसन् परं शरीरे उत्पन्नविकृतीनां कारणेनैव तथा प्रतीतिरिति बोध्यम् । यथा विरुद्धभोजनम् । विरुद्धभोजनं साकमेव न ग्राह्यमिति विषय आगतः । कुत्रचिद् दृष्टिसमस्या भवति । यथा मरुभूमौ जायमानो दृष्टिभ्रमः (मिराज) इव कालान्तरेऽपि तादृशभ्रमो यथावदेव तिष्ठति । कतिपयविषया मानसरोगसम्बद्धा भवन्तीति निश्चितम् । परन्तु कतिपयजनाः प्रेतात्मनः प्रभावादारोग्यं नाभूदिति धिया औषधपद्धतिमपि स्वीकुर्वन्ति । अस्माकं समाजे धामीझंक्रीप्रयोगपद्धतिरपि वर्तते । इयं पद्धतिः अन्धविश्वासयुतेति अस्माकं परम्परां तिरस्कृत्य पाश्चात्त्यदेशेन 'सामानिजम' इति पद्धतिरवलम्बिता । तामेव पद्धतिं सम्प्रति पाश्चात्त्यचिकित्सालये स्वीकृत्य कार्यं कुर्वन्तः सन्तीति अस्माभिः श्रुतं वर्तते ।

तत्र कीदृशः स्तरोऽस्ति, उत नास्तीति विषये कथम्भूता मान्यता स्वीकर्तव्येत्यनेन वैभिन्यं लक्षयति । यथा नदीनां स्वाभाविकप्रवाहस्य इतस्ततः परिवर्तनं विधाय विकासपरियोजना सम्पादनीयेति विचारः भारतदेशे समायातः, तद्वद् नेपालेऽपि कालीगण्डकीनद्याः स्वाभाविकमार्गं परिच्छिद्य परियोजनानिर्माणमिति नाम्ना नदीप्रवाहः तिनाउनद्यां योजनीय इति विचारः समायातः । अनेन को

लाभः ? हानिश्च का ? इत्यत्रापि जनानां मतभेदो दरीदृश्यते। एवमेव निजगढनगरे विमानस्थलनिर्माणनाम्नि सहस्रशः वृक्षाः नाशमुपगच्छन्ति। किं वृक्षकर्तनं समीचीनं न वा ? इत्यत्र तर्कयन्ति जनाः - विकासः कर्तव्यश्चेद् वृक्षविनशनमावश्यकमेव, नोचेत् कथं विकासः सम्भवेदित्येकः पक्षः। एवमेव विकासनाम्नि तथा न कर्तव्यमित्यपरः पक्षः। केचन जीवनयापने सौविध्यं भवति, राज्यस्य कृते करे वृद्धिरपि जायत इति विवदन्ति। अतः मतवैभिन्यं स्पष्टमेव दरीदृश्यते। पूर्वत एव कृषियोग्यक्षेत्रे नद्याः जलप्रवाहः नेयः। तेन कृषकजीवनं सहजतया चलति। तत्र कीयन्तः जनाः स्युः, ये सहस्रवर्षेभ्यः प्रश्रवणक्षेत्रस्य कारणात् समस्यासत्त्वेऽपि यथाकथञ्चन जीवनं यापयन्तो विद्यन्त इत्यस्माभिर्न ज्ञायते। तेषां यथा सौविध्यं भवेत्तथा दृष्टिः परिवर्तनीया वा न ? कश्चन विकासनाम्नि अन्यमनस्कः स्यात्। त्वयि नैतिकता एव नास्तीति वदेत्। अतः एतादृशविषयेऽस्माभिः किं दृश्यते चेद्यस्य कस्यापि विचारस्य, यस्याः कस्या अपि परिघटनायाः व्याख्यानं कथं करोति जनः ? कथञ्च पश्यति ? इत्यत्र भिन्ना दृष्टिः प्रतीयते। तादृशभिन्नता तस्य दार्शनिकचिन्तने, दृष्टे, सिद्धान्ते चाश्रिता भवति। विषयमिमं सर्वे जानन्तीत्यपि न। यः कोऽपि यादृशं विश्लेषणं करोति, तच्च अमुकदर्शनस्यानुयायित्वेन कृतवान् इति निश्चप्रचं न भवत्येव। तादृशविश्लेषणं सहजबुद्धिवदपि भवितुं शक्नोति। कतिपयरोगाणां वैद्युततरङ्गप्रदानेन विनाशः सम्भवति, तद्वद् वैचारिकतरङ्गप्रदानेनापि व्यक्तेः परिवर्तनं सम्भवति। विशेषतो नेपालसदृशदेशानां सन्दर्भे वैचारिकतरङ्गस्यावश्यकता नूनमेव दरीदृश्यते।

अयञ्च विचारः कस्मिन् सन्दर्भ आगतश्चेत् प्रमेयत्वेन किं स्वीकार्यमिति विषये। यदि कश्चन पदार्थवादी अस्ति, तर्हि सर्वेऽपि विषयाः पदार्थदृष्ट्यैव विचारणीयाः। यदि च चेतनावादी स्यात्तर्हि चेतनादृष्ट्यैव विचारणीयास्ते विषयाः.। पौरस्त्यचिन्तने पदार्थचेतनयोः द्वैविध्येन चिन्तनावसरो न स्यादेवेति तादृशी समस्या नास्ति। यथा कुमारिलभट्टेन पञ्च विषयाः प्रमेयत्वेन गृहीताः वर्तन्ते, अर्थाद् दृश्यमानमिदं जगद् अदृश्यमानञ्च जगत् पञ्चधा विभक्तमस्ति। प्रथमं प्रमेयं द्रव्यम्। द्वितीयं प्रमेयं सामान्यम्। तृतीयं प्रमेयं गुणः। चतुर्थं प्रमेयं कर्म। पञ्चमं प्रमेयमभाव इति। आङ्ग्लभाषायां द्रव्यन्नाम 'सब्स्टान्स' उत 'इनटाइटि' इत्युच्यते। जातिः उत सामान्यन्नाम 'जनरा', 'क्लास' इति वा। पाश्चात्त्ये जगति अपि एतद्विषये बहु चर्चितम्। प्लेटोमहोदयेन क्याटनेस-क्याटाख्ययोः तत्त्वयोर्विश्लेषणं विहितम्।

क्याटनेसतत्त्वं ज्ञायते चेत् क्याटाख्यतत्त्वमपि ज्ञायते। ततो गुणस्य कृते समानार्थिनः क्वालिटी, पेकुलियारिटी, एट्रिब्युट, प्रोपर्टी वेति शब्दाः प्रयोक्तुं शक्यन्ते। कर्मणः कृते 'एक्सन' इति शब्दप्रयोगे सामान्यार्थ एवाभिव्यज्यते। अतः कर्मणोऽर्थः व्यापको वर्तते। अनन्तरं कर्मणो व्याख्यानमागच्छति। अभाव इत्युक्ते 'नन-एग्जिस्टेन्स' अथवा 'नन-पर्सेप्सन' इति बोध्यम्। एत एव प्रमेयपदवाच्याः। अनेनैव सर्वमिदं जगत् ज्ञातुं प्रभवामो वयम्।

शब्दस्यार्थेन सन्दर्भेन च किं ज्ञाप्यते, तद् विचारणीयं भवति। कुमारिलभट्टाचार्येण एकादशद्रव्याणि प्रतिपादितानि। तानि च पृथ्वी-जल-तेज-वायु-आकाश-तमस्-काल-दिक्-आत्म-मनस्-शब्दाश्च। पृथ्वीजलतेजोवायूवाकाशादीनि पञ्च महाभूतानीति। अयञ्च विषय आधुनिकभौतिकशास्त्रस्य शब्दागारदृष्ट्या तु न तोलनीयः। अस्य गाम्भीर्यं सुमहद् वर्तते। अतः पञ्च महाभौतिकानि आधार भूतद्रव्याणि। एतदाधारे दृश्यमानं जगद् बोद्धुं शक्नुमः।

इतोऽपि सूक्ष्मतया विचार्यते चेत् उद्दालकारुणीः, तस्य पुत्रः श्वेतकेतुश्चोभाभ्यां कया रीत्या प्रयोगस्य पर्यवेक्षणस्य च पद्धतिरवलम्बिता ? इत्यत्र 'एटम-प्रोटोन-इलोक्ट्रोन-पोजिट्रोन-न्युट्रिनो' इत्यादीनां विद्यमानत्वेऽपि तदनुसन्धानं हिग्स-बोसोन-पार्टिकलपर्यन्तं जातम्। तथैव यावत्पर्यन्तं प्राप्तव्यं वस्तु न प्राप्यते, तावत्पर्यन्तं नेति नेति, चरैवेति चरैवेतिमाध्यमेनान्वेष्टव्यमिति पद्धतिरपि वर्तते। वैशेषिकदर्शने तु कणादो विशेषपदार्थं स्वीकरोति। अतस्तस्य दर्शनस्य नाम वैशेषिकं सञ्जातम्। साम्प्रतिक-एटमिकथ्योरी (पद्धति)तः समीपवर्तिसिद्धान्तस्तत्र प्रतिपादित इति विषयो चिन्तनीयः। परन्तु पौरस्त्ये जगदिदम् आधिभौतिक-आधिदैविक-आध्यात्मिकयुतमपि स्वीकृतं विद्यते। शरीरस्यापि स्थूलशरीरं सूक्ष्मशरीरं कारणशरीरञ्चेति भेदत्रयं प्रतिपादितम्। अस्मात् कारणात् पञ्चमहाभौतिकद्रव्यातिरिक्तं तमस्-काल-दिक्-आत्म-मनस्-शब्दा अपि द्रव्यत्वेन योजिताः कुमारिलभट्टेनेति।

शब्दविचारः खलु अस्माकं दर्शनशास्त्रेषु पौनःपुन्येन आगच्छति। शब्दस्तावत् प्रमाणत्वेन प्रमेयत्वेन च प्रतिपाद्यते। अस्य कारणन्तु शब्दस्य स्वतन्त्रतया अस्तित्वमप्यस्ति, शब्दस्य ज्ञानसाधनत्वमपि वर्तत इति मन्तव्यम्। यथा प्रकाशः स्वमपि प्रकाशयति, अन्यान् अपि प्रकाशयति। प्रकाशस्तावत् अतिसूक्ष्मपदार्थो विद्यते। कतिपयविषयान् वयं द्रष्टुं दर्शयितुञ्च न शक्नुमः, तादृशविषयाः पदार्था

वापि एकादशद्रव्यान्तर्गता भवन्ति । एवमेव जातिर्नाम सर्ववस्तुनिष्ठः कश्चन सामान्यगुणः । आधुनिकविज्ञानस्याध्ययनेऽपि सर्वप्रथमं सामान्यगुणज्ञाने सति तदाधारे विशेषगुणज्ञानं जायते, अर्थादेकस्य गजस्य ज्ञाने संसारे विद्यमाना अन्येऽपि गजाः तत्समाना एवेति । तत्र प्रथमं ज्ञातः गजः, कालान्तरे ज्ञातश्च गज एक एव न, अपितु समान एवेत्याकारकप्रतीतिः तत्र जायते । एकस्य मनुष्यस्य ज्ञाने संसारे विद्यमानानां सर्वमनुष्याणां ज्ञानं भवति न वा ? इति प्रश्ने सामान्यतः अयं मनुष्य इति ज्ञानानन्तरं कालान्तरे तादृशपिण्डदर्शनेन अयमपि मनुष्य इति ज्ञानन्तु जायत एव । हस्तपादादिभिः तेषु समानाकारप्रतीतिः नूनमेव स्वीकर्तव्या भवत्यपि मनुष्यभेदस्तु नान्येन केनापि खण्डयितुं शक्यते । यद्यपि संसारे सप्तवृन्द(सप्तशतकोटि)संख्याकाः अष्टवृन्दसंख्याकाः वा मानवाः वर्तन्ते । तेषु केषामपि अङ्गुलिचिह्नमेकाकारं न भवति । मुखाकारसादृश्यं कतिपयजनानां मिलतीत्यपि उच्यते कैश्चित् । तत्रापि वस्तुतः सादृश्यं नैव प्रतीयते । यथा कम्युनिष्टः, काङ्ग्रेसः, राष्ट्रवादी, धनिको वेत्युच्यते यदा, तदा तेषु कश्चन गुणः परिकल्प्यतेऽस्माभिः । तदाधारे सर्वविषयाणां निर्णयं कर्तुं प्रयतमानाश्च भवामो वयम् । तादृशगुणस्य परिच्छेदः कर्तव्य इत्ययं विषयो महत्त्वपूर्णः खलु । अतः दार्शनिकैः जातिर्हि प्रमेयान्तर्गता इति प्रतिपाद्यते ।

गुणस्य प्रसङ्गे तु चतुर्विंशतिगुणान् प्रतिपादयन्ति दार्शनिकाः । रूप-रस-गन्ध-स्पर्श-सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्व-अपरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःख-इच्छा-द्वेष-प्रयत्न -धर्म-अधर्म-संस्काराः चतुर्विंशतिः गुणा अत्र ज्ञातुं शक्यन्ते । एकन्तावत् अनुभाव्यं भवति, अपरञ्च अननुभाव्यमिति । कतिपयविषया हि अनुभूतिकोटिं तत्रापि विशेषतः निदिध्यासनकोटिमप्राप्य न ज्ञायन्ते । एतच्च कदाचिद् व्यावहारिककारणेन कदाचिच्च जिज्ञासोदयेनापि ज्ञातव्यं भवति ।

तादृशविषयज्ञानं हि कथम् ? इत्यत्र प्राचीनकथासु प्रसङ्ग समायाति यत्- द्वौ सुहृदौ गुरुकुलेऽध्ययनानन्तरं स्नातकस्तरमुत्तीर्णौ । दीक्षान्तसमारोहोऽपि सम्पन्नः । ततः गृहं प्रति आगच्छन्तौ आस्ताम् । गृहं गच्छन्तौ तौ मार्गे एकं पशुमपश्यताम् । तादृशपशुः पूर्वं कदाचिदपि ताभ्यां न दृष्टः । न वा गुरुकुलाध्ययनकाले ज्ञातपशुसदृशः पुरोवर्तिपशुरासीत् । इदानीमयं पिण्डः कः ? इति द्वयोः चर्चाविषयः सञ्जातः । तदा एकोऽवदत् यत्- पश्यतु, अस्य एवंभूताः चत्वारः पादाः, पुच्छम्, शरीरे रोमाणि

अपि सन्ति । अस्य सर्वेऽपि गुणाः मूषकवत् समानाः । अतः मूषकः स्यात्, परन्तु मूषकः लघुः भवति, अयं च महान् अस्ति । अयं मूषकः अधिकभोजनेन स्थूलशरीरयुतः जातस्स्यादित्यपि भवितुं शक्नोति । अपरः सुहृदवदत् यत्- नैव, मूषकस्य स्थूलत्वे कश्चन नियमः स्यात् । एतादृशस्थूलशरीरेण तु न भाव्यम् । अयं च स्थूलशरीरयुंतो न मूषकः, अपितु गजः । सर्वेऽप्यस्य गुणाः गजसमानाः खलु । अस्य मुखं गजंस्येव दीर्घं नास्तीत्येवान्तरम् । कृशत्वेनास्य मुखमपि लघु जातम्, आकारोऽपि लघुः, अथापि पुरोवर्त्ययं जीवः मूषक एवेति । एवंरीत्या उभयोर्मध्ये विवादः जातः । इदमित्थमिति निश्चयाभावेन तं पशुं नीत्वा तौ गतवन्तौ ।

ग्रामं यदा प्राप्तवन्तौ तदा ग्रामिणः जनाः एतौ द्वौ कौ ? तादृशः पशुश्च कीदृशः ? इति वार्तालापं कुर्वन्त आसन् । यदा समीपं गतवन्तौ तदा ग्रामवासिनः कोलाहलं कुर्वाणाः हस्ते दण्डं चादाय अस्माकं ग्रामे किमर्थं शूकर आनीतः ? इति वदन्तः कुपितवन्तः । एतदनन्तरमेव तौ ज्ञातवन्तौ यदयं पशुः शूकरोऽस्तीति । अतः पुस्तकपठनमात्रेण सर्वं न ज्ञायते, तत्र बुद्धिप्रयोगोऽपि विधेयः । अन्यथा कूपमण्डूक इव जडसूत्रवादीव भवामश्चेत् निरर्थकमेव । अतस्तत्र गतिः आवश्यकी । गतिप्रक्रियासु ज्ञानस्य, बुद्धेः, सूचनायाश्च महत्त्वं व्यापकं भवति । तदपि दर्शनशास्त्रेषु बहुधा चर्चितम् । वस्तुतः यथार्थज्ञानस्यैव प्रमात्वम् । तादृशप्रमाज्ञानस्य कारणं साधनं वा प्रमाणं भवतीत्यपि प्रतिपादितं दर्शनशास्त्रेषु । प्रमेयन्नाम प्रमाणेन ज्ञातव्यविषयः । प्रमायाः संशये तज्ज्ञानं न प्रामाणिकम् । अतो निश्चितज्ञानमेव प्रामाणिकं ज्ञानं वर्तते । प्रमायां भ्रमो न भवति, संशयोऽपि न भवति, अपितु यथार्थबोधो जायते । दर्शनेषु दार्शनिकाः ज्ञानस्य स्वानुकूलपरिभाषां कृतवन्तः । सम्प्रति मीमांसादर्शनदृष्ट्या चर्चां कुर्मः । नैकविधशास्त्राणि पश्यामश्चेत्तत्र ज्ञानं मूलतः दोषरहितं भवतीति मान्यता वर्तते । दोषः खलु ज्ञानावाप्तये प्रयुक्तप्रमाणपद्धतौ स्थातुं शक्नोति । साधनस्य ज्ञातुर्वा दौर्बल्यात् दोषः समायाति । तन्निरोधसामर्थ्यसम्पादनेनैव पूर्णतया ज्ञानं प्राप्तुं शक्नुमः । युरोपदेशेऽपि एतद्विषये बहुशः चर्चा जाता यत् पूर्णतः ज्ञानप्राप्तिः सम्भवति न वा ? सम्भवति चेदपि ईश्वरानुकम्पया वा स्वीयतर्कबुद्ध्या ? एतादृशनिष्कर्षानन्तरमेव पाश्चात्त्ये एनलाइटमेन्ट एज आगतमिति स्वीक्रियते । तत्रैव आधुनिकविज्ञानस्याधारः पर्यवस्यति च ।

ज्ञानस्यापि प्रत्यक्षत्वम्, परोक्षत्वं वेति विभागो विद्यते । प्रत्यक्षं तावत्

आत्मनः मनसा, मनसः इन्द्रियेण, इन्द्रियस्य च पदार्थेन सह सन्निकर्षानन्तरमेव जायते । यथा- एकः चषकः वर्तते । तादृशचषकदर्शनाय इन्द्रियम्(नेत्रम्)अस्ति । परं नेत्रस्यापि नियन्तृत्वेन मनः वर्तते । मनसः नेत्रस्य च सन्निकर्षानन्तरम् इन्द्रियस्य पदार्थस्य (चषकस्य) च सन्निकर्षो जायते । ततः तत्र कस्यचन दोषस्याभावे एव चषकज्ञानमुत्पद्यते । तत्र प्रकाशोऽपि आवश्यकः । अस्माकं पौरस्त्यचिन्तने आध्यात्मिकस्तरं यावत् गन्तव्यमतः मनः अपि अन्तिमं सत्यं नास्ति । आत्मा तु व्यापकः । मनसा सह आत्मा सन्निकृष्टः । मनः इन्द्रियेण सह । इन्द्रियं पदार्थेन सह सन्निकृष्टो भवति । तदनन्तरमेव ज्ञानं समुत्पद्यते । परोक्षज्ञानं तु पदार्थोऽग्रे नास्ति चेदपि अनुमान-शब्द-उपमान-अर्थापत्ति-अनुपलब्धिद्वारा जायते । ज्ञेयवस्तुनोऽपि त्रयोऽवयवाः सन्ति ।

प्रथमोऽवयवो यथा- यत्र भोगः क्रियते । स च भोगः ज्ञानघटितशरीरे । शरीराभावे भोगोऽपि न स्यात् । अस्माकं शरीरं हि भोगायतनम्, यत्र भोगः क्रियते । शरीरे विद्यमानस्सन् आत्मा सुखं दुःखं चानुभवति ।

द्वितीयोऽवयवो यथा- भोगसाधनमिति । यथा किञ्चन भोजनं मधुरं किञ्चन भोजनं तद्विपरीतं भवति । सुगन्धस्य, दुर्गन्धस्य, आम्लस्य, तिक्तस्य, मधुरस्य, लवणस्य, मसृणस्य, उष्णस्य, शैत्यस्य, मधुरस्वरस्य, मृदुगीतस्य च ज्ञानायेन्द्रियाणि आवश्यकानि भवन्ति । अतः एतानीन्द्रियाणि भोगसाधनानि । इन्द्रियैः भोगः क्रियते । इन्द्रियाणि पुनः शरीर एव, तथापि इन्द्रियाणां भूमिका भिन्नैव वर्तते । शरीरं भोगायतनम्, इन्द्रियाणि तु भोगस्य साधनानीति । यदि मनसः नियामकत्वे इन्द्रियाणि न तिष्ठेयुः तर्हि तत्कारणं वासना तृष्णा वा भवति । वासना तावत्प्रबला भवति यत् सा वासनेन्द्रियलिप्सया बुद्धिं जयति । नानाविधकार्यक्रमेषु भोजनमधिकं निर्मीयते, अनन्तरं तस्य पूर्णतया प्रयोगः न भवति । स्थालिकायामानीतं भोजनं बहु भवति । अल्पेनैवान्नेन उदारपूरणं जायते । अवशिष्टान्नं त्यज्यते च । अतः प्रारम्भ एव अल्पम् अन्नं ग्राह्यम् । संसारे बहवः जनास्तादृशाः सन्ति, भोजनाय अन्नं न प्राप्नुवन्ति । नानाविधप्रविधिविकासमाध्यमेन अन्नवितरणप्रक्रिया समीचीना स्यात्तर्हि केऽपि भोजनाभावे मृताः न स्युः । राज्यस्य व्यापारिणश्च समुचितव्यवस्थाभावाद्, लोभात्, पुँजीवादसिद्धान्तस्य समाजवादसिद्धान्तस्य च कारणेन वा कुत्रचिदन्नस्याधिक्यं कुत्रचिच्च न्यूनता दरीदृश्यते । समस्येयमिदानीं

यावत् तथैव दृश्यते, परन्तु यावत्पर्यन्तं इन्द्रियाणि वशीकर्तुं मनः असमर्थम्, तावत्पर्यन्तं एवमेव चलति । महार्घवस्त्रधारणेन किं मनः सर्वदा तुष्यति ? अहं सर्वविषयान् उपभुज्य सन्तुष्टो जात इति को वा वदेत् ? एतादृशभणितिः केनापि श्रुता वा ? नैव । अत्यधिकधनार्जनेन को वा सन्तुष्टः स्यात् ? न कोऽपि खलु । पुनरपि सः धनार्जनाय प्रवर्तत एव । तत्र अन्यस्मै किञ्चित्परिमितं धनं दद्यात् । तथापि इतोऽपि धनार्जनाय प्रवृत्तिः लोके दृश्यत एव । इदानीन्तनसमये सामाजिकसञ्जालादिषु स्वस्य प्रचाराय किं न कुर्युः जनाः ? एतत्सर्वमिन्द्रियनियमनासामर्थ्यादेव भवति । यः इन्द्रियाणि मनसा, मनः आत्मना च नियमयितुं समर्थः, सः वस्तुतः सन्मार्गे एवं गच्छति ।

तृतीयोऽवयवो यथा- भोग्यो विषयः पदार्थो वा, यस्य भोगः क्रियते । यानम्, भोजनम्, गृहञ्चेत्यादयः इन्द्रियाणां भोग्यविषयाः, भोगश्च शरीरे भवति । एते विषयाः प्रमाणे संलग्ना भवन्ति । वस्तुतो ज्ञेयो विषयः प्रमेय एव । उपभोगोऽपि तस्यैव । व्यावहारिकतायाः पद्धतिरपि सैव । विकसनम्, दैनिकी व्यावहारिकता चापि पदार्थानां भोगेन सह सम्बद्धा भवति । अन्यरीत्या पश्यामश्चेद् धर्म-अर्थ-काम-मोक्षेषु प्रायः अर्थकामयोरेव प्रयोगः दृश्यते । अर्थो नाम भौतिकवस्तु । तस्य प्रयोगः कथं विधेय इति कथनं कामोऽस्ति । यदि अर्थकामयोः धर्मानुसारित्वे तयोः अन्तिमपरिणतिः मोक्षोऽस्ति । अस्मादेव कारणात् प्रमाणचर्चायाः महत्त्वं व्यापकं स्वीक्रियते । यस्यां कस्यामपि पद्धतौ दर्शनशास्त्रपद्धतिमजानन् पुरुषः अनुसन्धेयविषयान् प्राप्तुं न शक्नोति । दर्शनशास्त्रेषु विषयाणां विस्तृततया चर्चा विधीयते । यथा मीमांसासूत्रस्यादिमं सूत्रं वर्तते- अथातो धर्मजिज्ञासा । अनेन सूत्रेण धर्मं बोधयति । द्वितीयं सूत्रं वर्तते- चोदनालक्षणोऽर्थो धर्मः इति सूत्रं पूर्वमुक्तमेव । अमुमेव विषयं स्पष्टयितुं एतत्संख्याकानि प्रमाणानि, एतत्संख्याकानि प्रमेयाणि भवन्तीति प्रतिपाद्यते । वेदान्तेऽपि अथातो ब्रह्मजिज्ञासा इत्यस्येयमेव कथा वर्तते ।

कार्लमार्क्ससिद्धान्तस्य सारस्तु समाजदृष्ट्या विचार्यते चेत् 'हिस्टोरिकल-म्याटरियलिजम' इत्यतः सङ्गृहीतः । अथवा सृष्टिदृष्ट्या दृश्यते चेत् 'डायलेक्टिकल-म्याटरियलिजम' इत्युक्तम् । तदनन्तरं चर्चा, परिचर्चा, खण्डनम्, मण्डनं च विहितं वर्तते । संसारस्य विषयान् अन्विष्य लेखनशीलवतः कार्लमार्क्सस्य विषये प्रसिद्धकथनं विद्यते यत्- अनेन अधिकांशसमयः पुस्तकालय एव व्यतीतः । सामान्यजनः वदति

यत्-सैद्धान्तिकवार्तया किं भवति ? सिद्धान्तो नाम वायौ उड्डीयमानविषयः । व्यवहारस्तु तदन्य इति निश्चिनोति, परन्तु विज्ञानं ज्ञातवन्तः जनास्तु सिद्धान्तापेक्षया व्यावहारिकविचारः महत्त्वपूर्ण इति प्रवदन्ति । तदतिरिक्तं संसारे न किञ्चिदपि विद्यते । सिद्धान्तद्वारा सहस्रशः व्यवहाराणां व्याख्यानं भवति, दिग्दर्शनं च भवति । अतोऽमूर्त इव, अपूर्ण इव वा दृश्यते । परन्तु व्यवहारः सिद्धान्तापेक्षया नातिदूरं भवति । यावत्पर्यन्तं साङ्गोपाङ्गरूपेण व्यवहारो न विश्लिष्यते, तावत्पर्यन्तं सिद्धान्तज्ञानं न जायते । एतदर्थं प्रमाणप्रमेययोः ज्ञानमावश्यकं भवति । इदानीं व्यवहारे विद्यमानपरम्परानुसारं यः कश्चन मह्यं एकघण्टापरिमितं तण्डुलं ददातु इति वदति चेत् असमीचीनमेतद् वाक्यम् । यतो हि घण्टा न समयस्य मापिका । एवमेव एककिलोपरिमितसमयं यावत् कार्यं करोमीति यः वदति, तदपि असमीचीनं वाक्यम् । व्यवस्था तु मानवेन समाजेन वा निर्मिता । तथापि प्रमाणप्रमेययोः सङ्गतिः अनिवार्या । कियत्परिमितः तण्डुलः, वस्त्रञ्च कियत्परिमितमावश्यकमित्यत्र स्पष्टतया वक्तव्यम् । केवलं तण्डुलं ददातु इति कथनेन एककिलोपरिमिततण्डुलो देयो वा तण्डुलकणमात्रं देयं वा स्यूतपरिमिततण्डुलो देयो वेत्यव्यवस्था स्यात् । अतस्स्पष्टं वक्तव्यं भवति । तदर्थमेव प्रमाणस्यावश्यकता । प्रमाणं विना न प्रमेयबोधः । मीमांसापद्धतौ प्रमाणानां प्रत्यक्षादिभेदेन षड्विधत्वं प्रतिपादितं विद्यते ।

प्रत्यक्षं किम् ? इति प्रश्ने इन्द्रियस्य वस्तुनश्च सन्निकर्षेणोत्पद्यमानं ज्ञानमेव । सन्निकर्षो नाम कश्चन सम्बन्धः । स च सम्बन्धः इन्द्रियानुसारेण निश्चीयते । यथा त्वगिन्द्रियस्य सन्निकर्षेण स्पर्शः, उष्णत्वं च ज्ञायते । कदाचित् उपकरणस्यापि आवश्यकतानुभूयते । तथाहि पूर्वं स्पर्शद्वारा ज्वर आगत इति ज्ञायते, ज्वरस्तु कति ? इत्यत्र पुनः मापनयन्त्रस्य प्रयोगो विधेयः । प्रत्यक्षेऽपि उपकरणमाध्यमेन सरलतया ज्ञातुं शक्यते । तदपि इन्द्रियस्यैवाधारे भवति । इन्द्रियद्वारा सदैव यथार्थज्ञानं जायत इत्यत्र नास्ति कश्चन नियमः । कदाचित् अयथार्थज्ञानमपि जायते । सत् सम्प्रयोगे इत्युच्यते संस्कृते । अर्थात् उपयुक्तसमये उपयुक्तज्ञानमावश्यकम् । कदाचिद् भोजनं समीचीनमिव दृश्यते, परमहितकारि भवति । पञ्चेन्द्रियाणि एव आधारभूतप्रमाणानि । प्रमाणेषु सर्वोत्कृष्टं प्रमाणं प्रत्यक्षम् । प्रत्यक्षं प्रमाणानां राजा इत्यपि वक्तुं शक्यते । इतिहासे सर्वश्रेष्ठो व्यक्तिः राजा भवति स्म । स्वस्थानीग्रन्थे गजदत्तमालाधारणेन नवराजः राजाऽभूत् । द्रव्यशाहः धावनेन श्रेष्ठत्वं प्राप्नोत् । कुत्रचिन्मल्लयुद्धं जातं

भवेत् । कुत्रचिच्च धनुषयुद्धं जातं भवेत् । तथापि तत्समये यः श्रेष्ठः, स एव राजा स्वीक्रियते स्म । तथैव प्रत्यक्षप्रमाणमपि प्रमाणानां राजा स्वीकृतो वर्तते ।

पञ्चभिः ज्ञानेन्द्रियैः जायमानं ज्ञानं तावत् नेत्राभ्यां दर्शनेन, कर्णाभ्यां श्रवणेन, जिह्वया रसग्रहणेन, नासिकया गन्धग्रहणेन, त्वचा स्पर्शेण चोत्पद्यते । परन्तु यदेन्द्रियमाध्यमेन ज्ञानं न जायते, तदा अनुमानेन भवति । अनुमानेन ज्ञानं न जायते, तदा उपमानशब्दादिप्रमाणेन भवति । एवंरीत्या प्रमाणानां बाहुल्यं दरीदृश्यते। अज्ञानेन भ्रमेण च ज्ञाननिरोधो जायते । दर्शनशास्त्रमाध्यमेन जगदिदं किम् ? जीवनञ्च किम् ? इति ज्ञातव्यम् । तत एव समाजः कः ? प्रगतिश्च का ? प्रगतिरपि सञ्चितिवादसम्बद्धा वा मार्क्सवादसम्बद्धा वा स्थितिगत्यात्मकप्रगतिवादसम्बद्धा वा ? इति ज्ञातुं प्रभवामो वयम् । पूर्वं कुष्ठरोगग्रस्तः मनुष्यः हेयो भवति स्म । भोजनशयनादिव्यवस्थापि गोष्ठे क्रियते स्म । तत्समये तन्निवारकौषधव्यवस्थापि नासीदेव । गच्छता कालेन स्वास्थ्यविज्ञानेन तद्रोगनिवारकौषधं निर्मितम् । रोगकारणस्यान्वेषणं कृतम् । तथैव कस्मिँश्चित्समये क्षयरोगस्य (टिबि) प्रकोपोऽपि महान् आसीत् । तस्यापि कारणमन्विष्यौषधं निर्मितम् । कर्करोगस्य तु इदानीं यावदनुसन्धानं प्रचलद् वर्तते । पौरस्त्यचिन्तने विद्यमानामुपवासपद्धतिं स्वीकृत्य रोगनिरोधः कर्तुं शक्यत इति विचारा अपि सम्प्रत्यागच्छन्तः सन्ति । निरन्तरं जायमानया प्रगत्या सफलताप्राप्तिः भवेदेव ।

यत्र प्रत्यक्षप्रमाणेनाप्राप्तज्ञानस्य कृते प्रमाणान्तरं स्वीकर्तव्यमेव । परमद्यतनसमये प्रविधिविकासस्य कारणादज्ञातस्य ज्ञानं सम्भवति चेदिदमपि ज्ञानं प्रत्यक्षविषयो भवितुं शक्नोति । प्राक्तनशास्त्रेषु वर्णितविषयापेक्षया साम्प्रतिकानुसन्धानं विषयान्तरं स्पष्टयति चेत्, तदङ्गीकर्तव्यमेव । नोचेत्, कूपमण्डूक इव, जडसूत्रवादीव भवति । जियोनार्डोब्रुनोमहाभागः जीवन्नेव कुतो दग्धः ? पोपमहोदयेन जीवन्तं तं मारयितुं किमर्थमादेशो दत्तः ? इत्यत्रोच्यते- पोपमहोदयेन पठितपुस्तके विद्यमानविषयापेक्षया ब्रुनोमहोदयेन प्रतिपादितो विषयोऽन्य एवासीदिति । क्षमां याच इत्युक्तेऽपि सः क्षमां न याचितवान् । अत एव मारितः सः । यः प्रत्यक्षप्रमाणेन सिद्धं विषयं न स्वीकरोति, सः स्थितिमात्रं स्वीकरोतीति मन्तव्यम् । सः न स्थितिगत्यात्मकः । स्वानुभवः एकत्र, सर्वानुभवश्चैकत्रेत्याकारकः तर्कोऽपि असमीचिनः । व्यवहारेणापि न दृश्यते चेत्, कूपमण्डूक एव । परन्तु स्थितिगत्यात्मकप्रगतिवादे पूर्वतः किं प्रचलद्

वर्तत इति ज्ञानसत्त्वेऽपि अद्यपर्यन्तं प्राप्तज्ञानस्याधारे, प्रमाणस्याधारे इदमित्थमिति वक्तव्यम्। एवंरीत्या पश्यामश्चेद् मीमांसादर्शने कुमारिलभट्टप्रतिपादितायाः पद्धतेः इदानीन्तनविज्ञानेन सह कश्चिदपि विरोधो नास्ति। एतदेव पाश्चात्त्यैः 'इम्पिरिसिजम' इत्युक्तम्, यत्र सर्वमागन्तुं शक्नोति।

प्रत्यक्षप्रमाणस्य यावत् क्षेत्रं वर्तते, तत्र प्रत्यक्षप्रमाणमेव प्रवर्तते। यत्र प्रत्यक्षप्रमाणेन असम्भवस्तत्र प्रमाणान्तरं प्रवर्तते। यः कश्चिद् विषयः पञ्चशतवर्षेभ्यः पूर्वं प्रत्यक्षविषय आसीत्, परमिदानीं नास्ति चेदपि शास्त्रप्रमाणैः सः प्रत्यक्षप्रमाणस्य विषयीभवति चेत् तादृशविषयो मीमांसादर्शनानुसारं प्रत्यक्षप्रमाणस्य क्षेत्रं भवति। अतस्तत्र प्रत्यक्षप्रमाणमेव बलवद् भवति। अस्माकं दर्शने आस्था तावती तर्कानुग्राहिका वर्तते यत्- संसारे वैज्ञानिकानां परीक्षणेनापि अयं विषयः प्रमाणितो भवतीत्यत्र वैदिकमतानुयायी विश्वासं धत्ते। प्रमाणिताभावेऽपि तत्र प्रत्यक्षप्रमाणस्वीकारेण न कापि हानिः। कुत ? पाश्चात्त्ये मध्यपूर्वीयदेशे च विश्वासस्य प्राधान्यं स्वीकृत्य प्रचलिता पद्धतिरिवास्माकं देशे तथा नास्ति। आस्थयापि तर्कानुग्राहकत्वेन भाव्यम्। भक्तिमार्गं स्वीकृत्य प्रवर्तमानाः जनाः तर्को न कर्तव्यः ? स च नरकं प्रापयतीति कथयन्ति। तच्च न वैदिकमतम्। वैदिकमार्गे तु तर्कस्य प्राधान्यं विद्यत एव। तर्ककरणे इन्द्रियाणां सत्सम्प्रयोगः कर्तव्यः। वितण्डया न भाव्यम्। तादृशप्रयोगेन मनसः आत्मनश्च यथार्थज्ञानवता आप्तपुरुषेण कृतस्तर्कः निष्कर्षं प्रापयति। तत्र निश्चयं विना केऽपि विषयाः न ग्राह्याः।

भगवतो बुद्धस्य प्रद्धतिरपि इयमेव। 'अप्प दीपो भव' इत्यस्याशयः स्वप्रकाशाय स्वेनैव परीक्षणीयम्, स्वेनैव अनुभवो विधेय इति। प्रतिपादनशैली भिन्ना स्यात्। प्रसङ्गोऽपि वर्तते यत् तव परिवारः श्मशानघट्टपर्यन्तम्, शरीरमपि चितापर्यन्तमेवेति। परिवारे सम्यङ्मेलनसत्त्वे समीचीनम्, नोचेत् चितायां पितृशर ीरस्य दाहकाले एव भ्रातरः पित्र्यंशविभजने कोलाहलं कुर्वन्तः दृश्यन्ते। त्वत्कृतं सत्कर्म एव धर्मः। स च सदैव त्वत्पार्श्वे एव तिष्ठति। एतस्याशयस्तु व्यक्तेः कर्मफलं स्वीकृतं वर्तत इति। मोक्षः कदापि समूहे न भवति। धर्मे कतिपयविषयाः वैयक्तिकाः, सामूहिकाः, संस्थागताश्च सन्ति। अर्थोपार्जनम् एकेन न भवति। सामूहिकमाध्यमेन तु किञ्चित् सारल्यं भवेत्। उपभोगोऽपि वैयक्तिकः सामूहिकश्च। परन्तु मोक्षस्तु केवलं वैयक्तिक एव, अर्थात् मोक्षप्राप्तिः एकाकिनैव सम्भवति। सामूहिकप्रयत्नेन न

मोक्षप्राप्तिः। आन्दोलनं कोलाहलं वा कृत्वा न कदापि मोक्षपाप्तिः। तदर्थं साधना विधेया। बुद्धस्य कथनमपि एतदेव। वैदिकानामृषीणां कथनाभिप्रायोऽपि अयमेव। महावीरस्याशयोऽपि तथैव। पाश्चात्त्या विशिष्टदार्शनिका अपि तथैव वदन्ति।

कैश्चिज्जनैः कार्लमार्क्सप्रभृतिभिरेव सामूहिकोत्थानं कर्तुं शक्यत इत्युच्यते। आर्थिकक्षेत्रे सामूहिकोत्थानवार्ता तु समीचीना स्यादपि तेन समाजवादसाम्यवादयोः प्राप्तिस्तु न सम्भवतीति बहुत्रानुभूतं दृष्टञ्चेति। जनाः इदानीं यावत् कतिपयस्थलेषु भ्रमयुताः सन्ति। नेपालदेशेऽपि तादृशमनुष्याः बहवः विद्यन्ते। काङ्ग्रेसो वा भवेत् कम्युनिष्टो वा भवेदन्ये ये केऽपि भवेयुः, सर्वेऽपि मूलतः मार्क्सवादत एवं समागताः। अतस्सर्वे समानप्रकृतिका इति ज्ञातव्यम्। व्यवहारे दृश्यते यत्- अमुकदलस्य नाम्ना स्वीयोदरपूरणार्थमेव जनानां खलु प्रवृत्तिर्दृश्यते। त एव पुनस्साम्यवादस्य प्रवचनं कुर्वन्ति। अत एते सन्देहमनाः भ्रमयुता वेति प्रतीयते। अप्पदीपो भव इत्यस्यायमेवाशयः। एकस्यैव विषयस्य प्रत्यक्षदर्शनं बहूनां युगपदेव जायते, अथापि तत्र एकस्य दर्शनं स्वेन्द्रियेणैव, अन्यस्यापि दर्शनं स्वेन्द्रियेणैव भवति। अन्यं प्रति बोधयितुं शब्दस्य प्रयोगो भवति। तस्मात् प्रमाणपद्धतौ प्रत्यक्षप्रमाणस्य केन्द्रीकरणमूलं हि व्यावहारिकतास्ति।

अद्यतनलोकतन्त्रं तन्न। लोकतन्त्रन्नाम सामूहिकता, सङ्ख्या वास्ति। बृहत्संख्या केन जनसमुदायेन कोऽपि विचारः सत्य इत्युच्यते चेत्, तत्सत्यमेव। तस्मादेकस्मिन् कारागरे कस्यचन प्रमाणितस्यापराधिनः, दण्डार्थं सज्जीकृतस्यापराधिनः, राष्ट्रसम्मानितव्यक्तेः, ज्ञानवतः पुरुषस्य च मतदानाधिकारः समान एव। सर्वेषां मूल्यमौचित्यं वा समानमेवेति। तत्र केवलं संख्याया एव महत्त्वं न तु गुणानामिति। इयं प्रक्रिया अप्प दीपो भव इति न, अपितु सामूहिकप्रक्रियाऽस्ति। एकेन मापनेन दृश्यते चेत् तादृशप्रगतेः विकासस्य च स्थानमेकत्र स्यादपि आसंसारमद्य सुखम्, प्रसन्नता च कुत्र विद्यते? कथञ्च समायाति? तच्च समाजवादतः पुँजीवादतश्च नागच्छतीति निष्कर्षः गतप्रकरणे प्रस्तुतः। तत्पृथक्त्वं तैः न ज्ञातम्। तस्य कारणन्तु सुखं वा सुखी वा सर्वदा व्यक्तिस्तरे भवतः। परस्परं तयोरन्तःसम्बन्धविधिरपि नूनमेव वर्तते। भोगायतनं हि प्रत्येकं व्यक्तेः स्वशरीरमेव। भोगकर्तृकेन्द्रियाण्यपि भिन्नानि भिन्नानि सन्ति। अथाप्यत्र समाधानं सामूहिकत्वेनेष्टम्। सामूहिकत्वमपि लक्षेषु कोटिषु च युगपदेवेष्टम्। एतद्धि

प्रत्यक्षप्रमाणातीतम्। जैमिनिमुनिना प्रोक्तं यत्- यो विषयः प्रत्यक्षप्रमाणक्षेत्रस्यान्तः नास्ति चेत्तस्य कृते प्रमाणान्तराण्यपि सन्तीति। तेषु सर्वोत्कृष्टं शब्दप्रमाणमेव। तच्च श्रुतिप्रमाणमपि। धर्मः खलु आधिभौतिक-आधिदैविक-आध्यात्मिकजीवनस्य नियामकः। तथाभूतो धर्मः कः ? इति केवलमिन्द्रियेण ज्ञातुं निश्चेतुं वा न शक्यते।

तस्मात् कारणाद् धर्मः न प्रत्यक्षप्रमाणमात्रविषयः। अनुमानतोऽनुपलब्धिपर्यन्तप्रमाणविषयोऽपि न। तज्ज्ञानाय शब्दप्रमाणं श्रुतिप्रमाणं वा चिन्तनीयमिति। एतत्कथनेन विज्ञानेन सह विरोधः कुतो न ? इत्यत्र स्पष्टतयोक्तं यत्- यद्यन्वेषणं विधाय कस्यापि विषयस्य प्रत्यक्षप्रमाणेनैव ज्ञानं सम्भवति, तर्हि शब्दप्रमाणपर्यन्तं चिन्तनावसरो नास्ति। अनेनैव समाजः किमिच्छतीत्यस्योत्तरमपि प्राप्तं भवति। तादृशोत्तरमन्वेष्टुम् इदानीं यावदुपलब्धानि यानि साधनानि, उपकरणानि, प्रविध्यादीनि साधनान्तराणि च प्रयुज्येरन्। सम्प्रति थ्रिडी-प्रिन्टिङ-एआई-ब्लकचेनादयो बहवः प्रविधय आगच्छन्तस्सन्ति। ते च तर्कानुग्राह्याः स्युः। प्रत्यक्षप्रमाणस्य प्राधान्यात् भविष्यत्कालीनपरिवर्तनस्य कृते प्रमाणमिदं तत्परो वर्तते। यज्ज्ञानं प्रत्यक्षतः न सम्भवति, तत्रानुसन्धातृभिः अनुमानप्रयोगः क्रियताम्। शब्दप्रमाणप्रयोगः क्रियताम्। तथा सति ज्ञानपरम्परायां स्थितिगत्यात्मकता दृश्यते। एकत्र 'जरो' इत्यनेनापि अविच्छिन्नत्वमस्ति, अन्यच्च ज्ञानार्थं खलु तदन्तोऽपि प्रवेष्टुं शक्यते। यथा 'फर्सी'इत्याख्यव्यजनं मूलस्य(जरो)परितः परिभ्रमति चेत् न फलति। तस्य लता इतस्ततः प्रसरति चेत् सम्यक्तया फलति। परन्तु तल्लता ३००मिटरपरिमितं क्षेत्रं व्याप्नोत्यपि मूलकर्तने सति सर्वं नश्यति। एतस्याशयस्तु मूल(जरो)स्य विच्छिन्नत्वे तत्र विकृतिः समुत्पद्यत इति।

एतादृशचिन्तनपद्धतेः, 'डाइलेक्टिकल-म्याटेरियलिजम'सम्बद्धायाः (एकस्य नाशानन्तरमन्यस्य सृष्टिः) पद्धतेश्च मूलं भिन्नमस्ति। अत्र चिन्तनपद्धतिः भिन्नैवानुभूयते। यथा दुग्धाद् दधि कथं जायते ? इत्यत्र वेदान्तिनः दुग्धस्य रूपान्तरणाद् दधि जातमिति वदन्ति। मार्क्सवादिनः नेगेसनसिद्धान्ताधारेण दुग्धध्वंसे जाते दधि भवतीति वदन्ति। सामान्यतो वयं दुग्धध्वंससत्त्वेऽपि तदभावेऽपि दधि जातमेवेति वदेम। एतच्चिन्तनं पद्धतेः भिन्नत्वेनोपतिष्ठते। मार्क्सचिन्तनपद्धतौ यावत्पर्यन्तमेकस्य ध्वंसो न, तावत्पर्यन्तमन्यस्य सृष्टिर्नेत्येवं मनसि विद्यमानत्वात् पूर्वपक्षं प्रति घृणा, द्वेषः, अथ च 'एक्सक्ल्युसिभिटी' स्यादिति चिन्तनं दृश्यते।

नियमोऽयं न केवलं दुग्धे दध्नि च, अपितु समाजेऽपि प्रवर्तते । विषयमिममज्ञात्वा वर्तमानसमये नेतारः समाजपरिवर्तनं विहाय वर्गशत्रूणामुद्धारायैव प्रयतन्ते । तेषां निष्कर्षोऽपि तथैव । तेषां शिक्षणमपि तदेवास्ति । ध्वंसो विधेय इत्येव जानन्ति ते। अज्ञानकारणादेव एवं भवति। ज्ञाने सति तद्विचारः परित्यज्यते च। अस्माकं देशस्य परिस्थितिमवलोकयामश्चेत् वि.पी.कोइरालामेकः समूहः महामानवं मनुते । स च कोइरालाः अन्ताराष्ट्रियसमुदायेऽपि परिचितो जनः । व्यक्तित्वमपि तस्य सम्यगेव। तथाभूतोऽयं कोइरालाः कदाचित् सशस्त्रसङ्घर्षमवदत्, कदाचिच्च सत्याग्रहमवदत्। कुतः तस्मिन् वैचारिकी स्थिरता नासीत् ? अस्मासु केचन गान्धीवादिनः स्याम इति त्वन्यो विषयः । गान्धीः स्पष्टमवोचत् यत्- अहिंसा मदीया प्राथमिकी अन्तिमा च मान्यता वर्तते । किञ्च माओमहाभागमुदाहृत्योच्यते "पावर कम्स फ्रम द ब्यारेल अफ द गन" इति । किं सत्यं किञ्चासत्यमिति तु स्वकीयस्थान एव वर्तते । केषाञ्चन कृते माओ समीचीनस्स्यात्, केषाञ्चन गान्धीः समीचीनः स्यात्, परं वयन्तु स्थितिगत्यात्मकप्रगतिवादिनः, सहृदयतादर्शनवादिनश्च । यथाकथञ्चनापि राज्यसत्ता अस्माकं वशे भवेदिति कम्युनिष्टजनानां चिन्तनवैशिष्ट्यं वर्तते । प्रतिगमनमेवादर्शरूपमासीदिति उक्त्वा वर्तेरन् जनाः । सत्तामोहेन एकस्यैव व्यक्तेः देवत्वेन राक्षसत्वेन च प्रचारः भवेन्नाम। निष्कर्षतः सत्ता आवश्यकी एव। तादृशी मान्यता अनैतिकीति वदेम । कश्चन सत्यमेतदित्यपि वदेत् । तद्भिन्ना कथा । परमस्माकं मार्गः स्पष्ट एव। अस्मद्देशे यत् कपूतन्त्रं वर्तते, तच्च न कम्युनिज्मः न वा पुँजीवादः । तद्धि उभयोः विषाक्तमिश्रणपरिणामोऽस्ति । तस्मात् एते कदा किं कुर्वन्तीति किमपि न ज्ञायते । एक एव व्यक्तिरेकस्मिन् दिने मन्दिरं गत्वा भणति यन्मन्दिरं संरक्षणीम्। अन्यस्मिन् दिने स एव मालपोताभिधं कार्यालयं गत्वा मन्दिरस्य कर्गजपत्राणि स्वानुकूलं कारयित्वा मन्दिरस्य भुवं क्षेत्रं वा लुण्ठयति। दर्शनशास्त्रेषु एतादृशविषयाः निन्दिताः सन्ति ।

सारतः अस्माकमिन्द्रियस्य, मनसः, आत्मनश्च सन्निकर्षेण प्रत्यक्षसाधनानि च प्रयुज्य जायमानं ज्ञानमेव प्रधानमस्ति । तादृशं ज्ञानमावश्यकम् । तदेव पर्याप्तमिति न मन्तव्यम् । पर्याप्तं चेत् प्रमाणान्तरप्रवृत्तेः का कथा ? । एकस्मिन् समये प्रत्यक्षप्रमाणस्य विषयीभूताभावविषयस्यापि समयान्तरे तस्यैव विषयो भवितुं शक्नोति । यथा कृष्णरन्ध्रस्य साक्षात् चित्रन्तु नास्त्येव । तथापि तच्चित्रमेतादृशं

स्यादिति कल्पनया चित्रं निर्मीयते । हिग्स-बोसन-पार्टिकलपर्यन्तं प्रमाणं प्राप्नोत् । रेजोनेन्सपर्यन्तमन्वेषणं कर्तुं शक्यते वेति विचारोऽपि क्रियमाणो वर्तते । पूर्वं खलु इलोक्ट्रोनस्यापि अन्वेषणं नासीत् । एतेन एकस्मिन् युगेऽविद्यमानस्य वस्तुनो युगान्तरे अस्तित्वं भवितुं शक्नोति । अस्माभिरज्ञातविषयाणाम्, ज्ञातानामपि आस्थाविहीनां विषयाणां प्रत्यक्षप्रमाणगम्यत्वं भवितुं शक्नोति । तच्च प्रत्यक्षप्रमाणे आगतं स्यादपि कूपमण्डूकैः तन्न स्वीक्रियतेऽस्माभिरित्युच्यते । कूपमण्डूकास्तु सर्वत्र भवितुं शक्नुवन्ति । ते हि इसाईधर्मावलम्बिनः मुस्लिमधर्मावलम्बिनश्चैव भवन्ति, हिन्दूधर्मावलम्बिनो न भवन्तीति न । तादृशारोपस्तु मिथ्यैव । कूपमण्डूकास्तु सर्वत्र भवन्ति । कः कीदृशो वर्तते ? इति तु व्यक्तेः वार्ता । इदानीं केनापि कारणेन शरीरे कर्करोगः आपतितश्चेत् शल्यक्रियामाध्यमेन औषधप्रयोगेण वा तन्निराक्रियते । विज्ञानबुद्धिप्रयोगेण विकसितप्रविध्याधारे प्राप्तज्ञानात् कश्चन नूतनविचारोऽस्माभिः प्राप्यते चेत् तज्ज्ञानस्वीकरणं धर्मस्य विवेक एवास्ति ।

यदि धर्मविषये कस्मिँश्चित् पुस्तके पूर्वमेव यल्लिखितं तदेव कूपमण्डूकत्वेन जडसूत्रवादित्वेन धर्मं स्वीकरोमीति यो मनुते, तर्हि अस्मासु, मार्क्समहोदयस्य सिद्धान्तेषु, नेपालदेशस्य समास्यानिराकरणाय प्रवर्तमानेषु कम्युनिष्टजनेषु च का भिन्नता ? कदाचित् नेपालस्य विषये पूर्णतयाध्ययनमकृत्वैव बिपीकोइरालानेत्रा कश्चन विचारः प्रस्तुत आसीत्, तादृशविचारानुयायिषु काङ्ग्रेसजनेषु अस्मासु च का भिन्नता ? किं वा जियोनार्डोब्रुनोमहोदयं मारयितुं प्रवृत्ते पोपमहोदये अस्मासु च का भिन्नता ? किञ्च जिहादी-क्रुसेडीमानसिकपक्षतः का भिन्नता ? कपूतन्त्रतोऽपि का भिन्नता ? इत्येतादृशविषये अस्माभिः स्वात्मानमेव प्रष्टव्यम् । तादृशप्रश्ने कृत एव स्थितिगत्यात्मकस्य प्रारम्भो जात इति मन्तव्यम् । प्रश्नकरणेनास्माकं सर्वे विचारा असमीचीना इत्यपि न ज्ञेयम् । इयं प्रक्रिया विज्ञानबुद्धिग्राहिका इत्येव तात्पर्यम् । यथा आरुणी-उद्दालकपरीक्षणम् । पाश्चात्त्ये मिटेलल्सस्थेन थेल्समहोदयेन यथा कृतम् । कान्टमहोदयेन च 'डेर टु नो' इत्युक्तम् । नित्सेमहोदयेन दिन एव दीपं प्रज्वाल्य बाइबलग्रन्थे प्रतिपादित ईश्वरः कुत्र वर्तते ? मया तु न दृश्यते । किं वेश्वर आसीदेव न, स्याच्चेदपि मृत इत्युक्तम् । अल्पहृदयवता जनेनेतादृशं चिन्तनं कर्तुं शक्यते वा ? अत एतादृशचिन्तनं ध्येयमस्माभिः । अत्रापत्तिप्रदर्शनस्य नावसरः । यद्यापत्तिः, सा तु अन्धास्थावतां जनानाम् । तत्र प्रहारे

कृते सति सः क्रुद्धो भवति। सर्वप्रथमं जिज्ञासायुतेन भाव्यम्, ततः संस्कारयुतस्सन् साधनाप्रवृत्यर्थं प्रयतनीयमित्येव स्थितिगत्यामकस्य परिचयः। वैज्ञानिकसत्ययुगस्य कृते आधारशिलाचतुष्टयं स्वीकर्तव्यम्। विज्ञानस्य बुद्धिः, प्रविधेः प्रगतिः, धर्मस्य विवेकः, सहृदयतायाः सम्बन्धश्चेति आधारशिलाचतुष्टयं वर्तते। आधारशिलाचतुष्टयमेव समाजस्य मार्गनिर्देशनसन्दर्भे स्थितिगत्यात्मकः प्रगतिवादो वर्तते। एतस्य सारस्तु जीवनस्य जगतश्च यथार्थान्वेषणमेवास्ति। यथा एकेन तण्डुलेनोदनमपि निर्मातुं शक्यते, खट्टेपदवाच्यमपि निर्मातुं शक्यते, भुजापदवाच्यं इत्यपि निर्मातुं शक्यते, रोटिकाऽपि निर्मातुं शक्यते। तथैव 'सिद्धान्तगतपथा सुखमिच्छामो वयम्। मोक्षकथनस्य निर्वाणकथनस्य चाभिप्रायो वस्तुतः सुखान्वेषणमेवास्ति। स्थितिगत्यात्मकप्रगतिवादतोऽपि वयं जिज्ञासाप्रवृत्तेः जागरणं कृत्वा चिन्तयामः। चिन्तनं विधाय व्यवहारे तस्य प्रयोगानन्तरमेव तद् दर्शनं भवति। पाश्चात्त्यदर्शने कस्यापि विषयस्य केवलं चिन्तनं मननं परिचर्चा च क्रियते चेदपि कार्यं चलति, परन्तु दर्शनं यदापि व्यवहार-प्रयोग-अभ्यास-आचरणैस्सह सम्बद्धो भवति। तादृशाचरणनिर्दिष्टदृष्टिकोणः, मान्यता, ज्ञानञ्च स्थितिगत्यात्मकसम्बद्धं भवति। प्रमाणप्रसङ्गे प्रत्यक्षप्रमाणं स्वभावतः स्थितिगत्यात्मकोऽस्ति। विश्वस्य कस्माच्चन स्थानविशेषात् समायातमान्यता इदानीन्तनविचित्रसंसारबोधिका स्यादपि सुखं प्रसन्नतां च प्रदानाय अक्षमेति मानवजगतो निष्कर्षः। सुखस्य प्रसन्नतायाश्च मार्गोऽस्माकं पार्श्वे विद्यते। एतादृशात्मविश्वासस्य कारणाद् **वसुधैव कुटुम्बकम्** इत्यस्य सामीप्येनात्मीयतया वा सम्पूर्णविश्वस्य कल्याणं सम्भवति। समयस्य गत्या साकं संस्कारितास्सन्तः साधनां कुर्वन्तश्च आधिभौतिक-आधिदैविक-आध्यात्मिककोटिं यावत् गन्तव्यमिति स्थितिगत्यात्मकप्रगतिवादस्योद्देश्यं विद्यते। प्रमाणस्य प्रमेयस्य च सातत्यपरकं निरूपणं हि स्थितिगत्यात्मकप्रगतिवादस्य मौलिकी विशेषता वर्तत इति दिक्।

तृतीयं प्रवचनम्

प्रतिमानरूपेण स्थितिगत्यात्मकप्रगतिवादः

विश्वशिवन् विश्वे सम्प्रति प्रचलितेषु विचारेष्वेकः स्थितिगत्यात्मकप्रगतिवादः । अस्य च दार्शनिकः, सामाजिकः, अधिकमात्रायां राजनीतिक आर्थिकश्च आयामो वर्तते । पशुपतिनाथमन्दिरे व्यवस्थितरूपेण पूजाराधनेऽर्चनञ्च चलन्त्वित्युद्दिश्यास्माकं पूर्वजैः मन्दिराय भूमिं दत्वैतदर्थमेव च गुठीसंस्थायाः व्यवस्था विहिताऽसीत् । सम्प्रति अहमहमिकया विकृतिं सम्प्राप्य मन्दिरे दुर्बलं व्यवस्थापनं दृश्यते । तत्र ईशाइधर्मावलम्बिनां प्रार्थनागृहञ्च निर्मितमस्तीति च समाचारः श्रूयमाणो वर्तते । अस्माकं प्रतिवेशिराष्ट्रे भारते तिरूपतिबालाजीनाम्ना प्रख्याते श्रीवेंकटेशमन्दिरेऽन्येषु बहुषु समृद्धमन्दिरेषु चार्पिता दानदक्षिणाः सर्वकारेण गृहीत्वा मस्जिदमदरसादिभ्यः प्रार्थनास्थलविद्यालयादिभ्यः प्रदीयन्ते ! नेपाले त्वस्माभिर्दृष्टमेव हि सर्वाण्यपि सर्वकारीयसंयन्त्राणि प्रधानमन्त्री, सभामुखः, प्रतिपक्षिदलस्य नेतारः, पूर्वप्रधानमन्त्रिणश्च कोरियादेशे केन्द्रितस्य होली-वाइन-क्रिश्चियनधर्मगुरोः समक्षं पूर्णतः समर्पिता अभूवन् । सर्वकारः, सत्तारुढदलानि, प्रतिपक्षिदलानि च सर्वाण्यपि नतमस्तकान्यवर्तन्त । विश्वपरिवेशे तु सम्प्रत्येव महत्त्वपूर्णाः घटनाः विकसिताः सन्ति ।

किञ्चित्पूर्वमेव समीपवर्तिनि चीनदेशे ऐसयिक-सभ्यता-संवाद-सम्मेलनमायोजितम् । यत्र च कम्बोडिया-ग्रीस-सिङ्गापुर-श्रीलङ्का-आर्मेनिया-मङ्गोलियादिदेशेभ्यः राज्यप्रमुखाणाम्, सर्वकारप्रमुखाणाञ्चोपस्थितिरासीत् ।

युनेस्कोसदृशानां संस्थानां सक्रियसहभागिताऽवर्तत। चीनदेशीयराष्ट्रपतिना सि चिनफिङ इत्यनेन उद्घाटिते तस्मिन् सम्मेलने विभिन्नदेश-जाति-सभ्यतासु प्रबलरूपेण सहकार्याय बलं प्रदत्तमासीत्। तदवसरे राष्ट्रपतिः सी हिमालयनादीभिः सम्पृक्तायाः ऐसयिकसभ्यतायाः प्रसङ्गमुत्थाप्यमानो ऐसयिकसभ्यतायाः सुदृढं पक्षमचर्चयत्। क्रमेऽस्मिन् चीनदेशस्य एल्लो-याङ्से-टिग्रोसएगोलानदीनां सिन्धु-गङ्गादिनदीनाञ्च प्रसङ्ग आगत आसीत्। वैदिकवाङ्मयस्य, अङ्कोरवाटमन्दिरपरिसरस्य, ग्रेटवालनाम्ना प्रथितस्य महाप्राकारस्य, प्राचीनमुद्रणप्रविधेः, अङ्कप्रणाल्याश्च विषयेषु परिचर्चा सम्भूता। वस्तुतः वैदिकगणनापद्धतिरियम्। युरोपमहादेशीयैः पद्धतेरस्याः ज्ञानकाले युरोपवैदिकानां मध्ये ज्ञानस्यादानप्रदानं अरबदेशीयजनानां माध्यमेन भवति स्म इत्यतः पद्धतिरियं अरबिकपद्धतिः हिन्दू-अरबिकपद्धतिर्वा कथ्यते। सर्वासां सभ्यतानां स्वस्यैव मूल्यमान्यताः भवन्ति, ऐसयिकराष्ट्रैः सम्पदां संरक्षणाय किं विधीयमानमस्तीति च चर्चयतात्र कार्ये चीनदेशेन सहयोगायेच्छा व्यक्तासीत्।

नेपालस्तु किल सृष्टौ पावनयोगभूमिः, वेदभूमिः, आयुर्वेदभूमिश्चास्ते। अयं हि हिमवत्खण्डस्यैव केन्द्रमस्ति। कतिचिद्वर्षेभ्यः पूर्वं टर्कीसर्वकारस्य प्रमुखेणान्ताराष्ट्रियसम्मेलन एव नेपाल आध्यात्मिककेन्द्रमस्तीति निगदितमासीत्। एवंरीत्या नेपालस्य चर्चा न क्रियते प्रायः अन्ताराष्ट्रियसम्मेलनेषु। नेपालेनापि सभ्यतायाः प्रसङ्ग एवं स्वामित्वग्रहणं कृतं न दृश्यते। परमुत्तरदिशः प्रतिवेशिराष्ट्रस्य प्रमुखः सि चिनफिङ स्वस्य सभ्यतायाः, संस्कृतेः, इतिहासस्य च समुचितवेत्ता व्यक्तिरस्ति, दक्षिणप्रतिवेशिराष्ट्रस्य सर्वकारप्रमुखः नरेन्द्रमोदी च स्वस्य सभ्यतायाः महत्त्वं जानीते।

परन्त्वत्र विडम्वना नेपालस्य सभ्यतासंस्कृतिपरम्पराः प्रति भाषणेन प्रतिबद्धता व्यक्ता सत्यप्यवसरं दृष्ट्वा करपट्टिकावादनं विहाय संस्कृतेः संरक्षणाय केऽपि पदाधिकारिणः तत्पराः न दृश्यन्ते। अस्याः महत्त्वमात्मसात्कृताः न सन्ति, व्यक्तिगतजीवने अवलम्बनं त्वन्या वार्ता! घोषितरूपेणात्मानं नास्तिकम्, वामपन्थिनम्, सञ्चितिवादिनम्, समाजवादिनञ्च मन्वानो जनाः सन्त्येव। धार्मिकाश्च जनाः स्खलिताः दृश्यन्ते। हिन्दवः, बौद्धाः, जैनाः, किराँतधर्मावलम्बिनो ये च स्वधर्मपालकाः स्वसंस्कृतिपालकाः सन्ति ते अवश्यं प्रशस्याः। नेपालः वैदिकसभ्यतायाः केन्द्रभूमिरस्तीति गौरवमस्माभिः न ज्ञातं परं ऐसयिकसभ्यतासम्मेलनमेवायोज्य

प्रतिवेशिराष्ट्रस्य राष्ट्रप्रमुखेन स्वामित्वग्रहणस्यावस्थाऽस्ति। अस्माकं राज्यसञ्चालकाः विराड्महत्त्वस्य उत्तराधिकारवहनाय सक्षमा न सन्तीति स्पष्टं वर्तते।

वर्तमानपरिवेशे सांस्कृतिकसम्पदां संरक्षणाय चीनदेशेन एसियामहादेशे विश्वस्मिन् विश्वे च अतिरिक्तं सुमहद् योगदानं विधास्यते इत्यपेक्षिणो जनाः दृष्टाः सन्ति। सहैव सभ्यताः सङ्कुचितपरिधितः बहिः निसृत्य परस्परं सम्पर्केण जीवत्यः भवन्तीति निश्चिन्वानोऽपि दृश्यन्ते। चीनजापानदेशीयसभ्यताः अतिप्राचीनाः सत्योऽपि ताः प्रवृत्तयः असहकारिण्यः, आनुवंशिकवंशजातीयशुद्धतायाः आग्रहिण्यश्चासन्। अस्माकं तु वैदिकवाङ्मस्य ब्राह्मणग्रन्थेषु समन्वयकारिणी, जातीयतायाः, वंशस्याधारेण असङ्कुचिता, उदारा, अविवदनशीला च संस्कृतिः प्राप्यते। सम्प्रति समन्वयो विधीयते, सम्वादः क्रियत इति चीनदेशीयराष्ट्रपतेः कथनं स्वागतयोग्यं वर्तते। अस्माभिः राज्यराष्ट्रसिद्धान्तस्य, सहृदयतादर्शनस्य, स्थितिगत्यात्मकप्रगतिवादस्य च माध्यमेन अग्रेसारितानां मान्यतानां सन्मुखाः ते जायमानाः सन्ति।

सभ्यतासु युगानुसारेण विकासः, प्राचीनतायां नवीनता, दीर्घकालिकार्षणञ्चेत्येतैः सह सभ्यतानाम् आदानप्रदानस्य पारस्परिकाध्ययनस्य अनिवार्यता दृष्टा। ऐसयिकसभ्यतायाः पुनरुत्थाने इदमावश्यकं वर्तते। चीनदेशोऽपि सी चिनफिङ इत्यस्य नेतृत्वे सांस्कृतिकजागरणं प्रति उन्मुखो वर्तते। माओ इत्यस्य नेतृत्वे जातायां क्रान्त्यां चीनदेशीयसंस्कृतौ सम्भूता क्षतिः घातिकाऽऽसीत्। डेङ्ग सिओपिङ्ग इत्यस्य समये आर्थिककारणं प्रदर्श्य तस्य मार्गं परित्यज्य अग्रेगमनस्य पश्चाद् माओ इत्यस्य समये सम्प्रति चित्रमेव यथावदस्ति, व्यावहारिकमान्यतायाः सान्दर्भिकता नास्ति। तत्र माओत्सेतुङ अद्यत्वे चित्रे एव सीमितोऽस्ति न तु विचारे। सि चिन फिङ इत्यनेन प्रारम्भे कन्फुसियस इति दर्शने अधिकं बलं प्रदत्तं दृष्टम्, परम् अतः परं चीनदेशस्य मार्गनिर्देशकः सम्पूर्णैसयिकस्वामित्वस्य वैदिकसभ्यतैव वर्तते। तत्रापि विशेषतः बौद्धजैनज्ञानपद्धती स्तः। संस्कृतस्य ज्ञानायापि प्रत्यक्षमभिरूचिः दृष्टास्ति। सांस्कृतिकक्रान्तेर्नाम्नि विहितः घृणितो व्यवहारः वामदलस्य नेतृत्वेन पापरूपं मत्वा त्यक्तोस्ति, अद्यत्वे कन्फुसियससिद्धान्ताद् अग्रे प्रवर्ध्य सनातनवैदिकसभ्यतायाः अन्तर्गतानि दर्शनानि, बौद्धजैनादिज्ञानपद्धतीश्च अधीत्य नवीनयुगस्य सूत्राधारो भवितुं प्रयासः विधीयमानो वर्तते। अतः परं तेभ्यः तत्रत्यां राज्यव्यवस्थां

सञ्चालयितुम्, तत्रत्येभ्यः मञ्चु-उइगुर-तिब्बतीय-हङकङाद्यल्पसङ्ख्यकेभ्यः स्वामित्वबोधं कारयितुं राज्यराष्ट्रसिद्धान्तः अपरिहार्यो वर्तते ।

अस्माकं दक्षिणप्रतिवेशिन्यपि कतिचिद् विशिष्टपरिवर्तनानि अनुभूयमानानि सन्ति । सैद्धान्तिकरीत्या विषयोऽयं महत्त्वपूर्णो वर्तते । धर्मस्य सार्वभौमिकतां धर्मनिरपेक्षताञ्च प्रति प्रतिकूलतया सत्तासीननेतृभिः स्पष्टं वक्तव्यं प्रदत्तमस्ति । भारतीयजनतादलस्य मातृसङ्घटनस्य राष्ट्रियस्वयंसेवकसङ्घस्य तर्कश्चासीत् वयं वस्तुतः धर्मनिरपेक्षिणः । तत्रत्यन्यायालयेनापि हिन्दूः न धर्मः अपि तु जीवनशैली जीवनपद्धतिश्च वर्तत इत्युक्त्वा व्याख्यातमासीत् । अयञ्च विषयो नेपालदृष्ट्या अत्यन्तं प्रतिकूलः । नेपालस्तु वैदिकसनातनधर्मविशिष्टो देशः, सनातनसंस्कृतेः मूलभूमिश्चास्ते । सनातधर्मावलम्बिनामविच्छिन्नता अत्र प्राप्यते । हिन्दूशब्दस्य व्याख्या यदा कदा भौगोलिकदृष्ट्या क्रियते । अत्रापि विशेषेण सावरकरैः विहितायां हिन्दूत्वस्य व्याख्यायां भौगोलिकपक्षाय अधिकं बलं प्रदत्तं वर्तते । एवं हिन्दूत्वस्य व्याख्यया नेपालस्य आत्मा पूर्णरूपेण वोढुं न शक्यते ।

हिन्दूत्वस्य कृते वैदिकसनातन-बोन-बौद्धादिधर्माणामाशयः तथा प्रतिपादनीयो यत्र धर्मशब्द एव निर्णायको भवेत् । अस्माकं संस्कृतौ धर्मार्थकाममोक्षाणां प्राप्तिः प्रधानास्ति । अर्थकाममोक्षसाधनपद्धतिरेव धर्मोऽस्ति । वैदिक-बौद्ध-बोन-जैन-किराँतपद्धतिषु धर्मनिरपेक्षतायाः धर्मविहीनतायाश्च विषयः कदापि स्वीकार्यो न भवति । हिन्दूं धर्मपद्धतिमुक्त्वा भौगोलिकतया वंशगतेन च सह संयोज्य सम्प्रति पृथग्व्याख्या विहिता सत्यपि आदौ तु यूयमपि अस्माकं पूर्वजानामेव सन्ततयः स्थ इत्यतः वयं समानाः स्मः इत्यस्मिन् तर्के श्रुतिगोचरे माधुर्यानुभव अनुभूतः सन्नपि विषयोऽयं घातको वर्तते । अनेन रक्तसम्बन्धाय बलं प्रदत्तं वर्तते । रक्तसम्बन्धो यदि समानोऽस्ति तर्हि यस्याः कस्याः अपि विचारधारायाः भवतु, भिन्नता न भवतीति कुप्रचार क्रियते । सनातनमान्यता तु "कृण्वन्तो विश्वमार्यम्" इत्यादिवचनैः सम्पूर्णजनेभ्यः सभ्यसंस्कृताः भवितुं प्रेरयति । आनुवंशिक-जातीय-प्रजातीयरूपेण, भौगोलिकरूपेण वा यस्य कस्यचिद् स्थानस्य भवतु विचारधारया, मान्यतया, जीवनदर्शनेन, विश्वदृष्टिकोणेन च सभ्याः भवेम, गुणिनो भवेम, आर्याश्च भवेम इति तस्याशयोऽस्ति । अस्माकं पद्धत्या समन्वयात्मकरूपेण वैदिकसनातनहिन्दूधर्मेण, बौद्ध-बोन-जैन-किराँतादिमौलिकसमुदायैश्च बृहत्तररूपेण

अर्थ-सामाजिक-शिक्षा-राजनीतिकप्रणालीषु शासनप्रशासनयोश्च विश्वदृष्टिं संस्थाप्य अग्रे वर्धनम् आवश्यकं वर्तते। धर्मनिरपेक्षः अनुचितविषयोऽस्ति, विकल्पे भारतीयसंरचनायाः हिन्दूत्वं न नैपालकं भवेत्।

कतिपयजनेभ्यः एवं मन्थनमकल्पनीयं भवति। यतो हि नेपालः, नेपालिनां मनश्च विषाक्तकपूततन्त्रेण दूषिते स्तः। नेपालः दयनीयावस्थायां सन्नपि अन्तरवस्तूनां विश्लेषणेन चीनदेशीयराष्ट्रपतिः, भारतीयप्रधानमन्त्री च नेपाले अस्माभिः वर्षेभ्यः अभ्यस्तविचारधारायाः सन्निकटे स्त इति कथनम् अकल्पनीयं भवेदेव। नेपाले वामपन्थि-काङ्ग्रेस-राप्रपा-समाजवादिदलानाम्, विभिन्नपरिचयवादिदलानां वा सर्वाधिकमहत्त्वाकाङ्क्षा वैदेशिकशक्तेः विश्वासपात्रो भूत्वा सत्तायाः प्राप्तिरेवास्ति। तत्र भारतस्य चीन-अमेरिका-युरोपीयदेशानां वा भवतु, परं वयं दर्शनम्, वादम्, प्रतिमानम्, विश्वस्य प्रवृत्तिम्, प्रकृतिम्, गतिञ्चानुसन्धाय आगताः स्मः इत्यतः सुदृढाः स्यामैव। नेपालस्य क्षेत्रम्, जनसंङ्ख्याम्, अल्पाकारमर्थतन्त्रञ्च विलोक्य भयभीताः न भवामः। प्रतिवेशिभिः सह सुमधुरं सम्बन्धं वाञ्छामः, व्यक्तिगतरूपेण च सम्बन्धं स्थापयामः। देशयोः पारस्परिकं सम्बन्धं राष्ट्रियस्वार्थं विलोक्य निर्धारयिष्यामः। अयञ्च विषयः लघो महतो वा आकारस्य नास्ति, अत्र च अयमपि विचारपथम् आयाद् हस्ति महान् भवति, तस्य नियन्ता जनस्तु लघु भवति। अतो विश्वपरिवेशं नेपालस्य स्थितिञ्च विलोक्यैव नीतिः निर्मातव्या। गान्धिनः सिद्धान्तः समुदायानां कृते आसीत्। सिद्धान्तोऽयं राजनीतिकरूपेण राज्यस्य सिद्धान्तस्य च रूपेण न स्वीकर्तव्य इति बोधः सम्भवतः गान्धिने आसीदित्यतः स्वयं गान्धिनापि भारते स्वतन्त्रतायाः प्राप्तेः पश्चात् कङ्ग्रेसदलं विघटनीयमित्युक्तमासीत्। परन्तु राजनीतिकघटनाक्रमे देशस्य विभाजनादारभ्य विभिन्नाः घटनाः तत्र घटिताः। एतदर्थं गान्धिने दोषदानस्य अपेक्षयापि गान्धिनः सिद्धान्तस्य परिधिं बुद्धवा व्यवहारो विधेयः।

बुद्धस्य सिद्धान्तोऽपि मूलतः व्यक्तीनां कृते वर्तते। प्रसङ्गवशात् समाजस्य राज्यस्य वा विषयाः आगच्छेयुः परं बुद्धस्य दर्शनम्, धर्मप्रणाली च व्यक्तीनां कृत एव वर्तते। सः च कथं निर्वाणस्य प्राप्तिर्भवति एतदर्थंमस्ति। अत एव बुद्धदर्शनस्य समाजतन्त्रेण राज्यतन्त्रेण वा योजनं समीचीनं न भवति। एकविधस्य रोगस्यौषधानां अन्यत्र रोगेषु प्रयोगेण औषधानामप्रभावकारित्वे औषधानां दोषो न भवति। एतच्च

कथनमौषधानि प्रभावविहीनानि सन्तीत्यपि न । एवंरीत्या बुद्धस्य दर्शनं व्यक्ती: केन्द्रे निधाय, तासामुत्थानायागतं वर्तते । गान्धिनः दर्शनमपि भारते साम्राज्यवादिनां विदेशिविधर्मिणां दीर्घकालिकदमनस्य श्रृङ्खलायाः कारणेन बलहीनसम्भूतस्य समाजस्य जागरणायासीत् । आत्मतः एव जनानां जागरणाय शस्त्रास्त्राणि क्षणिकानि भवन्ति । शस्त्रास्त्राणामभावे वीरता न सम्भवतीति हेतोः अहिंसायाः दर्शनम् आवश्यकमासीत् । हिंसातः निर्भयो भूत्वा मनस एव वीरतायाः उद्भावनाय अहिंसायाः सिद्धान्तः आवश्यकः आसीत्, परन्तु अस्य सिद्धान्तस्य समाजे संयोजनानन्तरं हिन्दूभिरिव मुस्लिमजनैः उदारमनसा सिद्धान्तोऽयं न बुद्धः । मुस्लिमजनेष्वपि कतिपयानां जनानामनुकूलदृष्टिरासीदत्र । यथा सन्दर्भेऽस्मिन् सीमान्तगान्धिनः उदाहरणं दीयते । सम्प्रति भारते विद्यमानानां कतिपयमुस्लिमजनानां: सिद्धान्तेऽस्मिन् अनुकूला दृष्टिः सत्यपि बहुमतं नासीत् । भारतपाकिस्तानविभाजनसमये नोवाखालीप्रभृतिषु स्थानेषु लक्षशो हिन्दवो मारिताः आसन् । सर्वे समानाः इति तु अस्मत्शास्त्रीयं मतम् । समदर्शित्वदृष्टिः सर्वोत्कृष्टा । परन्तु सर्वोत्कृष्टास्तीति मत्वा कपोतः यदि वृक-श्रृङ्गाल-चित्रव्याघ्र-व्याघ्र-सिंहादिभिः सहापि समानां दृष्टिं स्थापयति चेत् नष्टः कपोतः स्यात् किल । अत्र समदर्शित्वसिद्धान्तः कार्यं न करोति ! स्वाभाविकञ्च वर्तते एतत् ! कौटिल्यस्य अर्थशास्त्रे विश्लेषिते इदं राज्यशासनाय लिखितं शास्त्रमस्ति । एतावता दर्शनानि किमर्थम्, कस्मिन् सन्दर्भे आगतानि, कुत्र च प्रयोक्तव्यानीति स्पष्टीभवनमावश्यकमस्ति ।

प्रतिवेशिदेशानां घटनाभिः नूनम् अस्माभिः पाठः शिक्षणीयः । स्थितिगत्यात्मकप्रगतिवादस्य रहस्यमत्रैव विषयेषु वर्तते । चतुर्थोद्यौगिकक्रान्त्या सहैव भारते चीनदेशे चापि अतः परम् अर्थतन्त्रंस्य नूतनसंरचनायाः अन्वेषणं विदध्यादेव, नवीनविश्वव्यवस्था आगच्छेदेव । अद्यतन-नवोदारवादिव्यवस्था सारतः सञ्चितिवादसृष्टास्ति । तत्र चीनदेशस्य अन्यदेशानां वा हस्तक्षेपस्य कारणेन किञ्चित् परिवर्तनमागतं स्यात्, परन्तु तेऽपि अत्रैव समाहितानि जायमानानि सन्ति । विश्वस्मिन् विश्वस्य नूतनपरिस्थितिः अनया व्यवस्थया बोढुं न शक्यते । सहृदयतादर्शनस्य अर्थतन्त्रस्य सिद्धान्तः निर्मीयमाणो वर्तते, अभिनिर्माणं जायमानमास्ते । सर्वेषामुचिरूपेण सम्बोधनाय राज्यराष्ट्रस्य सिद्धान्तोऽनुसर्तव्यः अनुसृज्यमानश्चास्ति। अर्थतन्त्रस्य संरचनायाः प्रसङ्गेऽपि सहृदयतादर्शनं सङ्केतरूपेण ग्रहीतुं शक्यते ।

अस्माकं औत्तरदक्षिणप्रतिवेशिद्वयस्य अभिरुचेः विषयोऽपि संस्कृतिः सभ्यता च वर्तेते। प्रसङ्गेऽस्मिन् सभ्यताः कथं जीविताः, मृताश्च भवन्ति, कथञ्च रूपं परिवर्तयन्तीति च अस्माभिः विचारणीयम् । यथा फिलिपिन्सदेशं वयं गच्छामः तर्हि तत्र फिलिपिनो वर्तन्ते एव, भाषा चावशिष्टास्ति, भूषणञ्च स्यात्, भोजनपानादिकमप्यवशिष्टं स्यात् परन्तु सारतः तत्रत्याः धर्मदर्शनसंस्कृतयः पूर्णतः परिवर्तिताः सन्ति। आधुनिकफिलिपिन्सदेशेन स्वस्य इतिहासः, गौरवम्, सम्मानश्च निर्वोढुं शक्ताः न सन्ति । अफ्रिकामहादेशेऽपि एवमुदाहरणनि बहूनि प्राप्यन्ते । चर्चितभणितिश्चास्ति - पूर्वं अस्माभिः सह भूमिः, समृद्धिः सर्वाः आसन् तेषां पार्श्वे बाइबलग्रन्थ एव आसीत्। तैः सर्वं त्यक्त्वा बाइबलग्रन्थोऽध्येतव्यः इत्युक्तम्। अद्यत्वे अस्माकं पार्श्वे बाइबलग्रन्थ एव वर्तते, तेषां पार्श्वे धन-सम्पत्-समृद्धि-भूमि-सत्ताः सर्वा अपि वर्तन्ते। एवं विपरीतं परिवर्तनमपि भवति। कदाचित् सारस्यैव अभावावस्थापि सम्भवति, कतिपयावरोहं सोढ्वा पुनः प्रखरो भूत्वा च दृश्यते।

अस्माकं प्रतिवेशिनि भारते मुगल-अङ्ग्रेजशासनबलात् समाजवादस्य नाम्नि भारतस्य सांस्कृतिकबोधस्य किञ्चिदपि अनिर्वाहणाक्षमाद् धर्मनिरपेक्षशासनाद् आयातितविचारधारातः सम्प्रति क्रमशः पुनरुत्थानं जायमानं वर्तते। अतः परमपि यदि भारतीयैः जनैः शैक्षिक-आर्थिकप्रभृतिसंरचनाः स्वानुकूलाः भावयितुं न शक्यन्ते चेत् चिराय न भवेयुः, तथापि कतिपयावस्थासु जागरणं जायमानमस्तीत्यवलोक्यते। इजरायलदेशीयानां जनानां हिब्रुभाषायाः विलोपनस्य अवस्थातः प्रत्यावर्त्य जीवन्तप्रखरराष्ट्रस्य रूपेण अग्रे आगमनमपि उदाहरणीयं वर्तते। अस्य च कारणं विचारणीयमस्ति। सम्प्रति कतिपयसभ्यताः सङ्ग्रहालेषु पुस्तकेषु एव वा सन्ति। अस्य कारणमन्वेष्टुं विभिन्नाध्ययनानि जातानि सन्ति। तत्रत्यजलवाय्वोः वातावरणे च महत् परिवर्तनमभूद् यच्च सोढुं ताः सभ्यताः असमर्थाः अभूवन्, विनष्टं गताः, जीवनं कष्टकरं भूत्वा जना विनष्टाः, मारिताः, विलोपिताः स्थानान्तरिताश्च। जरासन्धस्य भूयोभूय आक्रमणस्य पश्चाद् द्वारकादेशो गन्तव्योऽभूत् पश्चात् श्रीकृष्णस्य देहावसानानन्तरं जले एव विलयङ्गतश्च।

मिश्रदेशस्य विपूलस्तम्भराशीनां प्रयोजनं तेषां रहस्यञ्च इदानीमपि अज्ञाते स्तः। क्रमानुगतप्रक्रियया एव मानवसभ्यता विकसितेति कथनं प्राप्यते। उच्चतमो विकासः पूर्वमेव च सम्भूत आसीद्। इदानीं पुनः विकस्यमानाः सन्तीति मान्यता च

वर्तते । मान्यताः विभिन्नाः सन्ति, कतिपयसभ्यताः एवं विलोप्यमानाश्च वर्तन्ते । कतिपयसभ्यतानां पुनर्जागरणस्य कारणानि आशा, आत्मविश्वासः, आत्मीयतायाः सम्बन्धेन जनानां संयोजनञ्च सन्ति । सभ्यतायाः अनुयायिषु पुनर्जागरणस्य बोधानन्तरमवरोहादपि पुनः जागृताः भवन्ति । पश्चिमदेशे फिनिक्सनाम्नः पक्षिणः इव । इदञ्च पक्षि वृद्धावस्थायाः प्राप्तेः पश्चात् भस्म भवति, पुनः भस्मन एव जागृतस्सन् जीवतीति कथनवद् अस्माकं संस्कृतौ सत्य-त्रेता-द्वापर-कलियुगानां चक्रारपङ्क्तिरिव परिभ्रमणस्य चर्चास्ति । विषयेऽस्मिन् अस्माभिः "नेपालको पुनर्जागरणको अर्थ र आधार" नाम्नि पुस्तके चर्चितं वर्तते । यदि शासनतन्त्रम्, शासकाः, विश्वव्यवस्था च अनुकूलाः भवन्ति चेत् यस्मिन् कस्मिन्नपि समये सत्ययुगस्य प्रवर्तनं सम्भवति । पुनर्जागरणबोधो नाम पुनः जागरितो भूत्वा अवरोहात् उत्थानमस्ति । एतच्च आङ्लभाषायां ग्रान्ड न्यारेटिभ इति वक्तुं शक्यते । आधुनिकतायाः समये धार्मिकमान्यता सान्दर्भिकी नास्ति, अत्र सूक्ष्माध्ययनमावश्यकं वर्तत इत्युक्त्वा आत्मानम् उत्तराधुनिकतावादिनः मन्यमानानां सर्वाधिकः प्रहारो वर्तते । नेपालस्य विश्वविद्यालयेषु अधीयानानां विद्यार्थिनां कृते सम्प्रत्यपि उत्तराधुनिकतावादस्य विनिर्माणवादस्य च विमर्शनं नूतनं स्यात् परन्तु विश्वस्मिन् विश्वे विषयोऽयं गतार्थो वर्तते । अधुना उत्तर आधुनिकतावादस्य युगो नास्ति, उत्तरोत्तराधुनिकतावादस्य युगो वर्तते । वैश्वीकरणोत्तरवादस्य युगे च वयं वर्तामहे । अस्माकं विपन्नतायाः परिणाम ! विपन्नवर्गाणां नेतारः सन्ति चेद् नेतृत्वस्य प्राप्तेः पश्चात् ते हिरकालङ्कारैः भूषणीयाः ! अत्युच्चगुणयुतानि अत्यन्तं महर्घानि च वस्त्राणि परिधापनीयानि भवन्ति । स्वेन लेशतोऽपि अवसरे लब्धे स्वस्य लघुनि परिधावेव भव्यकथानिर्माणाय व्याकुलता दृष्टा ।

नेपाले सङ्घीयतायाः आवश्यकतास्तीति उक्तम्, मगरात-ताम्सालिङ-नेवा-खसान-शेर्पादिजातीनां कृते क्षेत्राणां विभाजनस्य विषयोऽपि श्रुतः । एवं दृष्ट्या तु विनिर्माणवादः स्वीक्रियते इति भाषणं क्रियते अवसरे लब्धे पुनः सिद्धान्तत्यागस्य प्रवृत्तिः दृष्टा । सम्प्रति मनुष्याः कम्प्युटरविज्ञानम्, कृत्रिमबुद्धिः, वंशजातिः, शिरा चेति क्षेत्रेषु विहितेन विकासेन प्राविधिकधर्मः प्रारब्धो वर्तते, प्राचीन धार्मिकपरम्परा न स्थास्यतीति विमृशन्ति । विषयोऽसौ समीक्षितुं योग्योऽस्ति । क्रिश्चियनधर्मः युरोपमहादेशे विशेषसमये विकसित आसीत् । यद्यपि अस्य धर्मस्य

मूलं इजरायलदेशीयः जीससक्राइस्ट आसीत् । अयं धर्म आधुनिकरूपापन्नस्तु युरोपमहादेशे एव सञ्जात । परन्तु सम्प्रति युरोपमहादेशे एव धर्मोऽयमसान्दर्भिको वर्तते । चर्च-आदिप्रार्थनागृहाणि रिक्तायमानानि सन्ति । प्रायो जनसंख्यया आत्मानं नास्तिकरूपेण परिचायनस्य क्रमः वर्धितोऽस्ति । सम्बद्धधार्मिकजनैः शताब्दीभ्यः पूर्वं लिखितानां ग्रन्थानामसंशोधनेन, स्थितिगत्यात्मकतायाः अभावेन वा सम्प्रति आईएसआइएस-तालिवान-अलकायदा-बोकोहरामसदृशाः गतिविधयः जायमानाः सन्ति । नेपाल्यां 'कि हस्तिना पुरको राज कि चपरी मुनीको बास' इति कथनस्येव, त्वं मृतः अहं वेति कथनस्य इव, बाइनेरीव्यवस्थायामिव इस्लामधर्मावलम्बिनः जीवन्ति वयं वा इति कथनस्य इव वा जिहादी-आक्रमणस्य क्रमः दृष्टोऽस्ति । प्रविधेः क्षेत्रे आगतेन परिवर्तनेन सहैव विज्ञानस्य प्रभुत्वं वर्धितमस्ति । धर्मस्य असान्दर्भिकतायाः वर्धनस्य विषये कुत्रचित् सुदृढः तर्कश्च विद्यते । परं धर्मस्य बृहत्सांरचनिकपद्धत्या सह स्थितिगत्यात्मकताया संयोजनस्य कारणेन चतुर्थौद्योगिकक्रान्तेरनन्तरम्, तत्पश्चादपि धर्मस्य सान्दर्भिकता भवत्येव । धर्म धार्मिकतायुक्तः सन् विज्ञानेन सहैव अग्रे गमिष्यति, धर्मः सान्दर्भिकश्च भविष्यति ।

विश्वस्मिन् विश्वे प्रचलितासु विभिन्नासु कथासु कार्ल मार्क्स एको जनः कथाप्रवाचकः । कार्लमाक्स इत्यस्य चर्चा नेपालस्य सन्दर्भे अनिवार्यो वर्तते । यतो हि ईश्वरोऽस्ति तर्हि स ईश्वरः कार्लमार्क्स वर्तते इति ब्रुवाणः आत्मानं नास्तिकं मन्यमानाः जनाः इदानीमपि नेपाले सन्ति । व्यवहारे नैजसम्पदः अवलुण्ठनस्य, सर्वकारीयभूम्याः अपचलनस्य, मन्त्रिषु सत्स्वपि सर्वकारीयप्राभिलेखने भूम्यावासहीनानां सूच्यां स्वनामोल्लेखनस्य, व्यक्तिगतरूपेण विपूलधनस्य स्वामित्वेऽपि सर्वकारीयकोषदोहनस्य, निर्लज्जतया आयमूलकविद्यालयसञ्चालनस्य च कार्येषु एतेषां संलग्नता वर्तते । निर्लज्जया आयमूलकसंयन्त्राणां सञ्चालकाः ! आत्मानं वामपन्थिनः मन्वाना ! मार्क्स इत्यस्य पूजकाः वर्तन्ते । एवंव्यवहारेण मार्क्सवादः सिद्धान्तस्य अपेक्षयापि पन्थः सम्भूतोऽस्ति । पन्थस्य कृते किमपि दिव्यं पुस्तकम्, प्रारम्भकर्ता, अधिनायकः, सङ्घटनपद्धतिश्च अपेक्षिताः भवन्ति । आत्मानं वामपन्थिमन्यमानैः समाजवादिमन्यमान्यैः जनैस्सह तादृशं पुस्तकम्, अधिनायकः, सङ्घटनपद्धतिश्च वर्तन्ते । लेलिनवादिसङ्घटनपद्धतिः का ? इति प्रश्ने रुसदेशस्य वामदलस्य महासचिवेन उक्तम् आसीत् - अस्माकं सोभियतसङ्घे सम्पूर्णदेशाः

वामदलस्य अधीने सन्ति, वामदलं केन्द्रीयसमितेः अधीनम्, केम्द्रीयसमितिः पोलिट्व्यूरोनिकायस्य अधीना, पोलिटव्यूरोनिकायश्च महासचिवस्य अधीनो वर्तते। महासचिवस्य कथनान्येव देशस्य विधयः भवन्ति । तस्मात् स्टालिन इत्यस्य समये स्टालिन समीचीनः, स्टालिन इत्यस्य मृत्योः पश्चात् तस्य उत्तराधिकारिणा स्टालिन इत्यस्य प्रतिशतं सप्ततिः समीचीनं स्वस्य च प्रतिशतं त्रिंशदित्युक्त्वा विश्लेषणं प्रारब्धम्। स्टालिन इत्यस्य समये स्टालिन इत्यस्य अग्रे कोऽपि वक्तुं न पारयति स्म। एकस्याः एव व्यक्तेः सर्वत्र नियमनस्य पद्धतिं स्वीकृत्य नाम्ना तु वामपन्थिनो वदन्ति ! कम्युनशब्दात् कम्युनिष्टशब्दो विकसितः । सर्वतः अन्यपद्धतौ अवलम्वितायां सत्यामपि नाम्ना वामपन्थि उच्यते । कथनमेतत् तेषु एव न प्रवर्तते । एवं सत्यपि किमर्थं साम्यवादः, कम्युनिजमवादः, समाजवादश्च अग्रे सार्यन्ते ? इति चेत् केवलम् आशां लक्ष्यं वा दर्शयितुमेव। यस्मिन् देशे शिक्षा केवलम् औपचारिकोपाधिप्राप्तये एव न सन्ति नीरक्षीरविवेकस्य अर्जनाय वर्तते तत्र देशे मार्क्सवादः राजनीतिकदर्शनस्य रूपेण निरर्थकोऽहितकारी चास्तीति ज्ञातो वर्तते । क्रुसेड-जेहाद इत्याभ्यां मारितानामपेक्षया वामपन्थिनः नाम्नि मृतानां जनानां संख्या किञ्चिद् न्यूना दृश्येत परन्तु तोलनात्मकरूपेण कालखण्डे विचारिते आसन्नपञ्चाशदुत्तरशतवर्षाणामवधौ अधिकाः जनाः मृता इति दृश्यन्ते। एवं सत्यपि कार्लमार्क्स इत्यस्य स्मरणस्य कारणं किमिति चेद् राजनीतिर्कदर्शनस्य रूपेण कार्याभावेऽपि समाजस्य व्याख्यातुः दर्शनस्य रूपेण कार्लमार्क्स इत्यत्र कतिपयविशेषताः प्राप्यन्ते। विपन्न-दुःखि-पीडितवर्गाणां विषयाः प्रबलरूपेण कार्ल मार्क्स इत्यनेन उत्थापिताः सन्त्येव। एवंरीत्या व्याख्यानेन समयक्रमेण आगतानां विभिन्नमानकानां स्वस्यैव विशेषताः भवन्ति । कार्ल मार्क्स इत्यनेनापि एकः मानकः उपस्थापितोऽस्ति । सञ्चितिवादिसमाजस्य व्याख्यायां "कमोडिटी फेटिसिजम"सिद्धान्तः प्रतिपादितोऽस्ति परं सारतः सिद्धान्तोऽयं नेपाले उपयोगी नास्ति । मार्क्सवादः सङ्कटापन्नसाधनस्य रूपेण विश्लेष्टुम्, उपयोक्तुञ्च शक्यते। प्रतिमानस्य रूपेण न अपि तु प्याराडाइम इत्यस्य रूपेण, निदर्शनस्य रूपेण न उपमानस्य रूपेण, कम्प्यर एण्ड कन्ट्रास्ट इत्यस्य कृते सिद्धान्तोऽयमुपयोगी भवति। एतेनैव अस्य सिद्धान्तस्य ऐतिहासिकता, सान्दर्भिकता च वर्तते। आगामिविश्वस्य, नेपालस्य च व्याख्यातुः, आगामिनेपालाय मार्गनिर्देशनस्य च दर्शनस्य रूपेण मार्क्सवादः नास्ति। सञ्चितिवादेन, उदारवादेन, नवोदारवादेन वा विकल्पप्रदानस्य

सन्दर्भेऽपि आभ्यां जनतायै सुखं प्रदातुं न शक्यते इति निष्कर्षं विश्वसमुदायः प्राप्तोऽस्ति।

विज्ञानप्रविधेर्माध्यमेन सम्प्रति संसारः सहजः सम्भूतोऽस्ति । अधुना सभ्यतानां परस्परं संघर्षभावः सम्भवति । प्रत्येकं जनस्य स्वस्य सांस्कृतिक-नागरिक-राजनैतिकाधाराणां परिधीनां निश्चयनस्य व्याख्या व्यवहारेऽपि सम्भवास्ति । स्थितिगत्यात्मकतायाः माध्यमेन कम्प्युटर-सायन्स-आर्टिफिसियल-इन्टेलिजेन्स-जेनेटिकइन्जिनियरिङ-न्युरोलोजीप्रभृतिषु क्षेत्रेषु विहितेन विकासेन सह धर्मस्य तादात्म्यं स्थापयितुं शक्यते । वस्तुत उदारविश्वव्यवस्थायाः संस्थापनायै पन्थस्य न अपितु धर्मस्य महद् योगदानं भवति। निश्चितपरिधौ राज्यानामाधारेण राष्ट्रियतायाः व्याख्यानस्य, निश्चितपरिधौ वर्तमानानां विविधजातिप्रजातिवंशभाषाभाषिभौगोलिकक्षेत्रनिवासिनां सर्वेषां जनानां बृहत्तरराष्ट्रस्य परिपूरकस्य न्यूनतोऽपि सहजीविनः अवयवस्य रूपेण स्वीकरणस्य सैद्धान्तिकस्वरूपं विकस्यमानं वर्तते ।

दर्शनस्य स्तरे "सर्वाधिकं समीचीनम्, सर्वाधिकजनानां वा" इति वर्गद्वयं विभज्य अथवा एकस्यैव वर्गस्य उत्थानाय सम्भावितदृष्टिकोणेन न भवतीति बुद्ध्वा सर्वे भवन्तु सुखिनः इत्यनुसारेण विश्वव्यवस्थाम्, राज्यव्यवस्थाम्, संरचनाम्, आर्थिकप्रणालीञ्च संस्थापयितुं वयं प्रवृत्ताः स्मः । विज्ञाने प्रथमतः तद्विषयिणी परिकल्पना महत्त्वपूर्णा भवति । परिकल्पनायाः पश्चात् तत्परीक्षेतुं शक्यते । परिकल्पना यदि स्वीकार्या न भवति चेत् विकल्पाः अनुसर्तुं शक्यन्ते । अद्यत्वे एकेन परिकल्पनाकारेण परिकल्पिते विश्वे एकेन वर्गेण क्रान्तिं कृत्वा सञ्चितिवादं निरस्य सर्वहारवर्गेण तानाशाहिनो भूत्वा अन्ततोगत्वा साम्यवादं यावत् प्रापणस्य कथा असान्दर्भिकी सञ्जातास्ति। अपरया कथया राज्यस्य भूमिका प्रायो न भवति। राज्यं केवलं नियमनकारिभूमिकायामेव भवति, परन्तु व्यक्तिभ्यः, आपणस्य संरचनायै च कार्यस्यावसरः प्रदीयते तर्हि सर्वं समीचीनं भवेदेवेति मान्यतां धत्ते। एडम स्मिथ इत्यतः आरभ्य अत्र दीर्घाकारिका सूचिः वर्तते । मान्यतेयञ्च सर्वहितकारिणी न सम्भूता । तस्याः कारणेन प्रकृतेः निर्ममतया दोहनं जातम् । पृथ्व्यां वर्तमानानाम् अवर्तमानानाञ्च मध्ये महती अन्तरा वर्धमानास्ति। प्रतिशतं एकस्मिन् जने प्रतिशतं नवनवत्याः जनानां सम्पत्तिरस्तीति समाचारः सार्वजनीभूतो वर्तते । तथ्याङ्केषु

अवलोकितेषु सत्सु अवश्यमेव न्यूनाधिक्यं भवेत् परं शक्तिशालिषु जनेष्वेव स्रोतसां एकीभवनम् उदारवादिविश्वव्यवस्था वक्तुं न शक्यते । सहैव चतुर्थौद्योगिकक्रान्त्यां कृत्रिमबुद्ध्यादिकारणैः व्यर्थकार्यदलानि बहूनि सम्भूतानि । लक्षशो मनुष्यैः विधातव्यानां कार्याणाम् एकेनैवोपकरणेन सम्पादनात् ते श्रमजीविनो मनुष्याः किं कुर्युः? तथा वृत्तिहीना मनुष्याः बहुसंख्यायां भविष्यन्तीति हेतो महतः सङ्कटस्य अनुमानं प्रक्षेपणञ्च विहितं वर्तते । एतस्याः समाधानमपि अधुनातननवोदारवादेन आपणवादेन वा तत्कालं दातुं न शक्यते ।

अत्र आश्चर्यकरो विषयो वर्तते- वेदे कुत्रापि मानवाः भारस्य रूपेण दर्शिताः न सन्ति । वैदिकवाङ्मये मन्त्रसंहिता-ब्राह्मण-उपनिषद्-आरण्यकेष्वपि सन्ततिः येन केन वा प्रकारेण यस्यां कस्यां वा परिस्थितौ जाता स्यात् तस्य स्वामित्वं गृहीतमेव दृश्यते । पुराणेषु मानवानां पापकर्मसु प्रवृत्तेः पश्चात् तेषां भारेण पीडिता पृथ्वी रुदन्ती ब्रह्मणः सकाशं प्राप्ता । तत्पश्चात् भगवता विष्णुना अवतारं गृहीत्वा पापिनः समाप्य पृथ्व्यां व्यवस्था संस्थापितेति कथा प्राप्यते । अवताराणां मुख्यं प्रयोजनं पृथ्व्यां वर्तमानाः विसङ्गतीः समाप्य व्यवस्थायाः सम्पादनमेव दृश्यते ।

इतोऽप्यधिकं आधुनिकप्रविधेः विकासेन सहैव जनान् अन्याकाशीयपिण्डेषु नेतुं अधीयमानं वर्तते । चन्द्रमसि मङ्गलग्रहे वा जनानां स्थानान्तरणं कर्तुं शक्यते नवेति विषये अन्वेषणं जायमानं वर्तते । इदञ्च महत् प्रतिमानं परिवर्तनमस्ति । भविष्ये कार्यमेतत् सफलं स्यात् नवा, कति समयः अपेक्षते ?, प्रत्यक्षलाभग्राही को जनो भवेदिति तु अन्याः कथाः ।

विगतनिरीक्षणे तु वसतीनां वसतयः जीवनानाञ्च संहारकाः शासकाः अभूवन् । मध्यैसियाक्षेत्रस्य तैमूरलुङ्ग, मङ्गोलियादेशस्य चङ्गेजखान कुब इत्युपरि खान इत्येतेषामाक्रमणम् आततायि आसीत् । परन्तु अद्यत्वे विश्वस्मिन् विश्वे द्वितीयविश्वयुद्धस्य पश्चात् लघूनि युद्धानि सञ्चलन्ति सन्त्यपि एतेभ्यः युद्धेभ्यः मार्गदुर्घटनासु मृयमाणानां जनानां संख्या अधिकास्ति । युद्धानि रोद्धुं प्रायः सफलता प्राप्तास्ति । पूर्वं राज्यस्य सीमानः अधिकमात्रायां परिवर्तमानाः आसन् । सम्प्रति प्रायः सुस्थिराः वर्तन्ते । अस्माभिश्च यथाशीघ्रं राज्यराष्ट्रसिद्धान्तं इतिहासस्य अवकरे पातयितुं समर्थैर्भाव्यम् । राज्यराष्ट्रसिद्धान्ते अवलम्विते सति सीम्नां कृते जायमानानि युद्धानि अवरूद्धाति भविष्यन्ति । अस्मिन् नूतनविश्वपरिवेशे विश्वव्यवस्थायाः

सम्वाहकेन सिद्धान्तेन कञ्चित् एकवर्गं बहुसंख्यकमेव वा नीत्वा अग्रे वर्धनमुचितं न भवति। यथा सम्प्रति भारत एव दृष्टे सति किञ्चत् पूर्वं अल्पसंख्यकानां तुष्टिः विधीयमाना आसीत्। परमधुना बहुसंख्यकैः स्वस्य नेतरि गर्वबोधस्य स्थितिं प्राप्तोऽस्ति परन्तु अयमपि सर्वे भवन्तु सुखिनः इति वचनानुसारेण नास्ति।

सर्वे भवन्तु सुखिनः इत्यस्यार्थः सर्वधर्मसमभावो वर्तते इत्युच्यते तर्हि मौढ्यमेतत्। यतो हि अस्मिन् युगे सर्वधर्मसमभावः इति कथनं श्रृङ्गालाः, वृकाः, कपोताश्च समानाः सन्तीति कथनमिव वर्तते। अधुना प्रत्येकं धर्मस्य सम्प्रदायसम्बद्धानि पुस्तकानि, भविष्यद्वक्तारश्च वर्तन्ते तर्हि तेषां विश्वदृष्टिः कीदृशी स्यात्? तत्र स्वस्य भव, परस्य वेत्येव मान्यता वर्तते। सर्वेषां कृते भवति नवेति विचारणेन विनैव सर्वधर्मसमभावः इति कथनं मूर्खतास्ति। अत्र समाधिः कः? सम्प्रति उपलब्धानम् विधिपद्धत्यनुसन्धानाभिलेखनानां माध्यमेन सम्प्रदायानां मध्ये द्वन्द्वसामञ्जस्ययोः कारणं परिचित्य द्वन्द्वाभावस्य विशेषक्षेत्राणां निर्माणावस्थायां वयं वर्तामहे।

विज्ञानस्य बुद्ध्या, प्रविधिना च सहैव धर्मस्य विवेकस्य परिस्थितौ सहृदयतायाः सम्बन्धः रमते। प्रत्येकं व्यक्त्या स्वस्य परिचयस्य कृते अन्यस्य समाप्तिः आवश्यकी न भवति। प्रविधेः विकाशकारिप्रयोजनस्य कृते प्रयोगाऽभावस्य अवस्था स्रष्टुं शक्यते। कल्याणकारिप्रयोजनायैव प्रयोक्तुं शक्यते इति आशास्महे। एतदर्थं सहृदयतादर्शनं मार्गनिर्देशदर्शनं मन्तुं शक्यते। उदाहरणमस्ति- सैव छुरिका गृहस्थिना व्यञ्जनकर्तनाय प्रयुज्यते, शल्यचिकित्सकैः शल्यक्रियायाम्। परन्तु दुष्टेन घातुकेन अन्यस्मै आक्रमणाय प्रयोक्तुं शक्यते। तस्मात् प्रविधेः निर्भयेन संञ्चालनीयः, प्रविधेः सुसञ्चालनस्य दृष्टिः मार्क्सवादेन, वामपन्थिभिः, समाजवादेन, निर्लज्जतया आयमुखिना आपणवादेन च दीयते। अयं निजः परो वेति गणना लघुचेतसाम्। उदारचरितानाञ्तु वसुधैव कुटुम्बकम् इत्यनुसारेण सर्वमपि जगत् कुटुम्बो वर्तते इति विवेकेन एव दातुं शक्यते।

पाश्चात्त्ये विकसितमुच्चतमदर्शनं मानवतावादो वर्तते। धर्माद्, विचारधारातः, राष्ट्रियतायाश्च उपरि उत्थाय मानवे मानवस्य व्यवहारो विधेयः। सनातनदर्शने तु अतिरिक्तोन्नतः विचारो वर्तते। सर्वत्र जगति सर्वाणि वस्तूनि एकस्यैव चेतनस्य अंशाः सन्ति। सर्वेऽपि जनाः परमात्मनः अंशाः विद्यन्ते। विश्वस्मै विश्वाय दृष्टिरियमावश्यकी वर्तते। एवं व्यवहारः कथम्?, किमर्थम्?, केन विधिना? च भवितुं शक्नोतीति व्याख्यातुं सिद्धान्त आवश्यको भवति। स्थितिगत्यात्मकप्रगतिवादस्य ज्ञानमेतदर्थमावश्यकमस्ति।

स्थित्या स्वस्य मूलं किम् ? कुत्र स्वस्य स्थितिः ? अहं कः ? वयं के ? अस्माकं सभ्यता का ? अस्माकं मान्यता का ? अस्माकं मानकाश्च के ? इति दृष्टिः ददाति चेत् गतिः स्वात्मानं परिष्कृतं भावयति । केऽपि विषयाः स्वस्मै न रोचन्ते तर्हि अयं स्थितेः पक्षः । इमे विषया अन्येभ्योऽपि न रोचन्ते इति ज्ञानं गतेः पक्षोऽस्ति । आत्मनः प्रतिकूलानि परेषां न समाचरेत् इत्यादर्शस्य व्यवहारे आनयनमेव स्थितिगत्यात्मकता वर्तते । स्थितिगत्यात्मकतां प्रति अस्माकं प्रतिवेशिराष्ट्रद्वयस्य प्रमुखौ सि चिनफिङ् नरेन्द्र मोदी च विश्वदृष्टिकोणेन अग्रे वर्धमानौ स्तः । सभ्यतायाः पुनरुदयः, सभ्यतायाः विषये संवादश्च विधेयः इति भाषमाणौ स्तः । सभ्यतानां संघर्षस्तु पाश्चात्त्यजगता विहितः आसीत् । एतदर्थं सिद्धान्तकाराः नालोचनीयाः । मार्क्स इत्यस्य अपेक्षयापि मार्क्सवादस्य ध्वजमुद्ध्वा स्टालिन-लेलिन-पोलपोट-चाउचेस्कुभिः विहितः नरसंहार एतेषां नैनून्यं वर्तते । मार्क्स इत्यस्य विचारोऽस्तीत्यतः मार्क्स इत्यस्मिन् दोषभागिता वर्तते परन्तु मूलतः विचारकस्य अपेक्षयापि विकृतप्रयोक्तारः दोषिणः सन्ति । चीनदेशे अधुनापि माओत्सेतुङ् इत्यस्य मूर्तिः प्रतिमा च राजते, पर विचारो नास्ति । कन्फुसियस इत्यस्य विचाराद् अग्रे प्रवर्ध्य सभ्यतासु संवादः प्रशंसायोग्यविषयोऽस्ति परन्तु निष्कर्षं प्राप्तो नास्ति । श्रेष्ठता अस्माकमेव भवेदित्यपि मान्या न भवति । नेपाले अस्माकमेव विचारः क्रियान्वेतव्यः इति कथनमपि मौलिकतायाः आवरणे फासिष्टविचारधारा अभूत् । स्वस्य सर्वे समीचीनाः भिन्नसमुदायानां सर्वेऽनुचिताः इति कथनं फासिष्टशैली विद्यते । संसारे तथा न भवति प्रत्येकं जाति-प्रजाति-वंश-धर्मानुयायिषु शोभनाः अशोभनाश्च मनुष्याः भवन्ति । कस्यापि समुदायस्य मार्गनिर्देशकसिद्धान्तः सर्वव्यापी, सर्वसमावेशी च सिद्धान्तो वर्तते न वेति विचारणीयः । कतिपयपन्थानुयायिनां ग्रन्थेषु सर्वेषां कृते स्थानं नास्ति । कतिपयराजनैतिकदृष्टौ सर्वेषां कृते स्थानं नास्ति । मार्क्सवाद-सञ्चितिवादस्य च आलोचना मार्क्स इत्यस्य एडम स्मिथ इत्यस्य च चित्रस्य अरोचनेन विहिता इति न । सञ्चितिवादः सर्वाधिकमहान्, सर्वाधिकजनसंख्यायाः वा इत्येव ब्रूयात् । मार्क्सवादेन समाजवादेन च कस्यचिदेकस्यैव वर्गस्य कल्याणं स्यात् । राज्यस्य सर्वस्याः सार्वजनिकसम्पदः अधिग्रहणं विधाय समाजे धनिनः एव अपराधिनः सन्ति वा इति प्रवृत्तिरपि अनुचिता वर्तते ।[७]

अस्माकं सनातनपद्धतौ अर्थोपार्जनेन धर्मपूर्वकेण भाव्यम् । अर्थस्य उपभोगः कार्येषु भवति । कामोपभोगोऽपि धर्मपूर्वकः एव विधेय ।ः परन्तु धनित्वमसमीचीनं

न भवति । धनार्जनाय निर्लज्जता, अनूचितायमूलकाः पापिनः, आततायिनश्च दण्डनीयाः वर्तन्ते । यस्यां कस्यामपि अंवस्थायां सत्यामपि स्वस्य उद्योगेन समृद्धिः आनेयेति अस्माकं मान्यता वर्तते । परं समाजवादिव्यवस्थया समाजे मानवाः निर्लज्जाः, अपेक्षिणश्च विधीयन्ते । राज्यं किं दद्यात् ? नेतृभिः किं दीयते ? नेतृणां स्वस्थानादिषु आगमने एकविंशतेः, एकपञ्चाशतो वा किलोपरिमाणस्य माल्येन सम्मानः । अस्माद् विपूलं मूर्खतायाः कार्यमन्यद् भवितुं न शक्नोति । अस्यां परिस्थितौ प्रापकं कपुततन्त्रं वर्तते । नग्नः स्नास्यति किम् ? निष्पीड्यते किम् ? इत्यवस्थां प्राप्तवतां जनानां कल्याणस्य भावना अनूचिता नास्ति परमत्र विधेयप्रकारोऽपर्याप्तः । अधुना प्रविधेः सञ्चारस्य च माध्यमेन संसारः संयोजितो वर्तते । ज्ञानस्य विस्फोटो दृश्यते । ज्ञानस्य व्याप्तिः सर्वत्र अस्ति । एतदुपरि धर्मस्य विवेकः प्रयुज्यते चेद् वयं सहृदयतायाः सम्बन्धं प्राप्नुमः । एवं चिन्तनानि निश्चितरूपरेखायामुद्भूतानि भवन्ति । सिद्धान्तस्य रूपेण राज्यराष्ट्रसिद्धान्तस्य अभिनिर्माणमस्ति । सहृदयतादर्शनमभिनिर्मितं वर्तते । स्थितिगत्यात्मकप्रगतिवादः अभिनिर्मितोऽस्ति । दर्शने लघूनि अनुभूतानि सन्त्यपि, न्यूनसंख्यायां सन्त्यपि, भीषणकृष्णाकारकरजन्यां खद्योतकीटस्य प्रकाशः स्पष्टमनुभूयते । लघुः अग्नियुतोऽङ्गारकः स्वस्य स्थाने प्रकाशकः प्रतिभाति । प्रकाशस्य व्यापकीकरणं विस्तृतीकरणञ्च आवश्यकं वर्तते । निशा यादृश्यां गाढावस्थायां सत्यपि अंशमात्रेण प्रकाशेन स्वस्य परिधौ अन्धकारं प्रतिकरोति ।

अस्य व्याख्यानाय वयमसमर्थाः भवेम तर्हि अस्य श्रेयः भविष्यति अन्येन गृह्यते । जुम्लाजनपदीयमार्सिधान्यस्य, हलेदोहरिद्रायाः अधिकारस्य अन्यैः ग्रहणस्य इव । अत्र तु ॐध्वनेरपि स्वसम्पत्यधिकारः केनचिद् निर्माणसंस्थानेन पञ्जीकारितः स्यात् । (बासमती)सुगन्धयुततण्डुलस्य हलेदोहरिद्रायाः अमेरिकादेशीयनिर्माणसंस्थया विहितमासीत् । कति प्रत्यावृताः कति च इदानीमपि तथैव सन्ति । अस्माकं चिन्तनस्य इव अन्यैरपि स्वसम्पत्यधिकारर्थं कार्यं कृतं स्यात् परं ते मूलविषयाश्तु न जानन्ति । अस्य आन्तर्यम्, दार्शनिकपक्षम्,विश्वदृष्टिञ्च अज्ञात्वतां जनानां कृते विषयोऽयं वानरस्य हस्ते नारिकेलफलवद् भवेदिति भीतिः मुख्यास्ति । सहृदयतादर्शनम्, राज्यराष्ट्रसिद्धान्तः, आधारशिलाचतुष्टयम्, पारिस्थितिकसम्भाव्यतायाः नियमः, सातत्यदृष्टिकोणः, सम्मेयतागुणश्चेत्यादिनां सन्दर्भश्च विचारणीयः ।

चतुर्थं प्रवचनम्

बन्धनाद् मुक्तिः

वैदिकवाङ्मये पुरुषसूक्तस्याधिकमात्रायां चर्चा भवति । बहुकोणेभ्यो विश्लेषणे विहिते विरोधिनां समूहोऽपि विपुलो दृश्यते । अत्र स्थितस्य "ब्राह्मणोऽस्य मुखमासीद् बाहुराजन्यः कृतः ऊरू तदस्य यद् वैश्यः पद्भ्यां शूद्रोरजायत" इति मन्त्रस्य व्याख्यातृभिः जनैः ब्राह्मणाः मुखात्, क्षत्रियाः बाहुतः, ऊरूभ्यां वैश्याः, पद्भ्यां शूद्राः अजायन्त इत्यर्थो क्रियते । अस्यार्थस्य विश्लेषणं कुर्मः । आलोचकाः जनाः मुखाद् ब्राह्मणाः अजायन्त इत्यादिवचनानाम् अङ्गेभ्यः ते अजायन्त इत्यर्थं प्रतिपाद्य वेदे अवैज्ञानिकतामारोपयन्ति । पृष्टपार्श्ववर्तिनः अस्थितः स्त्रियः अजायन्त इति भाषमाणाः अपि विषयममुमालोचयन्तः दृष्टाः । अन्यत्र च शुद्राः पद्भ्यां जाताः इक्त्युक्त्वा विभेदो विहितः इति व्याख्यां कुर्वन्तो दृश्यन्ते । शरीरस्य अङ्गेषु सास्टाङ्गप्रणामाः पादयोरेव विधीयन्ते इति चर्चां तु न कुर्वन्ति । तुलनया विश्लेषणे विहिते सत्यस्य आधारः निर्मितः स्यात् । शब्दार्थमात्रकरणेन तु मनसि ज्वलन्ती अग्निज्वाला दह्यमानेन हृदा कथं जानीयात् ? इत्युक्ते वस्तुतः मनसि ज्वाला ज्वलन्ती तु न भवति किल ! तस्मिन् समये । मनसः ज्वालया साङ्केतिकरूपेण अवस्था कीदृशी अस्तीति वर्णयितुं इष्यते । समाजे विद्यमानैः पृथक्पृथग्जातिवर्णैः विधीयमानानि कार्याणि आधृत्य रूपकरूपेण व्याख्यातुं ईप्सितमस्ति ।

मुखाद् वाणी निस्सरति । ज्ञानं चेतश्च प्रसारयति । तथैव समाजे केचनजना ज्ञानसम्बद्धानि कार्याणि कुर्वन्ति, शरीरे च बाहुभ्यां बलसम्बद्धानि

कार्याणि विधीयमानानि भवन्ति। एवमेव समाजे बलेन सम्बद्धाः सन्तो समाजस्य रक्षाम्, आक्रमणम्, प्रत्याक्रमणञ्च कुर्वन्ति। समाजस्य यथार्थं किमस्ति इति प्रश्ने आङ्ग्लभाषायां (मेटाफर) इति उक्त्वा उत्तरप्रदानस्य इव शब्दस्य अभिधादिशक्तीनां तात्पर्यमविचार्यैव साक्षादङ्गेभ्यः जाताः इति व्याख्यानमनुचितमस्ति । शरीरस्य सम्पूर्णभारः उरूणा निरुह्यते । एवमेव समाजे कतिपयव्यक्तिभिः समुदायेभ्यः आवश्यकानि विविधानि सेवासौविध्यानि प्रदीयन्ते। शरीरस्य गमनागमनं पादाभ्यां भवति । एवमेव च समाजे कतिपयव्यक्तयः व्यवहारिकरूपेण शारीरकश्रमाद् विकासनिर्माणाद् सेवाप्रदायकसंस्थानानि यावत् प्रत्यक्षसंलग्नतायां कार्यं विदधति । समाजे संख्यात्मकरूपेण विचारणायां सत्याम् अत्रैव अधिकजनाः प्रवृत्ताः दृश्यन्ते। आङ्ग्लभाषायामुच्यते चेत् नगण्यः(नोमिनल) सामान्यम्(अर्डिनल) मध्यान्तरः(इन्टरभल) अनुपातश्च(रेसियो) केन आधारेण मापिताः भवन्तीति विश्लेषणीयाः । एतेषु भेदोऽपि अवश्यमस्ति। परमत्र परस्परं सातत्यस्य सम्बन्धो वर्तते। यतो हि प्रत्येकं कर्मणः स्वस्यैव प्रवृत्तिर्भवति। तत्र प्रत्येकं जनस्य योगदानं महत्त्वपूर्णञ्चास्ते । सहस्रशोऽङ्गयुते यन्त्रे एकमङ्गं विफलं सद् यन्त्रेण उचितरीत्या कार्यं न कुर्यात्। तात्कालिकावस्थायां सः एवावयवो महत्त्वपूर्णो सञ्जातः। अतः समग्रतायां स्वस्वस्थानं अवस्थाविशेषे महत्त्वपूर्णं भवति।

वैदिकवाङ्मये "ऋषयो मन्त्रद्रष्टारः" इत्युक्त्वा ऋषयः मन्त्रद्रष्टारः आसन् इति सिद्धो भवति। आदिकाले राज्यं नासीत्, राजानश्च नासन्। अर्थात् वर्तमानशक्तिसंरचनायाः इव संरचना तदानीं नासीत्। अत एव ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः सत्ताशक्तिसञ्चालनाय परिकल्पिता इति न। अन्त्यजपञ्चमवर्णस्यापि चर्चा प्राप्यते । अयञ्च विभागः अधुनातनविज्ञाने विभिन्नानां धातूनां तत्त्वानाञ्च अध्ययनस्य सहजतायै समयसूच्यां कृतं वर्गीकरणमिवास्ति। समाजे मूलतः चतस्रः प्रवृत्तयः प्राप्यन्ते। अत्राप्यसमाविष्टा पञ्चमप्रवृत्तिरस्ति। अद्यत्वे आधुनिकयुगेऽपि अक्ष्णः चिकित्सकेन अक्षिणी एव प्राथमिकतायां स्थाप्येते, यकृतः चिकित्सकेन यकृत् । यतो हि स्वस्य दायित्वं प्राथमिकतायां संस्थाप्य अङ्गविशेषे स्थितायाः समस्यायाः निधानं न क्रियते तर्हि समाधानं कर्तुं न शक्यते।

तस्मात् शास्त्रेषु ब्राह्मणादिवर्णानां विहितव्याख्या ग्रन्थाः दृश्यन्ते । बहुकालम् अन्तरेण अस्माकं ग्रन्थाः यथावद् न प्राप्यन्ते, प्राप्तेष्वपि ग्रन्थेषु कतिपयाः

अंशाः विलुप्ताः स्युः । प्राचीनग्रन्था द्विविधाः श्रुतयः स्मृतयश्च । श्रुतिर्नाम वेदः । वेदे मन्त्रखण्डः, ब्राह्मणखण्डः, आरण्यकखण्डः, उपनिषत्खण्डश्च सन्ति । वैदिकवाङ्मये चतुर्ण्णामेव खण्डानां समावेशनीयत्वेऽपि सङ्कुचितपरिभाषाकृद्भिः जनैः मन्त्रभागः एव वेद उच्यते । वस्तुतः उपनिषद्भागपर्यन्तं वेदोऽस्तीति ब्रुवाणोऽपि जनाः सन्ति। वेदः दुर्बोध्योऽस्तीत्यतः व्याख्यानाय अन्ये ग्रन्थाः लिखिताः सन्ति । ते सर्वे ग्रन्थाः स्मृतयः । स्मृतिः नित्यास्तीति कुत्रापि लिखितं नास्ति । स्मृतयः तात्कालिकपरिवेशे देशकालपरिस्थितीः दृष्ट्वा वेदस्य मर्यादा पृथग् न भवतु इत्युक्त्वा लिखिताः सन्ति, अत एव च देशकालपरिस्थितीनां परिवर्तनेन असान्दर्भिकता तासां भवितुमपि शक्नोति । एवमवस्थायामपि वेदस्यार्थेन अविरुद्धाः सर्वा अपि स्मृतयः प्रमाणानि एव मन्यन्ते । वेदविरुद्धाः स्मृतयः अप्रमाणिकाः भवन्ति । अतोऽस्मिन् युगे मनु-पराशर-याज्ञवल्क्यादिस्मृतयः यथावत् क्रियान्वेतव्याः इत्याग्रहः अयथार्थवादी भवति । यतो हि इमे मन्त्रद्रष्टृभिः साक्षात्कृताः न सन्ति । एते ग्रन्थाः तात्कालिकसमाजस्य कृते लिखिताः सन्ति । सर्पस्य गमनानन्तरं सर्पमार्गे दण्डप्रहार इव असान्दर्भिको वर्तते । तान् पठित्वा इतिहासस्य बन्दिभिरस्माभिर्न भाव्यम् । तत्र स्थितानां समुचितविषयाणाम् अस्वीकरणमपि शोभनं न भवति । सन्दर्भस्य अनुसारेण कति श्लोकाः पश्चाद् वर्धिताः प्रक्षिप्ताश्च सन्तीति मान्यतास्ति । सन्दर्भमविश्लिष्य अर्थस्यानर्थं कृत्वा विवादः कृतश्च दृश्यते । विवादास्पदाः स्मृतयः सन्तीत्यतोऽस्माभिः संविधानस्य विहितस्य परिवर्तनस्य इव ते ग्रन्थाश्च परिवर्तिताः सन्ति । स्मृतयः परिवर्तिताः इत्यत्र प्रमाणञ्च वैदिकसंहिता एकैवास्ति परं मन्वादीनां स्मृतीनाम् अनेकानि संस्करणानि प्राप्यन्ते । अष्टादशस्मृतीनां संङ्ग्रहोऽपि प्राप्तो वर्तते । एवं स्मृतय इतोऽपि अधिकाः स्युः । यदि एकयैव स्मृत्या कार्यं प्रचलेत् तर्हि ऋग्वेदस्य संहितेव एकैव भवेत् । स्मृतीनामनेकत्वं नाम देशकालपरिस्थितीनामनुसारेण नैकाः विधेयाः भवन्तीत्यर्थः । स्थितिगत्यात्मकप्रगतिवादेऽपि अस्माभिः मापदण्डोऽयं क्रियान्वेतुं शक्यते ।

विभिन्नस्मृतयः विभिन्नकालखण्डेषु लिखिताः सन्तीत्यतः तद्युगस्य संस्कृतेः नियमनमितिहासञ्च अध्येतुं उपयोगिन्यो भवन्ति । सम्प्रति ताः स्मृतयः प्रचलिताः सन्ति, श्रुतिसम्मताश्च सन्ति चेदेव कतिपये विषयाः अधुनातनसमयस्य कृते उपयोगिनो भवन्ति । अस्माकं देशे एव जयस्थितिमल्लेन व्यवस्थायै कतिचिद् मैथिलीब्राह्मणान् परिचाल्य राज्यस्य पक्षत एवापरप्राभिलेखनानन्तरं

मनुस्मृत्या राजकीयमान्यता हापिता आसीत् । पूर्वं मनुस्मृतेः अन्यस्मृतीनाञ्च अनुसारेणैव समाजः चलति स्म न वेति अनुमातुं वयं शक्नुमः । अद्यत्वेऽपि किं राज्यस्य विधिषु यद्यद् लिखितं भवति, यादृशस्य दण्डस्य व्यवस्था विहितास्ति तादृशा एव घटना परिघटिताः भवन्ति वा? एवमेव अस्माकमधिनियमान् दृष्ट्वा नेपालिसमाजे अन्यत्र देशेष्वपि सर्वा एव घटनाः एवमेव परिघटिताः स्युः इति कथनं मूढतापन्नं स्यात् । एवमेव कदाचित् स्मृतिग्रन्थेषु अन्येषु पुराणशास्त्रेषु च किमपि लिखितं भवति चेत् सा निदर्शनकल्पना एव भवितुं शक्नोति । आगामिकाले एवं स्यादित्युक्त्वा विहिता परिकल्पनापि भवितुं शक्नोति । परं समाजे तथैव आसीदिति कथनं युक्तिसङ्गतं नास्ति । अतः प्रामाणिकश्रुतिमाधृत्य विशेषकालखण्डे तात्कालिकसमाजस्य जनसमुदायस्य च कृते व्याख्यानग्रन्थाः स्मृतयः सन्ति इति कथनानन्तरमेव सम्प्रति आलोचनायाः बहवो विषयाः समाहिताः भवन्ति ।

श्रुतेः उचितं व्याख्यानं विधेयमित्युक्ते समाजे सम्प्रति पूर्वञ्च विभेदो नासीत् इति न । एवमुच्यते तर्हि अतिरिक्तमूर्खता स्यात् । समाजे विभेदः आसीदेव । परमस्य श्रोतः किमस्तीति उचितं व्याख्याविश्लेषणमावश्यकम् । समाजे चत्वारो वर्णाः पञ्च वर्णाः वा आंसन् । वर्णाः पूर्णतः जन्मना परिकल्पिताः आसन्निति कथनं यथार्थं नास्ति तथैव कर्मणा एव वर्णाः आसन् इत्यपि सत्यं नास्ति ।

वस्तुतः अध्ययनेन जन्मना कर्मणा च वर्णा वर्गीकृताः आसन्निति ज्ञायते । यथा जन्म ब्राह्मणस्य गृहे जातः परन्तु आचरणं तदनुकूलं नास्ति चेत् तं जनं ब्राह्मणकूले न संस्थाप्य ततो अवरस्तरे, अन्तिमे, समाजाद् निष्काश्य वनं वा प्रेषणस्य अवस्थासीत् । राणाकालं यावत् परम्परेयं सामान्यासीत् । अतो जन्मना एव वर्णाः विभक्ता इति वक्तुं न शक्यते । एवञ्च विषयः प्राचीनकाले कारावासनेन दण्डितैः, आन्दोलनेषु संलग्नैः, क्रान्तिकारिभिश्च जनैः स्वस्य संस्मरणे लिखितो वर्तते । जन्मना ब्राह्मणोऽपि जनः राणाशासकानामनुकूलो न जातः चेत् अद्यतः त्वं पाँडे जातः इत्युक्त्वा जातेः अधोनयनस्य घटनाः किञ्चित् पूर्वं यावद् आसीत् । यथार्थतस्तु अस्पृश्यवर्णे अधोनयनस्य परम्परापि आसीत् । अनेन प्रसङ्गेन किं ज्ञातु शक्यते चेत् अस्माकं समाजे वर्णानां का गतिः जातिरपि सुस्थिरा नासीत् । अद्यत्वे च प्रवृत्तिरियं भिन्नरीत्या दृश्यते । अस्माभिः स्वयमेवानुभूयमानेऽनुभवे प्राविधिकविषयाध्येतृणां प्रायो विद्यार्थिनां पारिवारिकपरिस्थित्या तेषां विषयचयने महत्त्वपूर्णभूमिका भवति ।

प्रसङ्गानुसारेण अधिवक्तृजनानां सन्तत्यां अधिवक्तृभिरेव भाव्यम्, विधिशास्त्रमेव अध्येयमिति तु कुत्रापि उक्तं न स्यात् परं गृहस्य वातावरणेन तेभ्यः तान्नेव विषयान् अध्येतुं तत्रैव नेतुञ्च सम्भावना वर्धते। चिकित्सकानां सन्ततिभिः चिकित्साशास्त्रेभ्यः एव प्राथमिकता प्रदीयते इति अस्माभिः दृष्टमस्ति। अत्र व्यावहारिकयथार्थता एवं भवति यत् स्वस्य पूर्वजैः अर्जितं ज्ञानं तदन्तरवर्तिनी सन्ततीः स्वाभाविकरूपेण आकर्षति। अत्र कार्ये जन्मनः अपि एकस्मिन् कोणे भूमिका भवति। परन्तु वस्तुतः जन्मनः कर्मणश्च उभयोः संयोजितं स्वरूपं तत्र वर्तते। यावत्कालपर्यन्तं परम्परायाः धर्मस्य च आधारेण संसारः चलति स्म, तावत्पर्यन्तं वर्णेषु श्रेणीबद्धता विभेदश्च नास्ताम्। राज्यस्य चिन्तनं यतः प्रवृत्तं ततः प्रवृत्तिः शक्तिसंरचनाः कल्पिताः ततश्च राजकीयकारण्येन समाजे श्रेणीबद्धता च जाता। श्रेणीबद्धतया सहैव कस्मिन् वस्तुनि अधिगमनम् अनधिगमनं वा इत्यवस्था सृष्टा। अनेनैव च कालान्तरे विभेदोऽपि अवश्यं सृष्टः। नेपालिसमाजेऽपि विद्यमानस्य विभेदस्य कारणं धर्मशास्त्राणां स्मृतिशास्त्राणां वापेक्षयापि नसमाजे स्थितया श्रेणिबद्धतया सृष्टा राजनीतिरस्ति। अस्माकं संस्कृतावपि विभेदस्य विषयः प्रविष्टः। तस्य मूलकारणं ग्रन्थेभ्योऽपेक्षयापि ग्रन्थाः कथं परिभाषिताः इति ध्यातव्यम्। आलोचकैः अनुचितरीत्या ते ग्रन्थाः परिभाषिताः। शक्तिसंरचनायाम् उच्चस्तरीयपदे आसीनैः जनैः स्वस्य लाभाय तथा प्रयोगः कृतः स्यात्। नीरक्षीरविवेके तु अस्माभिर्वन्दिजनैर्न भाव्यम्। अस्माभिस्तु इतिहासात् पाठः शिक्षणीयः। मूलग्रन्थस्य परिभाषायान्तु एते विषया नोमिनल भ्यारेबल नगण्यप्रकारा एव सन्ति। स्वस्वस्थाने स्वे स्वे महान्तो भवन्ति। सम्प्रति ज्ञानमेव शक्तिरस्तीति कथनवत् प्रतियुगं ज्ञानिभ्यः प्राथमिकता प्रदत्तास्ति। विज्ञानेऽपि प्रायोगिकविधापेक्षया सिद्धान्ताय प्राथमिकता प्रदेयेति अवस्था वर्तते। अद्यत्वे प्रविधेः कारणेन यस्यै कस्यै अपि जात्यै वर्णाय वा ज्ञानस्य सहजतया प्राप्तिरस्ति। ज्ञानप्राप्त्यै संरचनायाः कारणेन ईषद् विलम्बो भवितुं शक्नोति। समतामूलकः समाजो निर्मातव्यश्चेत् स्थितिगत्यात्मकं चिन्तनमावश्यकम्।

अस्माकं मूलस्य अन्वेषणेन विभेदस्य बीजं कुत्र वर्तते इत्यनुसन्धातव्यम्। यदि मूले विभेदस्य बीजं नास्ति चेत् तत्पश्चात् आगताः राजनीतिः, संस्कृतिः, समाजादयस्तु राज्यस्य शक्तिसंरचनायाः विषयाः वर्तन्ते। विषयोऽयमस्माभिः सहजतयाः समाधातुं शक्यते परं एते सर्वे विषया उपेक्ष्यन्ते चेद् जेहादी-क्रुसेडीगतिः

सम्भवति । समाजस्य शक्तिः राज्यसंरचनायां वर्तमानैः जनैरपि सम्बोधनीया । नोचेत् संरचनायाः कारणेन विभेदो न निरस्यते, समस्यायाः समाधानञ्च न भवति । एतदर्थमस्माभिः स्थितिगत्यात्मकप्रगतिवादस्य चिन्तनं करणीयमेव । अस्माकं मूलं कुत्रास्ति, अस्माकं स्तम्भः कुत्रास्ति, समाजे समेषां कल्याणस्य बीजस्य अवधारणा अस्ति न वेति विचारणीयम् ।

सहृदयतादर्शनस्य सन्दर्भे अस्य प्रशस्तमात्रायां व्याख्या सम्भूतास्ति । तत्र समेषां कल्याणस्य उपायः चिन्तितो वर्तते । सम्प्रति व्यवहारे आनेतुं शक्तो नास्ति परन्तु अवधारणा दर्शनं सिद्धान्तश्च निर्मिताः सन्ति । दर्शनस्यास्य क्रियान्वयनं कर्तुं शक्यते । शक्तिसंरचनायां विद्यमानस्य विभेदस्य अपाकरणाय किं कर्तुं शक्यते इति प्रधानतया अत्र विचारितो वर्तते । अस्माभिः वर्णानां वर्गाणाञ्च अन्तरसम्बन्धस्याध्ययनं क्रियते चेत् वर्गो नाम पूर्णतः आर्थिकावस्थया संपृक्तो विषय आसीत् । नैकासु अवस्थासु विपन्नः सन्नपि निश्चितवर्णे संस्थितेः कारणेन सम्मानप्राप्तेरवस्थावर्तत । इदानीन्तु कस्याश्चिद् निश्चितजातेः कारणेन कुत्रचिदनुकूलविभेदस्य योग्यो भवति, केनचित्तु अनेनैव कारणेन अनायासेन पश्चवर्गे स्थातव्य इति अनुभूताः विषयाः सन्ति । परन्तु सारतः जन्मनः आधारेण वंशजातीयतायाः चिन्तनेन विना व्यक्तेः पात्रतां गुणञ्च विचारितौ सन्तौ अस्माकं कृते आरक्षणं न अपितु संरक्षणस्य उपायः आवश्यको दृश्यते । व्यक्तेः पूर्णविकासस्य विषयस्य अवरोधनस्य बन्धनं समीचीनं नास्ति, सहैव व्यक्तेः, समाजस्य, व्यष्टेः समष्टेश्च समन्वयकारिणः आधाराः समीचीना विषयाः सन्ति ।

सुखं प्रदातुम् एभिः विषयैः निरुह्यमानाः भूमिकाः प्रामुख्यं भजन्ते । व्यवहारे समाजतन्त्रं संस्कृतिञ्च बुद्ध्वा समाजे सहृदयतायाः सम्बन्धं संस्थाप्य शोषितपीडितदलितवञ्चितसमुदायान् एकत्र धारे प्रापयितुं इदानीमपि सम्यक्तया शक्तं नास्ति नोचेत् विभेदमुक्तस्य घोषणायाः अपेक्षयापि क्रान्तिकारिप्रयासः तस्मिन्युगे तत्समये राज्यीयाधिनियमे च विहितो दृश्यते । अद्यत्वे वैधानिकरूपेण नेपाले कस्यचिदुपरि विभेदः कर्तुं न शक्यते । वैदिकमान्यतामनुसृत्य दर्शनेनापि रामायणकालं यावदपि एवं विषयाः प्राप्यन्ते । तेषु नामात्मकपरिचयस्तु आसीत् परं कालाक्रमेण राज्यस्य संरचना सङ्कुचिता जाता । समाजस्य संरचना ततोऽपि सङ्कुचिता बभूव, विभेदाः दृष्टाः । समाजस्य परिधेः परिवर्तनाय अस्माभिः सहृदयतादर्शनं परिकल्पितं

वर्तते । राजकीयस्वरूपेण राज्यराष्ट्रसिद्धान्तोऽवलम्बनीयः । स्थितिगत्यात्मकरूपेण अस्माभिः विचारे विहिते नेपाले समाजस्य वञ्चितस्तरे विद्यमानान् समुदायान् समृद्धान् विधातुमस्माभिः अंशियारवंशियारावधारणायां चिन्तितं वर्तते । अद्यत्वे स्थितिगत्यात्मकप्रगतिवादोऽपि अनेनैव कारणेन अपरिहार्यो वर्तते । पुरुषसुक्तं मनुस्मृतिमन्यान् काञ्चन ग्रन्थान् वा उदाहरणानि गृहीत्वा स्थितिगत्यात्मकविश्लेषणे विहिते अत्र निहितेन विषयेण मूलेन सह अविच्छिन्नेन परं जडतायाः कूपमण्डुकतायाः बन्धनात् सर्वथा मुक्तेन चरित्रेण स्थितिगत्यात्मकप्रगतिवादिव्यक्तौ अवश्यं भाव्यम् । युगसापेक्षचिन्तनम्, प्रमाणप्रमेययोः निरूपणम्, प्रतिमानोपममानयोः नीरक्षीरविवेकश्च तस्य कृते पूर्वाधाराः वर्तन्ते ।

पञ्चमं प्रवचनम्

सम्मेयता असम्मेयता च

स्थितिगत्यात्मकप्रगतिवादस्य विभिन्नानामायामानां चर्चा–परिचर्चासन्दर्भेऽद्य वयं सम्मेयताऽसंमेयताविषयं चर्चयामः । उदाहरणादानसन्दर्भे अद्य बोद्धदर्शनं स्वीकुर्मः । एवं क्रमे अन्येऽपि प्रसङ्गाः सन्दर्भवशेन अत्र समागमिष्यन्ति । नेपाले इदानीं वैचारिकजालस्य प्रकोपः (ideological trap) भृशं वर्धमानो वर्तते । अथ च बौद्धिकतायाः विपर्यये जायमानो बुद्धिविभ्रमः परिस्थितेः परिणामो वर्तते । अस्माकमध्ययनानुसन्धानक्षेत्रमपि सातत्येन शैथिल्यं वहमानं वर्तते । अपि च यद् किञ्चिद् दृढमनुभूयमानमपि तत्र नेपालस्य मौलिकताराहित्यं वर्तते । सत्यामस्यां स्थितौ कथम् अस्माकं स्वत्वबोधकविचारा अग्रे नेयाः कथञ्च विषयेऽस्मिन् चर्चा–परिचर्चा, विचारः, विमर्शो वा विधातव्य इत्यस्मिन् विषये गभीराणिं विचलनानि जायमानानि एव सन्ति । एवंविधघनान्धकारो दूरोत्सादितुं शक्यः वैचारिकविमर्शनेनैव । स्वीयमूलसम्बद्धेन सता वादे वादे जायते तत्त्वबोधः इत्युक्तिवत् स्थितिगत्यात्मकविधेरध्ययनानुसन्धानविचारविमर्शचिन्तनानि वा विधायैव बौद्धिकताक्षेत्रे व्याप्तजालमपनेतुं शक्यते ।

प्रारम्भे तावत् सामान्यप्रसङ्गाद् आरभामहे । एकः कश्चन विदेशात् समागतः पर्यटकः काष्ठमण्डपस्य भ्रमणसमाप्तेरनन्तरं प्रत्यावर्तनार्थं सन्नद्धः तदा अवकाशादानकाले विमानस्थलाद् तस्यातिथेयव्यवस्थापकेन सः पृष्टः– नेपालः कीदृगनुभूतः ? सुष्ठु अनुभूतो भवेत् । यदि मदीयप्रमादः तर्हि तत्र क्षन्तव्योऽहम्

इत्यादिकं किमपि उक्तं स्यात्। तदा सोऽवोचत्– नेपाले सर्वमपि सम्यगनुभूतम् किंतु एको विषयोऽद्यापि नेषदपि ज्ञातः । युष्माकं महानगरे यत्र तत्रापि अहं भूयसा शुन एव अद्राक्षम् तर्हि किमर्थमस्य श्वमण्डपम् (डगूमाण्डु) इति नामकरणं न विहितम् ? क्याट्माण्डु एव कथं विहितम् इति। सन्दर्भेऽस्मिन् दृष्टिपाते अतिनीचवत् उपर्युक्तः प्रसङ्गः प्रतिभाति तथापि सम्मेयता का ? असम्मेयता का इत्यस्य रहस्यमत्रैव निहितमस्ति । तदर्थमेव अयं प्रसङ्ग अत्र उद्धृतः । तेन पर्यटकेन तद् रहस्यं विदितं नासीत् यद् काष्ठमण्डपस्य नामकरणं कुतो जातम् इति। परन्तु एतावदटितेऽपि ज्ञातेन केनापि जनेन न विषयेऽस्मिन् स बोधितः । इदन्तु पूर्वं काष्ठमण्डपमासीत् । ततः काठमाण्डुरभूत् । विशेषतः खससाम्राज्यस्य क्षेत्रं भ्रमेम तर्हि तत्र अन्तिमे माण्डौ माडौ इत्यादिपदयुक्तानि क्षेत्राणि बहूनि सन्तीति जानीमः । अस्यामुपत्यकायामपि काष्ठमण्डपं कथं काठमाण्डौ जातमिति विषयस्य तात्पर्यमजानता तेन अनेन तु डगमाण्डु भवितव्यमासीत् कथमत्रत्यैरेतन्न ज्ञातम् ? इत्युक्तार्थवद् जनेषु तादृशः प्रतीयेत । नेपाल्यां भणितिरपीत्थं वर्तते किल–अहं करोमि आग्राख्यस्थलवार्ता सम्धी करोति गाग्राख्यस्थलवार्ताम् (म गर्छु आग्राको कुरा सम्धी गर्छन् गाग्राको कुरा) इति। विषयप्रसङ्गानुरोधेनैव किमपि वक्तव्यमत्र। आग्रायाः जनश्रुतौ आग्राया एव वार्ता कर्तव्या इति सम्मेयतायाः मान्यता वर्तते। अतोऽस्माकं दार्शनिकप्रणाल्यां साङ्ख्ययोगन्यायवैशेषिकमीमांसावेदान्तादिमूलाधारस्थवैदिकदर्शनानि किं वा बौद्धजैनदर्शनानि वा भवन्तु, तत्र सर्वदापि चिन्तनक्रमे सर्वाधिकं महत्त्वं प्रमाणनिर्धारणार्थमेव दर्शितम् । विचारविमर्शक्रमे तावद् विषयवस्तु एवं मानदण्डाधारमवलम्ब्य एव चिन्तनीयम् । आधुनिकानुसन्धानपद्धतावपि प्रथमं शोधावधारणां (रिसर्च डिजाइन) निश्चित्य एव वैज्ञानिकान्वेषणमग्रे सरति । अस्माकं दर्शनेष्वपि तादृगासीदेव। ईदृग्वार्तायाः बीजानवधारणे एव असम्मेयदोषः समागच्छति। अनेनैव कारणेन बह्व्यः समस्या आपतन्ति।

स्वात्मानं भौतिकं मन्यमानः जन एव वामपन्थप्रचारार्थं बुद्ध अद्य इह भविष्यत् तर्हि शस्त्राणि अधारयिष्यत् इति वदति। तस्योपर्युक्तकथनं असम्मेयतादोषकारणेनैव जातम् । बुद्धस्य जीवनवृत्तं तस्योपदेशाश्च तस्य जीवनकाले एव अतिप्रियेण तच्छिष्येण आनन्दनामकेन उक्ताः । पिटकग्रन्थेषु समाविष्टानां तदुक्तविषयाणां प्रामाणिकत्वं न वेति यदि प्रश्नस्तर्हि तु बुद्धस्योपरि एवोक्तप्रश्न इति स्पष्टम्। यया

कयापि दृष्ट्या यदि पश्यामः तर्हि बुद्धः इदानीन्तने काले अभविष्यत् तर्हि सः शस्त्राणि धारयेदिति वचनं तु तस्यापमानजनकमेव । बुद्धः नेपाले एव जनीमलभत । एतस्माद् हेतोः महत्सम्मानं श्रद्धा च तस्योपरि । परं अधुनातन वामपन्थसंज्ञाधराः तु बुद्धानुयायिन एव इति भ्रमोपपादनं महल्लाभकरं भवेदित्येतादृशवैचारिकजाल-दृष्टिदोष-मतिभ्रमादिवितानार्थमेवोपर्युक्तं सर्वं कथनमिति तु निश्चप्रचम् । केन सह कस्य तुलनं विधेयम् ? कीदृशाः विषयाः सिम्मेट्रिकलसंज्ञका भवन्ति ? के तथा न भवन्ति ? एकस्मिन् कन्टिनियमेन सहैव स्थापयितुं शक्येत वा न वा ? किं तद् इति अज्ञातत्वात् यद्वा कथितमेव वा इत्येतादृशं नेपाले बहु प्रचलितम् । कौटिल्यस्याथवा चाणक्यस्य प्रसङ्ग आगतश्चेत् पूर्वस्य मेक्याबेली इति वदन्ति । यदि बुद्धस्य विषयः समागतश्चेत् लाइफ अफ एसिया इति तं वदन्ति । आभ्यां कस्मिन् क्षेत्रे कार्याणि विहितानीति अविचार्यैव ईदृशानि कथनानि आगतानि भवन्ति । अयञ्च विषयः सुमहद्दोषपूर्णो वर्तते ।

अस्य आन्तरिकी मान्यता (इन्टरनल भ्यालिडिटी) कियती अस्ति इति विचारणीयम् प्रथमम् । यथा–बुद्धस्य विषयविमर्शे बुद्धः भौतिकवादी इति गदितुं शक्यं न वा इत्येतदर्थं तु बौद्धदर्शनं विलोकनीयं किल । बौद्धदर्शनेऽपि पर्याप्ततया विविधता वर्तते । बहुविधाः सम्प्रदाया अपि सन्ति तत्र । थेरवादि-महायानि-वज्रयानिनां मध्ये च द्वन्द्वस्तु दृश्यरूपेणैव समतले वर्तते । वस्तुतस्तु थेरवादिनोऽतिसङ्कुचिताः भवन्तीत्यतः महायानिवज्रयानिनावालोचनीयाविति कृत्वा भृशमालोच्यालोचनसम्बद्धपक्षाद् एव कतिपयांशान्नादाय स्वात्मानं भौतिकवादिं मन्यमानाः धूर्तास्तु बुद्धोऽपि भौतिकवादी एवेत्युक्त्वाऽसम्मेयताया उदाहरणं प्रदर्शितवन्तोऽपि प्राप्यन्ते । एवं सति सामान्याः साधारणा वा जनाः भ्रमे निमग्ना भवन्त्येव । सुनियोजिततया संस्थागतरूपेणैव सत्तातन्त्रेऽवस्थिताः जनास्तु सभासम्मेलनगोष्ठीत्यादिषु एतादृशदुष्प्रचारं कारयेयुस्तर्हि तु सर्वसाधारणाः भ्रमिता भवेयुरेव इत्यत्र न संशयलेशोऽपि । विशेषतो पालिभाषामूलकपिटकग्रन्थेऽवस्थितविषयाणां बुद्धेन सह सम्बन्धस्तु सर्वथापि असन्दिग्ध एव । भौतिकवादिभिः छलेन वञ्चनेन वा बौद्धदर्शनविषये समूलं विहितदुष्प्रचारच्छेदकास्तादृशाः विषयाः सन्ति पिटके ग्रन्थे । बुद्धः खलु न कस्यचन व्यक्तिविशेषस्य एव संज्ञा अपि तु समग्रतया जागतिकसर्वविधक्लेशान्नुच्छिद्य ज्ञातदुःखोऽवगततद्कारणो

ज्ञाततदुपायस्दुःखजन्ममरणादिभ्यः सर्वथा मुक्तश्च व्यक्तिविशेष एव तां संज्ञां भजते । वस्तुतस्तु बुद्धो नाम पदमेव । पूर्ववर्णितसकलगुणविशिष्टा अनेके बुद्धत्वमलभन्त । स्वयं सिद्धार्थगौतमोऽपि बुद्धत्वमलभत । अस्यैव प्रवचनेषु स प्राक्कालिकानां सप्तविंशतिसंख्यकानां बुद्धानां विषये उवाच, एवमेव अनागतेऽपि काले इत्थमेव बुद्धत्वङ्गता अनेके जनिष्यन्ते इत्यपि अवोचत् । तस्य जन्मनो विषये वक्तव्येऽपि स बोधिसत्त्वसम्पन्न एव । गर्भप्रवेशविषयेऽपि उक्तं वर्तते । मायादेव्या दृष्टस्वप्नविषयेऽपि उक्तं वर्तते । स तु तुषितदेवलोकात् श्वेतगजरूपेण मायादेव्या गर्भे प्रविष्ट इति विषया अपि सन्ति । इमे विषयास्तु थेरवादिभिरपि निषेद्धुमशक्यास्तथापि स्वात्मानमाधुनिकभौतिकवादिं मन्यमानाना स्वयं बुद्धेनोपदिष्टपिटकग्रन्थोक्तविषयापव्याख्यानमपि बुद्धस्यैवापमानं वर्तते । बुद्धोक्तविषयेषु अविश्रम्भं प्रदर्श्य वयं बुद्धं सम्मानयामः अथवा बुद्धेन एवमुक्तमासीत् इत्यादिकथनं तु तेषां कापट्यम् आहोस्वित् छलमेव ।

कौण्डिन्येन स्वप्नफलवर्णनक्रमे तादृश एवान्यप्रसङ्ग आगच्छति । सिद्धार्थगौतमबुद्धः जम्बीरवृक्षस्याधः प्रथमं ध्यानमलभत । तदा वृक्षच्छाया स्थिरा बभूव । आधुनिकाः स्वात्मानं भौतिकवादिं मन्यमानास्तु स्वर्गनरकपापपुण्यप्राक्जन्मपुनर्जन्मादीनि अवैज्ञानिकानि सन्ति, तद् सर्वं व्यर्थकल्पनामात्रमिति वदन्ति । पश्चादेव उपर्युक्ता विषयाःतत्रान्तर्भाविता इत्यपि वदेयुस्ते । परन्तु बुद्धः स्वयमेतादृशविषयान्नुवाद । बुद्धेनानुक्ता विषया अपि सन्ति । यथा- ईश्वरविषये बुद्धेन स्पष्टतया किमपि उक्तं न लभ्यते । अस्य विषयस्य व्याख्याने ये श्रोतुं सन्नद्धाः न सन्ति तेभ्यः कथनस्य अनौचित्यमेव इति विचार्य नोक्तम् इत्यपि वदन्ति । परन्तु कतिपयविषयाः तादृशाः सन्ति यत्र बुद्धो मौनमाचरितवान् । कतिपयविषयेषु स्पष्टतयापि उवाद । स्वर्गनरकपापपुण्यप्राग्जन्मपुनर्जन्मादिविषयाः तस्य ज्ञानेनासम्बद्धा न सन्ति ।

बौद्धदर्शने प्राणिनो चित्तम् अथवा मनः विज्ञानमिति कथ्यते । विज्ञानशब्दस्य अधुनातनार्थः बुद्धकालिकार्थश्च पृथक् वर्तते । किञ्च वैदिकशास्त्रे विहितार्थस्य तस्य आधुनिकार्थेन सह साम्यं विलोक्यते परन्तु बुद्धेन तु पृथक् सन्दर्भे विज्ञानशब्दस्य प्रयोगः निदर्शितः । बौद्धमते चित्तं अपरजन्मलाभार्थं अन्यत्रैव अथवा पुनर्जन्मलाभार्थं प्रक्रियायां लगति । इदमेव बुद्धस्य विज्ञानम् ।

एतादृशादृष्टविषयकथनं कथङ्कारमपि विश्वासानर्हमेव भवेद् इत्यादिकं वचनं तु बुद्धस्योपरि अनास्थाधायकमेव। आधुनिकैः भौतिकवादिभिः असम्मेय-अवाञ्छित-अनुचित-अप्रासङ्गिकरीत्या च विवादे बुद्ध आकृष्ट इत्यत्र तु इदमेव दृढं प्रमाणम् । अपि च स्वयं गौतमबुद्धेनापि तत्कालिकभाषायां लोकायताभिधेभ्यः अधुनातनभौतिकवादेभ्यस्तु मिथ्यादृष्टिरेवेत्युक्तम्। बुद्धेन स्वयमेव भौतिकवादो नाम मिथ्यादृष्टिरेव इत्युक्तवचनं छायायां पातयित्वा गौतम बुद्धस्तु भौतिकवादी इति कथनं तु असम्मेयता एव न कापट्यद्योतकमपि वर्तते। अन्येषां भ्रमोपपादनार्थं दृष्टिदोषयुक्तं रोगग्रस्तमेव तद्, एवमेव बौद्धिकनाम्नि बुद्धिविलासरुजोयुक्तञ्च । स्टालिनेन समाजविकाशस्य क्रम इतः परमित्थं लेखनीयम् इति कृत्वा निर्मितसिद्धान्ताधारे धावितोश्ववत् तथाकथितबौद्धिकैः विधीयमानभ्रमजालमात्रम् । अपि च इमे तु आइडोलोजिकल ट्राप इत्येतदर्थं यद्वा तद् वा कार्यं कुर्वन्ति इति कथनस्य एकमुदाहरणरूपम् । अपरा च वार्ता- आधुनिकभौतिकवादः केवलमेकं प्रत्यक्षप्रमाणमेव मनुते। गौतमबुद्धस्तु स्पष्टतया प्रत्यक्षम् अनुमानञ्चेति प्रमाणद्वयं मनुते । इदानीन्तनभौतिकवादस्यैव प्राक्तनचार्वाकः अथवा लोकायतसंज्ञा अस्ति। इदानीं विलोकिते सति मार्क्सप्रभृतिभौतिकवादिनां कथने एव भौतिकवादस्य पर्याप्तता नास्ति।

सिद्धार्थगौतमेन वैशाखपूर्णिमायाः रात्रावेव युगपद् बुद्धत्वं न लब्धमासीत्। किंतु तेन रात्रेः प्रतिप्रहरं क्रमेण द्वितीयतृतीयचतुर्थावस्थासु एव बुद्धत्वम् प्राप्तमासीत्। एतद् रहस्यं तु थेरवादिभिरपि सम्मान्यपिटकग्रन्थेभ्योऽपि अवगन्तुं शक्यते। इत्थञ्च विविधावस्थाप्राप्तौ तेन समाहितचित्ते मलरहिते परिशुद्धे क्लेशरहिते च जाते प्राग्जन्मस्मृतिरपि कृता आसीत्। स प्राग्जन्मनि किं किं जातमासीत् इत्यादिविषयाणां तदा ज्ञानमलभत। एकस्मिन् जन्मनि सः शुकः अभवत् तदा वने दावाग्निः जातः। अन्यप्राणिपलायिते सत्यपि सः शुकः स्वकीयचञ्चौ जलमाहृत्य कथं स्वीयकर्तव्यं पर्यपालयत् इति प्रसङ्गः स्वयं बुद्धेनैवोक्त इत्यपि आगतम् वर्तते। ज्ञानहेतोरेव तस्य अविद्यान्धकारो विनष्टः । स मनुष्यदृग्गोचरातीतविशुद्धदिव्यचक्षुषा च उत्पन्नान् जीवान् अपि च स्वीयकर्मानुसारेण तान् सुवर्ण-दुर्वर्ण-सुगति-दुर्गतिषु च धावतः -प्राणिनः दृष्टवान् । अत्र बौद्धदर्शनस्य प्रतीतसमुत्पादवादसिद्धान्तस्य सारः समागतोऽस्ति। प्रतीत्यसमुत्पादो भौतिकवाद एव इति कथनं तु अतिशयमौढ्यम्।

तस्मात् प्रतीत्यसमुत्पादसिद्धान्तं यदि निष्काशयामस्तर्हि बौद्धदर्शनं कुत्र तिष्ठेत् ? प्रतीत्यसमुत्पादज्ञानार्थं वैदिकपद्धत्यनुसारं कर्मसिद्धान्तेन सह तस्य तुलना शक्या कर्तुम्। किन्तु किं तद् भौतिकपरिघटनामात्रं वा ? न तथा। तस्य मूले भौतिकपरिघटनाः न सन्ति। भौतिकपरिघटना न प्राथमिकी। तदनन्तरं स बुद्धः जन्मनो मरणस्य च ज्ञानं लब्धवान्। ततः कामस्रवभवाश्रवाविद्याश्रवेभ्यः चित्तं सर्वथा विमुक्तम्। अनन्तरमेव जन्म क्षीणं जातम्। ब्रह्मचर्यं च पूर्णम्। अवश्यकर्त्तव्यस्य कर्मणो कृतत्वात् पुनर्जन्मनो न किञ्चन कारणम् अस्ति इति बोधानन्तरमेव बुद्धत्वलाभक्रमे अग्रेसरो भवति सः।

एतादृशकारणज्ञानसंप्राप्त्यनन्तरं चतुर्थप्रहरे एव तस्य निर्वाणधातुबोधः अभूत्। ततः बुद्धत्वलाभो जातः। बुद्धत्वलाभप्रक्रियायामेव दृष्टिपाते सति बुद्धो भौतिकवादी इति वदतां जनानां बुद्धिविलासस्य एवमेव दुष्प्रचारस्य अथवा वैचारिकजालस्य च रहस्यं स्वतः स्पष्टीभवति। बुद्धत्वप्राप्त्यनन्तरकालिकी अवस्था ऋद्धिप्रतिहार्याख्या। तस्य जीवनस्याभिन्नाङ्गं किल ऋद्धिप्रतिहार्याख्यम्। तस्य धर्मदेशनायां जगदिदं न केवलम् अस्माभिः परिदृश्यमानं सौर्यमण्डलमेव परन्तु अस्मात् परमपि वर्तते इत्यपि विषयः स्पष्टतया समागतः। असङ्ख्याः ब्रह्मेन्द्रादिदेवता अनेकरूपेषु वर्तमानाः सन्ति। गोचारागोचरशक्तयः कार्याणि कुर्वाणाः सन्ति इत्यपि आगतं वर्तते। भगवताबुद्धेन उपदिष्यमानकाले विविधलोकेभ्यः जीवाः समागत्य तमुपदेशं गृहीतवन्तः। स देवान् उद्दिश्य साङ्केतिकभाषया धर्मदेशनाया उपदेशं दत्तवान् इत्यादिविषया अपि वर्तन्ते। हीनयानी तु निकुञ्चितमानसिकतां विधाय महायानिवज्रयानिविनिन्दनप्रसङ्गाद् किमपि उद्धृत्य आधुनिकभौतिकवादिं मन्यमाना कम्युनिस्टपदवाच्या वामपन्थिप्रभृतयोऽसम्मेयस्योद्धरणं प्रयुक्तवन्त इति स्पष्टतया दृश्यते। कस्मिन् सन्दर्भे वार्ता विहिता इति अविज्ञायैव जनः सन्दर्भान्तरं प्रविशति चेत् सम्मेयता न भवति। तस्य कृते आवश्यकं प्रमाणमेव न ज्ञातं तेन। अथ च प्रमाणप्रमेययोश्च तारतम्यं न मिलति चेत् यथार्थज्ञानं न कदापि जायते। तस्मात् आधुनिकभौतिकवादीनां कथनम् अयुक्तम्। बुद्धेन उपदिष्टेषु विषयेषु पञ्चशीलोपदेश ह्यतीव महत्त्वाधायकः। स्वकीयसकलानुयायिभ्यः कार्यदायकाः मार्गनिर्देशनकराश्च पञ्चसङ्ख्यकाः नियमाः तत्र निर्मिताः सन्ति। ये नियमाः तान् बौद्धान् कुर्वन्ति। यः कोऽपि जनः अहं बुद्धं शरणं गच्छामि, बुद्धस्यानुयायी भवामि इत्युक्त्वा च प्रतिबद्धतां

विधत्ते चेत् तस्य कृते उच्यमानानि पञ्चवचनानि सन्ति । यथा- "पानाति पाता वेरमनि सिख्खा पदम समाधियामी" अर्थात् प्रथमम् अहं प्राणिहिंसारहितां शिक्षां गृह्णामि । द्वितीयञ्च "अदिन्नदाना वेरमणि सिख्खा पदम समाधियामी" अर्थात् अहम् अस्तेनकारिणीं शिक्षां गृह्णामि । तृतीयञ्च " कामेसु मिच्चाचारा वेरमणि सिख्खा पदम समाधियामी। अर्थात् अहं अव्यभिचारिणीं शिक्षां गृह्णामि। चतुर्थञ्च "मुसवादा वेरमणि सिख्खापदम समाधियामि"। अर्थात् अहम् अनृतवादिनीं शिक्षां गृह्णामि। पञ्चमं " सुरा मेरय मज्जा पमादठाना वेरमणि सिख्खापदं समाधियामि। अर्थात् अहं मद्याग्राहिणीं शिक्षां गृह्णामि इति। यदि एतावदेव पश्येम तर्हि अत्र तु भौतिकस्य जगतो आचार-व्यवहारविषयाणां सन्निवेशो वर्तते।

एतदनन्तरं प्राणिनामहिंसने प्राप्यमाणदशफलविषये उक्तं वर्तते । अव्यभिचारकरणे सप्तफलानि उक्तानि सन्ति। अनृतभाषणस्य पञ्चफलानि उक्तानि। मद्यपान-सुरापानादि-अकरणस्य नवफलानि उक्तानि सन्ति। नैतावन्मात्रम्, अपितु विपापाद् अर्थात् पापाचरणात् स्वर्गं प्रति गन्तव्यम् यद्वा नरकं प्रति गन्तव्यं भवति, पुनर्जन्म च कतिविधम् ? जाते च पुनर्जन्मनि कां योनिं प्राप्नुमः ? कथञ्चेतद् भवेत् इत्यादिकं सर्वमपि तत्र उक्तं वर्तते। प्राणिनां विहिंसने एकोनविंशविपापानि उक्तानि। चौर्ये च सप्तविधविपापानि उक्तानि। अनृतभाषणे च सप्तविधविपापानि उक्तानि। मद्यपाने सुरापाने वा विंशतिविपापानि उक्तानि। न केवलं भौतिकपरिघटनासु एव सम्बद्धानि भवन्ति विपापानि, न च लौकिका एव विषया सन्ति तत्र, अपि तु स्वयं बुद्धेन आत्मपरमात्मनोरमरत्वादिना सहैव ईश्वरीयसत्ता मन्तव्या भवति इत्यप्युक्तम्। आधुनिकभौतिकवादिभिः किं शाठ्यं विहितमिति चेद् तत्र समागता प्राग्जन्मपुनर्जन्मपुण्यपापरीतिप्राप्त्यादिविषया पश्चात् बौद्धैः समाविष्टा इति उक्तम्। सति सम्भवे ब्राह्मणैः प्रक्षिप्ता इत्यपि ते वदेयुः। तेषां मतौ अन्धविश्वास एव उपर्युक्तं सर्वम्। अतः तान् विषयान् दूरोत्सादितुं चेष्टन्ते भौतिकवादिनः। परन्तु इमे विषयाः बौद्धदर्शनस्य बीजभूताः सन्ति। यदि प्रतीत्यसमुत्पादवादं त्यजामस्तर्हि तु बौद्धदर्शनस्य मूलभूताः विषया एव त्यक्ता भवन्ति। अथ च वयमत्र विचारयामः- तैराधुनिकैः भौतिकवादिभिः बुद्धः भौतिकवादी इत्युक्त्वा बुद्धं प्रति सम्मानं प्रकटयितुमीप्स्यते अथवा बुद्धेन सह तस्य सिद्धान्तस्य सबीजं मूलोच्छेदयितुं ईप्स्यते ? एतावता बुद्धस्य स्थाने कार्लमाक्स, लेनिन, स्टालिनप्रभृतीनां आसीनार्थं बृहदाकारकस्य षड्यन्त्रस्यैव

एक अंशः उपर्युक्त इति ज्ञायते । ते अनेकविधाः सन्ति । केचन वैदिकपरम्पराया ग्रन्थानां विरोधे सम्लग्नाः सन्ति । केचन छद्मरूपेण बौद्धसदृशाः भूत्वा बुद्धमेव विनाशयितुं चेष्टन्ते । एते तु अत्रत्यवैदिकसनातनपरम्परान्तर्भूतमष्टोपूजकान् एवं शैवशाक्तवैष्णवान् तथैव बौद्धकिराँतवोनजैनाँश्च समाप्य द्वन्द्वात्मकभौतिकवादस्य सिद्धान्तकारस्यैव आधिकारिकत्वं सन्दर्शयितुं यतमानाः सन्ति । ईश्वरो न विद्यते । यदि वर्तेत तर्हि इदानीं मार्क्स एव ईश्वरपदवाच्य इति कथयतां तेषां सत्ता अत्रैव वर्तते । कतिपयबौद्धा अपि विषयमिममज्ञात्वा अहो महत्या शक्त्या अस्माकं साहाय्यं विहितं बुद्धञ्च भौतिकवादिनं वैज्ञानिकञ्चकार इत्यादिकमपि मन्येरन् । परन्तु दुःखरूपेणावस्थितप्राग्जन्म-पुनर्जन्मचक्रस्य मूलोच्छेदयितुं तत्रोक्तविषयं प्रति अविश्वासप्रकटनं, तत्र पश्चात् प्रक्षिप्तमिति कथनं, एवमेव मूलाद् पृथक्कृत्य बुद्धमङ्गीकरोमि इति कथनञ्च बुद्धं प्रति अविश्वासप्रकटनम् अमर्यादाप्रदर्शनम् अथ च द्रोहतुल्यमेव । बुद्धं बुद्धधर्मं तद्दर्शनञ्च विनाशयितुं कतिपयजनाः बुद्धो न धर्मः, अपि तु दर्शनमेव, इत्येतादृशं तर्कं प्रस्तुवन्ति । बुद्धं शरणं गच्छामि, धम्मं शरणं गच्छामि, सङ्घं शरणं गच्छामि इत्येतेषु त्रिरत्नेष्वपि आक्रमणेषु सत्स्वपि बौद्धाः विद्वांसः तन्निराकरणार्थं अथ च तत्प्रतीकारार्थं वा न सन्नद्धा इति चेत् वृको वन्यजीवानामाखेटाद् पूर्वं सुखदमर्दनं विधाय अनन्तरं स्वाहारं करोति इति कथनस्य तार्पर्यमजानन्त इव ते दृश्यन्ते । बुद्धो भौतिकवादी इति कथनं तु बुद्धस्य दर्शनं, धर्मः, ज्ञानमार्गः, पन्था च इत्येषां विनाशनार्थं प्रयासरूपमेवेति ज्ञातव्यं भवति । बुद्धिविलासवैचारिकजालसन्दर्भे एवमेव कतिपयजनानाञ्च सन्दर्भे असम्मेयतादोषहेतुना एव बह्व्यः समस्या आपतिताः सन्ति ।

अनित्यदुःख-अनात्मशब्दा अवश्यमपि बौद्धदर्शनस्य महनीया विषयाः । परन्तु एतान् अज्ञात्वा अथवा कलुषितमनसा यथेच्छार्थापनं तु अवाञ्छितप्रयासमात्रम् । प्रतीत्यसमुत्पाद- ऋद्धिप्रातिहार्य-पञ्चशीलादिविषयाः बौद्धदर्शनस्य सारभूताः सन्ति । चतुरार्यसत्यानि, आर्यआष्टाङ्गिकमार्गञ्च यदि वयं सूक्ष्मतया पश्यामस्तर्हि यं भौतिकवादं वदन्ति, तेन सह कदापि साम्यं न पश्यामः । अस्माकं मान्यतायां तु बुद्धो महावीरोऽथवा वैदिका ऋषयो वा किं न स्युः । इमे तु न कदापि त इव जीवनजगतोः भौतिकाभौतिकरूपेण द्वेधा विभागं विहितवन्तः । अस्माकं तु जीवनं भौतिकं दैविकमाध्यात्मिकञ्च वर्तते । बुद्धस्य

दर्शनदृशा यदि पश्यामस्तर्हि निर्वाणस्य लक्ष्यमस्ति । वैदिकदर्शनदृशा पश्यामस्तर्हि मोक्षेण सम्बद्धत्वाद् प्रकरणानुसारेणैव विचाराः प्रवृत्ताः सन्ति । यदि सन्दर्भं हित्वा तदंशं पृथगाशये प्रयुज्येत तर्हि न कदापि तस्य तात्पर्यं सङ्गच्छते । यथा विज्ञानवादो बौद्धग्रन्थेषु यस्मिन् सन्दर्भे आगच्छति स च यथायथं अधुनातनं विज्ञानं (सायन्स) वर्तते इति वदामस्तर्हि तु असम्मेयता एव भवति । कणादः वैशेषिकदर्शनस्य सूत्रकारः । स च परमाणुपदार्थं चिन्तयामास । यश्च इदानीन्तन एटम, सब-एटमिक पार्टिकल इत्याख्येन पदार्थेन सह यद् किञ्चिद् साम्यं भजते । एका अवधारणा समाना इत्याधारेण तद्सारभूतं वस्तु अगृहीत्वा प्रारम्भे वैशेषिकदर्शनं भौतिकवादि आसीद् इत्यपि कैश्चिद् कथितं विलोक्यते । यद्यपि कार्लमास्केन कृतस्य हिस्टोरिकल म्याटेरियालिजम एवं डायलेक्टिकल म्याटेरियालिजम इत्यनयोः चर्चा-परिचर्चयोः स्वीयस्थाने महत्त्वं वर्तते परन्तु तस्य तात्पर्यं मार्क्सपूर्वं ये दार्शनिकाः सन्ति तेभ्यः तस्य श्रेयो मिलति । यद्वा विरुद्धपक्षस्थापने चेष्टनं तु द्विदलयुत-बाइनेरी-चिन्तनग्रस्तम् अनधिकृतम् अथ च अवाञ्छितमेव । एतद्सर्वं बुद्धिविलासिनां कृत एव मनोरञ्जकं भवेत् परन्तु सारतस्तु एतेन दार्शनिकस्तरे न खलु कार्यं क्रियते । एतच्च न खलु स्थितिगत्यात्मकप्रगतिवादस्य ध्येयम् । प्रत्येककथनस्य अन्तःप्रामाण्यार्थम् अधुनातनानुसन्धानेन तादृशान् विषयान् निधाय अग्रे गमनीयं भवति । वयम् ईदृग्विसङ्गतिं नेपाले बहुत्र पश्यामः । यथा- अस्माकम् इतिहासे सामन्तपदं कस्यां परिस्थितौ कीदृक्पदम् इति अविचार्यैव अन्यसमाजस्य फ्युडल लर्ड (feudal lord) इत्यस्य तुलनेन अनूदितः । अयञ्च असम्मेयतादोषवशाद् आगतो विषयः । अनेन अस्माकं इतिहासो विकृत्य प्रस्तुतः । अस्य परिष्करणं अद्यत्वे नितान्तमावश्यकं संवृतम् । समाजस्य विकासक्रमे (feudal lord) इति कथनार्थं पृथग् शब्दो निर्मातुं शक्येत । परन्तु सकारात्मकलक्षणार्थे प्रयोगार्हसामन्तपदस्य अनुचितार्थे प्रयोगदोषो दृश्यते । अथ च खस-आर्ययोः पारस्परिकतौलनं नेपाले जायमान-असम्मेयतादोषस्यैव एकमुदाहरणमस्ति । एवञ्च गुणवाचकजातिवाचकशब्दयोर्मध्ये असम्मेयप्रयोगं विधाय आर्यः गुणवाचकः शब्दो वर्तते चेद् खस-किरात-मङ्गोल-इत्यादयो जन्मन आधारे कृतजैविकविभागस्य एकत्रैव संयोजनम् उपयुक्तं वा ? अथवा खसस्तु भौगोलिकविषय इत्यपि कतिपयजनाः मन्यते इत्यपि आगतं वर्तते । नेपालमण्डलस्य वार्तायामपि वयं द्रष्टुं शक्नुमः । नेवारस्तु नेपालमण्डले निश्चितप्रक्रियया

समाहिता जातिर्वतते । तां जातिमादाय आर्येण मङ्गोलेन च सह तौलनं तु बौद्धिकस्तरदृशा हास्यास्पदम् एव न, अपि तु खस-आर्यौ पृथक्भूतौ इति कथनार्थं महद्षड्यन्त्रमपि निहितं वर्तते तत्र । एवञ्च अधुना किराँती लिम्बू च पृथक् वर्तेते, मङ्गोलाख्याश्च के ? इति विषयमादाय नेपाले विविधसंज्ञानां प्रमाणं प्रमेयञ्च किम् ? कस्माद् सन्दर्भात् ते विषयाः अत्र आगता ? इति अविज्ञाय परस्परतौलने तु दोषा स्युः । यश्च नागरिक-राजनैतिकाधिकारस्तु राज्यस्य विषयो वर्तते, एवमेव सामाजिकसांस्कृतिकाधिकारस्तु समाजस्य विषय इति न ज्ञातवान् स एव अनाधिकारम् अतिक्रमते । एतच्च सहस्राधिकवर्षेभ्यो जायमानव्यवहाराद् सहजरूपेण संस्कृतिषु संमिल्य समागतमस्ति । कुत्र गमने किं कर्तव्यम् ? कुत्र गमने च उपानहौ धारणीयौ ? कुत्र गते सति उपानहौ वर्जनीयौ इति अवगतमस्ति वा ? महायज्ञस्थले प्राप्ते सत्यपि टाई उपानहौ चं धृत्वा केचन अवसरसङ्गतेः लाभं प्राप्य यज्ञाग्नौ हवनमपि कुर्वाणाः दृश्यन्ते । पदेन स्वयं महान् अस्मि इत्यपि न मन्तव्यं खलु । स्वस्य बौद्धिकताया विकासोऽपि आवश्यकः । तस्य भोजनपानादिकञ्च कथं वर्तते ? सङ्गतिश्च कैः सह ? वैश्विकदृष्टिकोणश्च कीदृशः ? इत्यादिविषयाः महान्तं प्रभावं तदुपरि प्रकुर्वन्ति । वयमेव इदं विचारयामः यद् अधुनैव शिशुकक्षायामधीयानान् छात्रान् प्रति यदि स्नातकोत्तरस्तरे अधीतपाठं पठित्वा श्रावयामस्तर्हि ते छात्रा अवश्यं वदेयुः- कीदृगनर्थकप्रलापं विदधाति अयं जन इति । तद्वद् स्वात्मानं भौतिकवादिं मन्यमानैस्तु बौद्धदर्शनं पठित्वापि अनवबोधे कारणं तु सदोषं तैः धृतमुपनेत्रमेव । थ्रिडि चलचित्रदर्शनार्थं थ्रिडि उपनेत्रमेव धारणीयं भवति । यदि मार्क्स-लेनिन-स्टालिनानां विचारधाराया उपनेत्रं धृत्वा बौद्धदर्शनं ये पश्यन्ति तैरेव तत्र दोषप्रदर्शनं तु न महद्विषयः । उक्तिरपि प्रसिद्धा वर्तते यद् "दोषो ह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते" इति । दोषाभावेऽपि दुष्टो जनः दोषमन्विषति । द्वन्द्ववादी तु अहो वराकः । स तु समाजवादिभ्यः परं न कदापि जानाति । वैदिक-जैन-बौद्धादिदर्शनानि येन सम्यक् ज्ञातानि सन्ति तेन भौतिकदैविकाध्यात्मिका सर्वेऽपि विषया अवश्यमपि अवगता एव सन्ति । न तु तान् निषेधति । परन्तु मार्क्सवादस्य अङ्गवस्त्रं परिधाय धावमानास्तु तद्तत्त्वं न जानन्ति अथवा ज्ञात्वापि दुराशयं प्रदर्शयन्ति । एतादृशजनस्तु वैचारिकजालकारकयोजनायाः दूत अस्ति । अतः सर्वसाधारणजनानां बुद्धिविपर्ययार्थं तत्परो भवति । अस्मद्तुल्यं वैदिकबौद्धकिराँतजैनाख्यादिमहासभ्यतासु एकस्यैव

विषयस्य न अपि तु समेषां जनानां कृते तौलनिकाध्ययनार्थं लाभकरं सौभाग्यं न मिलति। अथ च पाश्चात्त्यानां सर्वविषयाणां सन्दर्शनावसरलाभोऽपि अस्ति। पाश्चात्त्यमपि नैकविधम्। यदि पाश्चात्त्यकथनेन कतिपयजनाः भौतिकवादी इति वदेयुः तर्हि ते तु द्विदलतुल्यविचारेण (दुई फब्लेटे चिन्तन) भृशं पीडिता इति बोद्धव्यं भवति। कमपि समाजं, कामपि जातिं कमपि समुदायञ्च एकस्यामेव संरचनायां नेतुं तस्य दृष्टिकोणः द्विदलसदृशदोषग्रस्त एव।

प्रत्येकं समाजे दुर्जनाः सज्जनाश्च भवन्ति। प्रत्येकसमाजे भौतिकवादिनोऽपि जायन्ते मानसवादिनस्तथैव अध्यात्मवादिनश्च। स जनः स्वात्मनि विद्यमानं ज्ञानं शब्दमाध्यमेन कथं व्यक्तीकरोति इति महत्त्वपूर्णम्। यदि अस्माकं क्षेत्रं पश्यामस्तर्हि मीमांसादर्शनस्य आचार्यः कुमारिलभट्टः अधुनातनभौतिकवादिभिरुच्यमानविषयैस्सह तर्कानुग्राहकप्रत्यक्षप्रमाणं प्रमाणानां मूर्ध्नि राजते इत्युक्तवान्। अस्य च समग्रं व्याख्यानं चकार। एवमेव युक्तायुक्ताश्च के ? इत्यपि युतं सन्तुलनं तत्र। अर्थात् क्व गते सति अन्यप्रमाणं प्रति गन्तव्यम् कुत्र च श्रुतिप्रमाणं प्रति गन्तव्यम् ? धर्मस्य कृते किं प्रमाणम् ? विज्ञानस्य कृते किं प्रमाणम् ? इत्यपि सन्तुलनं तत्र। अस्माकं वैज्ञानिकतायुक्तधर्मः, धार्मिकतायुक्तविज्ञानञ्च इत्युभयस्य कथनस्य तात्पर्यं तु धर्मः विज्ञानञ्चैकमेव इति कथयतां कतिपयजनानां वचनवद् नेति ज्ञातव्यम्। न खलु धर्मः विज्ञानञ्च एकम्। धर्मः विज्ञानञ्च एकमेवेति कथने असम्मेयतादोषः स्यात्। किन्तु धर्मविज्ञानयोर्मध्ये द्वन्द्वेन भाव्यम् अथवा विरोधेन भाव्यम् इत्यत्र सर्वथा हेत्वभावो वर्तते। धर्मस्य स्वीया पद्धतिः (मेथेडोलोजी) अस्ति। विज्ञानस्य च स्वीया पद्धतिः वर्तते। यावत्पर्यन्तं प्रत्यक्षप्रमाणम् धावति अथवा विज्ञानञ्च धावति तावद् पर्यन्तं तु सत्यज्ञानस्यैव प्रामुख्यं भवति। भौतिकपरिघटनायाः (फिजिकलफेनोमेना) व्याख्यानार्थं तु भौतिकविज्ञानमेव (फिजिकल साइन्स) नितान्तम् आवश्यकम् भवति। परन्तु तेनैव सर्वान् विषयान् व्याख्यास्यामि इति वदति चेद् तु तद् कदापि युक्तियुक्तं न भवति। पूर्वमपि लोकायतिका आसन्। ते तु मिथ्यादृष्टियुता इति बुद्ध एव अवोचत्। बुद्धः स्वयं भोतिकवादिनं मिथ्यादृष्टिमन्तं उवाच तर्हि बुद्धो भौतिकवादी इति कथनं तु बुद्धस्यापमानं तदुपरि असम्मानं अपि च द्रोहतुल्यञ्च तद्। जीवनजगतोः भौतिकपक्षस्य विद्यमानत्वाद् बुद्धेन भौतिकवादसम्मता विषया अपि उक्ताः। एवमेव तेन मार्क्सवादः, विज्ञानवादः अध्यात्मवादः निर्वाणम् इत्येतादृशवादसम्मतविषया

अपि उक्ताः । तथाकृतत्वाद् एव स सुगत इति नामभाक् । कतिपयजनास्तु स सर्वज्ञ इत्यपि अवोचन् । अस्माभिस्तु तस्य प्रमाणप्रमेयविमर्शो बोद्धव्यः । तदैव अस्माभिप्रस्तुतविचाराः तर्कपथि आगच्छेयुः । एवं कृते न बुद्धिविलासमात्रमपि तु बौद्धिकोऽपि भवति विचारः । सः तर्कानुग्राहको हितकारी च भवति । तदा तु वयं वैचारिकजालस्य मताग्रहाद् सर्वथा विमुक्ता अपि भवितुं शक्नुमः । बुद्धस्य धर्मचक्रवद् अस्माकमपि सहृदयताचक्रम् घनान्धकारं समूलं लुनाति । परन्तु अस्य शस्त्रास्त्रस्य प्रयोक्त्रा स्थितिगत्यात्मकप्रगतिवादस्य प्रमाणप्रमेयपद्धतेः प्रबोधलाभः परमावश्यकः । स्थितिगत्यात्मकप्रगतिवादे आधिभौतिक-आधिदैविक-आध्यात्मिक-सर्वेऽपि आयामाः समाहिताः सन्ति । विज्ञानस्य पद्धतेः धर्मस्य च पद्धतेः साङ्कर्यं विधाय एव न अपि तु यथास्थानं यथाक्षेत्रं यथारूपञ्च तयोः स्वीकृतत्वाद् अत्र असम्मेयतारूपदोषो नास्ति । अत्र सातत्यदृष्टिकोणो वर्तते । अतः वयं सहजतया वक्तुं शक्नुमो यद् जन्मन आधारे ब्राह्मणः क्षत्रियश्च वर्तते चेदपि तस्य कर्मगुणानुसारेण स अनार्योऽपि भवितुं शक्नोति । जन्मन आधारेण किराँतोऽस्ति चेदपि गुणकर्मणोराधारेण स आर्योऽपि भवितुं शक्नोति । यदि मङ्गोल अस्ति चेद् अपि तस्य गुणकर्मणोराधारे स आर्यो भवितुमर्हति । अफ्रिकादेशे लब्धजन्मा कृष्णवर्णीयो जनो भवेद् अथवा युरोपदेशे लब्धजन्मा कपिसवर्णीयो जनो वा भवेद् सोऽपि गुणकर्मण आधारे आर्यः अनार्यो वा भवति । एवमेव वैदिकर्षिणां सन्ततिः जैविकरूपेणापि सन्ततिरस्ति चेद् तथैव तेन गुणकर्मभ्यां आर्यत्वं न गृहीतञ्चेद् एवमेव अभ्यासः व्यवहारश्च न तद्रूपेण कृतश्चेद् सोऽ नार्य एव भवति । एतदर्थम् अस्माभिः सम्मेयता ज्ञेया भवति । अर्थाद् केन सह कस्य तुलना विधेया इति अवश्यं ज्ञातव्यम् । यथा जातिसन्दर्भे जातिजात्योर्वार्ता विधेया । यदि च भौगोलिकावासाधारे कल्पितसमुदायानां तुलना विधीयेत तर्हि तादृशतुलनीयसमुदाया एव चयनीयाः भवन्ति । तद्रूपेण सत्यां तुलनायां बुद्धो भौतिकवादी इति कथनं सर्वथा असङ्गतमेव । इत्थंरूपेण तौलने तु खस-आर्यौ पृथक्भूतौ इति कथनं असङ्गतम् । अधुनातनसंविधाने एकत्रैव खसआर्यौ इति उल्लिखितम् । एतद् अयुक्तम् । उभावपि पृथक्भूतौ । किञ्च आर्यपदं विशेषणस्थाने स्थापनीयम् । यथा- आर्यखसः, आर्यमङ्गोलः, आर्यकिराँतः, आर्यद्रविड इति । कस्मिन् सन्दर्भे उच्यमाने खससमुदाये लब्धजन्मनां, मङ्गोलसमुदाये लब्धजन्मनां, किराँतसमुदाये लब्धजन्मनां, द्रविडसमुदाये लब्धजन्मनां जनानां च

तेषां तेषां गुणान् विलोक्य वयं यदा यदा सम्मानं प्रकटयामस्तदा तदा तान् आर्यान् वदेम । किन्तु खसआर्य इत्युक्त्वा उल्लेखनं तु साक्षाद् असम्मेयतादोष एव । नेपालस्य राज्यकोषस्यापि दुरुपयोगं विधाय बुद्धो भौतिकवादी आसीद् इत्युक्त्वा भ्रमस्यापादानप्रयत्ने अपि असम्मेयतादोषो वर्तते । यदि असम्मेयतादोषमात्रम् तर्हि तस्य कृते विधिर्वतते । जनेभ्यः वैज्ञानिक-दार्शनिक-तार्किकपद्धतीनाञ्च समुचितं ज्ञानं प्रदातव्यम् । सति ज्ञाने कुतर्कोऽयं, असम्मेयता इयम्, इत्यादिकं सर्वं जानाति सः अथ च जालं त्यजति, परन्तु वैचारिकजालविस्तारार्थं सन्नद्धो समूहस्तु न कदापि त्यजति तद् । तादृशसमूहस्तु तु बलीयशक्तिसंरचनया परास्तो भवति । येन अत्रत्या मैलिकी शक्तिरधिगता, अवलम्बिता, अभ्यस्ता, तस्या मूलकीलकञ्च जरोकिलो नेपाले एव वर्तते इति च अवगतम् स एव तादृशवैचारिकजालं निराकरोति अथवा निराकर्तुं शक्नोति । सत्यावश्यके एतादृशशास्त्रार्थो विधातव्यः । एवमेव सञ्चार (मिडिया) प्रविधेः विकसितत्वाद् स्वीयविचारं प्रस्तोतुं सहजता वर्तत एव । कतिपयस्तु सत्तासंरचनायां वर्तते इति हेतोरनर्गलप्रलापकेभ्यो बिभेतव्यावस्थापि नास्ति । सूचनाप्रविधिमाध्यमेन स्वीयविचारान् यतस्ततोऽपि स्थापयितुं शक्नुमः, अथवा स्वीया वाक् आरम्भणीया एव ।

सारतस्तु बुद्धेन व्यक्तीकृता विषया व्यक्तिधर्मा आसन् । गान्धिकृता उपदेशाः सामाजिकक्षेत्रस्य कृते कार्यलाभकरा आसन् परन्तु बुद्धमथवा गान्धिञ्च राजनीतिकक्षेत्रे आकृष्य राजकीय-शासकीय-प्रशासकीयविषयव्यक्तीकर्तुं यदि सन्नद्धो भवेद् तर्हि तत्र असम्मेयतादोषो भवत्येव । अपि च व्यक्तेः, परिवारस्य, कुटुम्बस्य, समुदायस्य, वा सम्प्रदायस्य, समाजस्य, राज्यस्य, अन्तार्राष्ट्रियस्य वैश्विककुटुम्बस्य च का भूमिका ? इति विषये दर्शनानां स्वीयस्वीयमानकानि सन्ति । मार्क्सवादस्य स्वीया मान्यताः वर्तन्ते । सञ्चितिवादस्यापि स्वकीया मान्यता अस्ति । वामपन्थाख्यस्य कम्युनिष्टस्य पुँजीवादस्य च सम्मिश्रणेन निर्मितविषाक्तकपूतन्त्रस्य स्वकीया एव पद्धतिरभिनयो वा वर्तते । स्थितिगत्यात्मकप्रगतिवादस्य स्वीया मौलिकी पद्धतिः वर्तते । अस्मिन् समुचितस्थले सम्मेयतायाः पूर्णतया परिपालनं विधाय कथमग्रे गन्तव्यमिति स्पष्टतया स्वरूपं निर्दिष्टमस्ति । स्थितिगत्यात्मकप्रगतिवादस्य अवलम्बनस्य तात्पर्यमस्ति यद् सम्मेयतागुणः सदैव आदातव्यः । असम्मेयतादोषस्तु कदाप्यग्रहणीय इति ।

षष्ठं प्रवचनम्

ऋतस्य युगं प्रति अरेखीया यात्रा

समाजस्य विकासः कथं जायमानो वर्तते ? अथवा कथं तस्य विकासो भवति ? इति विषये विविधा दृष्टिकोणाः सन्ति । रेखीयदृष्टिकोणमाध्यमेन तथा अरेखीयदृष्टिकोणमाध्यमेनापि तस्य व्याख्यानं सञ्जायमानमस्ति । रेखीयसंरचनायां समाजविकासस्य अस्य चरणस्य व्याख्याने सति समाजस्योद्भवबिन्दुरनुमीयते । समयस्य एकस्मिन् क्रमे सृष्टिरुत्पन्ना । सृष्टौ सम्पन्नायां सत्यां प्राग् अप्रत्यावर्तनरूपेण नूतन-नूतनपरिघटनया सह समाजोऽग्रे वर्धमानोऽस्ति । क्रमविकासस्य सिद्धान्तः (थ्यौरी अफ इभोलुसन) प्रायोऽनेनेव दृष्टिकोणेन आगतोऽस्ति । अथ चैतेषु दिनेषु व्यतीतेषु सत्सु अत्र अधुनापर्यन्तं कृतानां कार्याणां परीक्षणं विधाय निष्कर्षः समायाति इति ग्रान्ड जस्टिज इत्यस्य मान्यता अपि रेखीयमान्यतायामेव निबद्धा अस्ति । अरेखीयमान्यतायां तु समाजे एकस्मिन् समये पृथक् प्रवृत्तिः पृथक् परिघटना, पृथक् सामाजिक्यः संरचनाश्च अवस्थिताः भवन्ति । तद्रीत्या रेखीयसिद्धान्तानुसारं विविधप्रकारकाणामधुनातनमानवानां पूर्वरूपेभ्यो वृद्धिक्रमेण एते मानवाः समागताः । प्रारम्भे मानवः अतीव अध आसीद् । स च सृष्टौ विद्यमानलक्षाधिकप्राणिनां मध्ये केवलम् एकविधः प्राणी एव आसीद् । तेन सृष्टौ विद्यमानान्यप्राणिनः पराजिताः, अथवा तदभावेऽपि तैश्च स्वीयसमाजे हस्तक्षेपं विधातुमशक्यावस्थां लब्धवान् स मानवः । अस्मासु अपि एतादृशी मान्यता वर्तते यद् तिर्यक्योनिजेभ्यः प्राणिभ्य उत्थानशक्तप्राणिरूपेण मानवस्य विकासोऽभूदिति । यदि सृष्टिं विलोकयामस्तर्हि

तिर्यक्रूपेण पादचतुष्टयेन सञ्चरणं विधाय ज़ीवनस्य यापनं कुर्वाणानां प्राणिनां कृते तिर्यक्योनित्वेन व्यवहारं कुर्मः । तेषां सञ्चरणस्य, शयनस्य रतिकार्यस्य, प्रजननस्य च प्रक्रियाः तिर्यक्प्रकारका एव भवन्ति । मानवस्तु पद्भ्यामुत्तिष्ठति । तस्य व्यवहारोऽपि पृथक्प्रकारको भवति । स पूर्वं तावद् अरण्ययुगे आखेटं विधाय जीवनं यापयति स्म । सामाजिकसंरचनारूपेण पश्यामस्तर्हि समूहेषु वासः, आखेटाद् उपलब्धवस्तूनां समानुपितकरूपेण वितरणं विधाय स्वीकरणम्, इत्येवंप्रकारकसञ्चयस्वभाव आसीद् मानवस्य । शनै शनैः मानवः कृषियुगं प्रति जगाम । कृषियुगं प्रति गमनानन्तरं परिवार आगतः । तथैव धनसञ्चयस्य विषया आगताः । अनन्तरमुत्पादनसाधनेषु अतिक्रमणस्य आरम्भो जातः । अथवा तेषु जनाधिकारो बभूव । स एव जनः शक्तिशाली अभूत् इतीत्थं रीत्या केचन व्याख्यानं कुर्वन्ति । अरण्ययुगप्राप्त्यनन्तरं प्रथमं तु ग्रामा ग्रामा आसन् । तदनन्तरं शनैः शनैः नगरीकरणं रेखीयसंरचनायां जातमिति मन्यते । अरेखीयमान्यतायां तु अतिप्राचीनकालेऽपि समाजेषु परिवारेषु च सभ्यरूपेण निवसतां जनानामुपस्थितावेव आरण्यकाः नरा अपि भवन्ति स्म इति स्वीक्रियते । तस्मिन्नतिप्राचीनकाले अपि विशालानि नगराणि एवमेव ग्रामीणक्षेत्राणि चासन् । नगरे चावास्तव्याः भ्रमणशीलयुता एतद्विधजीवननिर्वाहका मनुष्या अपि पूर्वमासन् । अस्मिन् युगे च वर्तन्त इति मन्यमाना जना अपि सन्ति ।

एवंविधद्वैधसंरचनायां समाजस्यारोहावरोहौ जाताविति विषये जनानां पृथक् पृथक् मान्यताः सन्ति । आधुनिकयुगे रेखीयविचारस्थितपाश्चात्त्यज्ञानपद्धत्यनुसारं पूर्वयुगे अथवा अस्माद् प्राग्युगे च विकासो नासीद् । विशेषतो मुस्लिममान्यतानुसारेण मोहम्मदाद् प्राक्कालं ते दौरे-ए-जाहिलिया इत्युक्त्वा मन्यन्ते । इदञ्चैकविधं ह्यन्धकारसदृशं युगमेव । पाश्चात्त्यपद्धतेः पुँजीवादी अथवा मार्क्सवादी इत्याख्यानां चिन्तकानां दृष्टौ प्रथमं तिमिरयुगमासीद् । तत्र विकासक्रमेण अग्रे वर्धमान आसीद् इति मान्यता अस्ति । एवमेव ज्ञानदृष्ट्या प्राक्युगे मनुष्या असभ्या आसन् । अज्ञाश्चासन् । यद्किञ्चिदपि तैर्लिखिताः शब्दाश्च गोचारणकाले अथवा कृषिकार्यावलम्बनकाले च चिन्तितविचाराणामाधारे समागता वस्तुतो न तु यथार्थानुभवजनिता इतीत्थं विचिन्त्य प्राचीनग्रन्थेषु अप्रामाणिका विचारा एव सन्ति इत्येतादृशी मान्यता आसीद् । परन्तु अथेदानीं क्रमेण एतादृशी मान्यता अपि परिवर्तमाना अस्ति । इदानीमपि अस्यां मान्यतायां द्विविधा धारा दृश्यते । एकस्या धारायाः का धारणा अस्ति इति

चेद्-ज्ञानस्य नैर्यन्तर्येणाभिवृद्धि जायमाना वर्तते। प्रविधेः प्रयोगेन सह ज्ञानमपि नवीनं नवीनं जायमानं वर्तते। मनुष्या अपि पूर्वकालापेक्षया बुद्धिमन्तो जायमानाः सन्ति। अथात्राल्पमतस्य बहुमतस्य वा कोऽप्यर्थो नास्ति इति। द्वितीयाया धारायास्तु इत्थं धारणा वर्तते- ज्ञानं प्रतिदिनं क्षणिकं सञ्जायमानं वर्तते। पूर्वं तु समासेनोच्यमाने अपि मनुष्यो जानाति स्म। अधिकविषयस्तु ध्यानेनापि जानाति स्म। इदानीं तु सामान्या विषया अपि व्याख्यानेन बोधनीया भवन्ति। एकं चित्रग्रहणयन्त्रम् (क्यामेरा) वातानुकूलविधायकयन्त्रम् (एसी) इत्यादिकमपि यदि आपणाद् स्वीकुर्मस्तर्हि तर्हि तानि यन्त्राणि कथं चालनीयानि इत्येतदर्थं व्याख्यात्मकं मेन्यूपदवाच्यं सज्जीकरणीयं भवति। एतस्माद् हेतो ज्ञानं क्षीयमानं वर्तत इति। बाह्यप्रचारः परिचर्चा वा वर्धमाना अस्ति। परन्तु आन्तरिकरूपेण ज्ञानं तु सततं क्षीयमाणमस्ति इति मान्यता अस्या धाराया वर्तते। उक्तधाराद्वयमपि अजानन्तो जना अपि सन्ति अत्र। तेषां मते प्रत्येकयुगे अतिशयज्ञानिनोऽतिशयाज्ञानिनो मूर्खाश्च भवन्ति। आधुनिकयुगेऽपि इत्थमेव वर्तते। पूर्वमपि तथैव आसीद्। तथ्यङ्कानुसारं जनानां साक्षरतापरिगणने समीपस्थेतिहासापेक्षया क्रमेणैव वर्धमाना अस्ति साक्षरता। एवं सति नराणां ज्ञानचिन्तनस्य परिपाटिः वृद्धिक्रमे वर्तते इति मान्यता अस्ति।

समयस्यारेखीयगतिं मन्यमाना जनास्तु समयस्य चक्रबलमपि मन्वते। तस्माद् समाजस्याराहावरोहौ क्रमेणैव भवतः। सभ्यताश्च शिखरारूढानन्तरं पुनः क्रमेण क्षीयते। तदनन्तरं आरण्यासभ्यंता वृद्धिं याति। तदनन्तरं पुनः प्रविधिविकासश्च क्रमेण भवतीत्युक्त्वा चक्रीयां गतिं मन्यन्ते। कस्मिँश्चिद् सुदूरप्राचीनकाले ज्ञानस्य बृहद् विकासो जात आसीद् इत्यपि मन्वते। तस्य पुनर्जागरणस्य मान्यता का इति चेद् कस्याञ्चन वेलायां ज्ञानस्य विज्ञानस्य च स्वीयं चरित्रं भवति इति। प्रविधिस्तु प्रत्येकयुगे नूतनप्रकारेण आगच्छति। परन्तु तेन नवीनप्रभावस्यागमनाद् ज्ञानस्य क्षेत्रेऽपि तस्य अवश्यमपि प्रभावो भवति। इदानीं यादृक् प्रविधिः वर्तते। पूर्वमपि केनचन रूपेण आसीदेव स इत्यपि मान्यता अस्ति। ज्ञानदृष्ट्या तु अस्मासु अन्तःज्ञानस्य अधिकं महत्त्वं वर्तते। तस्माद् ज्ञाने रेखीया गतिरेव मन्तव्या इति नानुकूलम्। परन्तु ज्ञानस्य स्तरः एकस्मिन् काले उत्कृष्टज्ञानिषु एवं न्यूनतमाविवेकिषु च भवति। अनया दृष्ट्या पश्येम तर्हि समाजस्य नियामकानां मार्गनिर्देशकानाञ्च तत्त्वानां विषये बोध आवश्यकः-

१. ऋतम्

२. धर्मः

३. दण्डनीतिः

४. विधानम् (कानून)

एतेषु अपि अरेखीयमान्यतानुसारं चक्रवद् गतिर्भवति । यथा पूर्ववर्षस्य वैशाखमासात् पुनः वैशाखमासोऽस्मिन् वर्षेऽपि आगच्छति तद्वद् सत्ययुगाद्, सत्यत्रेताद्वापरकलियुगक्रमेण पुनः सत्ययुगं प्रत्येव गन्तव्यं भवति । अस्माकं मान्यतायां सृष्टिरनादिः वर्तते । नैरन्तर्येण अथवावच्छिन्नरूपेण च अग्रे वर्धमाना अस्ति सृष्टिः । न तु पश्चगतिः सृष्टेः नास्तीति मान्यता वर्तते । परन्तु तामपि अध्ययन-व्यवहारस्य सहजार्थञ्च एकस्माद् सुनिश्चितविन्दोः समारभ्य अपरसुनिश्चितविन्दुपर्यन्तं नेतुं शक्नुमः । तादृशनियतांशे रेखीयव्यवहारनियममपि संयोजयितुं शक्नुमः । अरेखीयमपि शक्नुमः । अंशे रेखीयदृष्ट्या पश्यामश्चेदपि समष्टौ तथा नास्ति । इदानीन्तनकतिपयपद्धत्या विशेषतो वर्तमानकालिकप्रभुत्वशालिपश्चिमप्रतिमानेन च रेखीयदृष्ट्या एव विलोकिताः । रेखीयमान्यतानुसारं प्रारम्भे ऋतस्य व्यवस्था आसीद् । ऋतं नाम सत्यम् । मानवव्यवहारदृष्ट्या प्रत्येकमानवेन स्वीयजन्मन आरभ्य सत्यमवलम्बनीयम् न तु केनचन शिक्षणेन आहोस्विद् बोधनेन इति ऋतशब्दस्यार्थो ज्ञेयः । तदा समाजस्य संरचनाया विकारराहित्याद् न खलु कश्चन नियामको निकाय आसीद् । न च राज्यम् आसीद् । न वा दण्डदाता आसीद् । प्रत्येकजनः स्वयं सत्यं साक्षात्करोति । सत्यावलम्बी भवति । किञ्चन वस्तु मह्यं सुखं ददाति चेद् अन्येभ्योऽपि ददाति । स्वस्य प्रतिकूलं वस्तु परेषामपि प्रतिकूलमेव भवति एतादृशज्ञानवान् समाजो भवति तदा । जनसङ्ख्यापेक्षया आवश्यकसंसाधनस्य पर्याप्तता अस्ति । समृद्धिश्च वर्तते । प्रवृत्या एव स संस्कारयुक्तोऽस्ति स्वाभाविकरूपेण । स्वतः संस्कारयुक्तस्य समाजस्य परिस्थितिकारणेन आधिभौतिक-आधिदैविक-आध्यात्मिकत्रिविधायामाः स्वच्छाः परिपूर्णाश्च सन्ति । मानवस्य अर्थक्षेत्रे एवं कर्मक्षेत्रे च कश्चन द्वन्द्वो वर्तते । एतच्च सत्ययुगस्यापि प्रथमचरणरूपेण वयं मन्यामहे । पाश्चात्त्यैश्तु कस्याञ्चन कथायां श्रुतं स्याद् । कुत्रचिद् पठितमपि स्याद् । तस्मादेव कालमार्क्सोऽपि तमादिमसाम्यवादमकथयत् । तस्मिन् युगेऽपि ज्ञानवन्तो, अज्ञानवन्तश्च जनाः एवं नगरग्रामादयः सुखिनो दुःखिनश्च बहुविधा आसन् इत्युक्त्वा स द्रष्टुं न पारयद् ।

आदिमसाम्यवादस्य व्याख्यानं तावद् संस्कृतवाङ्मयस्य व्यालोडनेन प्राप्तसंमृद्धेः चिन्तनेन सह तादात्म्यं न भजते। तद् तु अतिशयसामान्यरूपं वर्तते। सारतस्तु तदा समाजे सर्वेऽपि जनाः सुखिन आसन्। समाजे जनस्य सम्पत्तौ स्वामित्वस्य सम्भावना नासीद्। समाजे स्थितानां जनानाम् आधारभूताया आवश्यकतायाः कृते स्पर्धाया स्थितिर्नासीद्। तथैव सामाजिकसंरचना तदा जटिला विधातव्येति स्थितिर्नासीद्। सामाजिक-सांस्कृतिक-राजनैतिकसंरचनाया आवश्यकता अपि नासीद्। अस्माकमपि वैदिकवाङ्मये मन्त्रा नित्या सन्ति। ब्राह्मणग्रन्थेषु तात्कालिकसमाजस्य व्याख्यानं लभेमहि। अथ चारण्यकेषु उपनिषत्सु च ततोऽप्यधिकं व्याख्यानं प्राप्नुयाम।

क्रमेण ऋतस्य व्यवस्था क्षीणत्वङ्गता। विविधकारणेन समाजे मत्स्यन्यायः प्रवर्तितः। अथ च समाजे स्थिता ऋषयो ज्ञानिनश्च समाजस्य दुःस्थितिमपाकर्तुं धर्मनियमं निर्मितवन्तः। ऋतं नाम सहजः स्वाभाविकः प्रत्येकजनेषु अवस्थित आन्तरिको गुणविशेषः। अनेन आन्तरिक गुणेन बाह्यव्यवहारार्थं मार्गनिर्देशनं नियमनं वा क्रियते। धर्मनियमा अपि साधारणा असाधारणाश्च भवन्ति। साधारणा किल धर्मा सृष्टौ सर्वैरपि क्रियान्वयनयोग्या अवलम्बनीया इत्येतादृशचारित्रिकगुणोचिता नियमयुताश्च सन्ति। यथा- सत्यं वद, धर्मं चर, मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव इत्यादयः। अत्रातिथिशब्दोऽधुनातनव्यापारग्राहकानां पर्यटकानां वा कृते प्रयुक्तो नास्ति। एते तु समेषां कृते उपयुक्ता साधारणा धर्मनियमाः सन्ति। यथा प्रत्येक जनः भोजनम् निद्रां,मैथुनादीन् च वाञ्छति। तस्मिन् जने विवेको वर्तते। अथ च विवेकसंस्कारितो भवति। इत्थमेव कतिपय व्यवहाराः वर्तन्ते। ते व्यवहारा विशेषधर्मत्वेन वर्ण्यन्ते। विशेषधर्मास्तु देशकालपरिस्थित्यनुरोधेन उक्ता वर्तन्ते। अतश्च ऋतस्यापेक्षया धर्मेषु किञ्चन पार्थक्यं समागतम्।

धर्मनियमम् अवलम्ब्य मानवा शिक्षितव्या दीक्षितव्या, प्रशिक्षितव्याश्चेति आवश्यकं संवृतम्। धर्मनियमविपरीतमधर्माचरणं विहितमस्ति न वेति नितान्तं विलोकनीयं सञ्जातम्। तस्मादेव प्राग्कालापेक्षया सामाजिकी राजनैतिकी, शासकीया, प्रशासकीया च संरचना आगता। शासकास्तु विविधाः सन्ति। राजपदधारी प्रकाशक आगतः। धर्मशास्त्रानुसारं समाजे मत्स्यन्यायो मा भूदिति धिया राजा आगतः। समाजे केचन स्वेच्छाचारिणो निरङ्कुशाः नियममतिक्रान्ताः जाताः। एवंसति बलवता च दुर्बलः पीडित इत्येतादृशी अवस्था ह्यागता। अत ऋतेन नालं

तदा । सामाजिकी राजनैतिकी च संरचना क्रियान्वयितव्या अभूद् । धर्मयुगोऽपि आदौ पादचतुष्टयात्मको भवति । तदनन्तरं द्वित्रक्रमेण अन्यपादा ह्रासङ्गताः । अस्य कृते राज्ञः पृथोः प्राक्जातस्य वेनस्यैव उदाहरणं पश्यामः । वेनस्य राज्यकाले दण्डहीनता आसीद् । निरङ्कुशराज्येन सामाजिकसर्वविधसंरचनाया अधिकारोऽपहृत आसीद् । तदा सर्वसत्तावादस्य स्थितिरासीद् । राज्ञः पृथोः काले धर्मस्य व्यवस्था पुनः स्थिरीकृताः । अस्याः कृते दण्डनीतेर्व्यवस्था वर्तते । त्रेतायुगे भगवतो रामस्य शासनव्यवस्था अपि दण्डनीतित आरभ्यते । दण्डनीतेः पूर्णतया परिपालनेन एव धर्मः प्रतिष्ठितो भवति । रामराज्येऽपि धर्मस्य शासनमासीद् । द्वापरयुगे महाभारतकाले तु विकृतिर्व्याप्ता जाता । दण्डनीतावेव शासनव्यवस्था प्रचलिता आसीद् । दण्डनीतौ विधिनिषेधौ एकत्रैव विधाय समाजो न पश्यति । निषिद्धकार्ये कृते दण्डः एवं उत्तमे कार्ये कृते च प्रोत्साहनं विधीयते इति तु सर्वेऽपि जानन्त्येव । अधुनातनयुगेऽपि (इथिक्स एन्ड ल) इत्यनुसारेण दण्डनीत्या शासनं चलति इति अवस्था दृश्यते ।

अन्त्ये तु दण्डनीतेरपि कार्यक्षमताया अभावे कानुननीतिश्चलति । ऋतयुगे तावद् प्रत्येकं जनः चरित्रवान् गुणवान् च भवति । तथात्वे केनापि न कस्यापि नियमनं विधातव्यमिति स्थितिः । धर्मनीतौ समाजे ह्यधिका मानवाः सन्मार्गे चलन्ति । अनुचितकार्यकर्तृणां कतिपयजनानां तु समर्थराजकीयसत्तया एव नियमनं, दण्डविधानञ्च विधीयते स्म । एवं सति समाजे विद्यमाना बहुसङ्ख्यका जना सहजरूपेण जीवनं यापयन्ति स्म । इत्थमवस्थितिः तदा समाजस्य आसीद् । न्यायव्यवस्था(कानुन)याः स्वरूपं किं भवति इति चेद् अमुककार्ये कृते एतावद्वर्षं कारागारे वासो अथवा जरिमाना भविष्यति अथवा तदुभयमपि इति । तस्य सम्बन्धो न्यूनतममानवीयव्यवहारापेक्षया तुच्छस्तरस्य माभूद् इत्यत्र अस्ति । एवं सति समाजानुसारमेव न्यायव्यवस्था क्रियते । यादृशतुच्छस्तरस्य समस्या समाजे आपतति न्यायविधानेऽपि तादृग्विधव्यवहारस्य दण्डनीतेश्चोल्लेखो विधातव्यो भवति ।

समाजेन तु राज्यस्य सामाजिकसंस्थानाञ्च सहकार्ये समन्वये वा अग्रे गन्तव्यं भवति । यदि समाजे संरचनागतं जटिलत्वं पौनःपुन्येन जायमानं वर्तते तर्हि राज्यस्य भूमिका अपि तदनुरोधेनैव ह्यधिकभारयुता भवत्येव । यदा सामाजिकसंरचना बलिष्ठाः भवन्ति तदा जनोऽपि संस्कारेण संस्कृतो जायमानो भवत्येव । तदनन्तरं क्रमेण विधिनियमः इत्यस्य श्रेष्ठतमविन्दौ दण्डनीतेः

व्यवस्था आरभ्यते । दण्डनीतेः श्रेष्ठतमव्यवस्थातो धर्मनीतेर्व्यवस्था आरभ्यते । धर्मनीतेः श्रेष्ठतमव्यवस्थातो ऋतस्य व्यवस्था आरब्धा भवति । किन्तु समाजस्तु समागतमार्गेणैव साक्षाद् प्रत्यावर्तनं न करोति । तस्य कृते तु बहूनि वर्षाणि अपेक्षन्ते । एकस्मिन् पक्षे द्वात्रिंशदधिकचतुर्लक्षवर्षपर्यन्तं कलियुगस्य कालो निश्चितो वर्तते । द्वापरस्य तु अस्मादपि द्विगुणितः कालः निर्धारितः । त्रेतायास्तु त्रिगुणितः एवं सत्यस्य तु तस्य चतुर्गुणितः काल इति । अपरपक्षे तु यदा शासकः निर्गच्छति तत एव सत्ययुगस्यारम्भो भवतीति । अस्माभिः "पुनर्जागरण" इत्याख्ये पुस्तके विषयोऽयं चर्चितः । अद्यतनसन्दर्भे न्यायिकनियमः (कानुन)विधिश्च शब्दौ समानार्थकाविति मत्वा तौ शब्दौ प्रयुक्तौ इति दृश्यते । परन्तु न्यायिकनियमस्य स्वभावो निषेधात्मको भवति । विधिनिषेधसूत्रयोः संयोजनं क्रियते चेद् दण्डनीतिर्भवति । न्यायिकनियमस्य नैतिकतायाश्च संयोजने दण्डनीतिः विनिर्मितो भवति ।

समाजस्य विविधा अवयवाः परस्परं सम्बद्धाः सन्ति । समाजिकसंस्थाभिः विशेषतः परिवार-कुटुम्ब-समुदायैः तथैव सम्प्रदायैश्च पूर्णतया स्वीयदायित्वापूरिते सति जनसंस्कारस्य क्षये जाते च न्यायिकनियमाः (कानुन) आनीता सन्ति । ज्ञानदृष्ट्या बौद्धदर्शनेन बुद्ध एव आधिकारिको मन्यते । अथवा बुद्धवचनमेवाधिकारिकं मन्यते । तथैव वैदिकपरम्परायामपि वेदस्यैवाधिकारिकत्वं मन्यते । अन्यानि शास्त्राणि तु अस्यैव उपबृम्हणरूपाणि । समाजविकासस्य रेखीयसिद्धान्ते तु एककोशीयजीवाद् जलचर-स्थलचरक्रमेण सृष्टिः प्रचलिता वर्तते । यद्रूपेणापि आगच्छतु तथापि व्यक्ति-परिवार-कुटुम्ब-समुदाय-सम्प्रदाय-राज्य-राष्ट्रादितो वैश्विकसमुदायपर्यन्तं नियमनस्य स्वीया-स्वीया मान्यताः सन्ति । राज्ञा महेन्द्रेण मुलुकी ऐन क्रियान्वयनानन्तरमस्माकं राज्यस्य भूमिकातः नवीनचरणे प्रवेशो जातः । तद्पूर्वं पूर्वसन्दर्भे आगतमासीद् । जङ्गबहादुरेण मुलुकी ऐन आनयनम् अथवा जयस्थितिमल्लेन स्वकीयायाः स्थितेः स्थापनञ्चेतदुभयेनापि कार्येण स्वेनैवनिर्मितनियमानुसारं समाजसञ्चालनप्रयासो बोध्यते । तत्र प्राचीनाः स्मृतिग्रन्थाः केवलं सन्दर्भग्रन्थरूपेण एव गृहीता आसन् । राज्ञः महेन्द्रस्य मुलुकी ऐन इत्यनेन आधुनिकसन्दर्भे राज्यस्य निर्णायकी भूमिका स्थापिता आसीद् । तेन च स्पर्शास्पर्शादिविषया युगपदेव अवैधानिकाः कृताः । अत्रापि विविधानि मतानि स्युः । केचन तु पूर्वत एव स्पर्शास्पर्शादिप्रथा आसीद् इति वदन्ति । ईशाइकरणस्य इस्लामस्य च कारणेन स्पर्शास्पर्शादिविषया विकृतिरूपेण

अन्तः प्रविष्टा इति निश्चयकोटौ संप्राप्ता अध्येतारश्च सन्ति । अस्मासु अन्यत्र इव टेरिटरियल नेस्नालिजमस्य च अथवा इथनिक नेस्नालिजस्य च अवधारणाः न सन्ति। यथार्थतस्तु एते अतिवादाः सन्ति। अस्माकं तु ग्रामकुलयोः संयोजनात्मिका अग्रे वर्धनार्थं पद्धतिरस्ति । अत्र बहवः प्रयासा जाताः । राज्यराष्ट्रसिद्धान्तं वयं चर्चितवन्त एव । राज्यस्य दृष्टिकोणाद् अथवा समाजस्य दृष्टिकोणाद् विलोकितम् ? इति पार्थक्यं विधातुमशक्यत्वाद् महती समस्या आगच्छति । बुद्धस्य दर्शनं तावद् या कापि शासनव्यवस्था इत्थं सञ्चालनीया इत्येतदर्थमागतं नास्ति। सन्दर्भवशाद् बुद्धस्तु विविधानां मानवानां जिज्ञासां शमयति स्म। तथापि तस्य मूलमुद्देश्यं तु भवचक्राद् विमुक्तिरेवासीद् । सामाजिकव्यवहारे सम्लग्नानां मानवानां ततः मोचयित्वा सङ्घं प्रति आनीय तन्माध्यमेन निर्वाणप्रापणमेव तस्य महदुद्देश्यमासीद्। अद्यतनसन्दर्भे अपि बुद्धस्य दर्शनं वयम् अप्पदीपो भव इत्युक्त्वा व्यक्तिगतस्तरे अपि उपयोक्तुं शक्नुमः । परन्तु तस्य दर्शनं शासकीयस्वरूपे कार्यं न करोति । प्रत्येक जनः स्वयं साधनां विधाय अग्रे गन्तुं शक्नोति इत्यस्मिन् विषये महत्त्वं प्रदत्तमस्ति । विशेषत आक्रामकाः विधर्मिणो विदेशिनः अस्माकं विध्वसयितुं प्रयतितवन्तः । तान् पराजयितुं चेष्टाराहित्याद् अस्माकं हिमवत्खण्डेन सह संयुक्तत्वाद् सुदीर्घकालं यावद् अनेकानि उच्छृङ्खलकार्याणि तेषां दृष्टानि । गान्धिनः सिद्धान्तोऽपि मूलतः सामाजिक एव। तस्य ग्रामस्वराजादिसिद्धान्तः श्रवणे राजनैतिकभानेऽपि वस्तुतस्तेन भारतस्य स्वतन्त्रताननतरं काङ्ग्रेसदलस्य विघटनं कुर्वन्तु इति उक्तत्वाद् स च सिद्धान्तः सामाजिकजागरणस्य कृते प्रयुक्तोपकरणमेव आसीद् इति सुस्पष्टं वर्तते। राजकीय-शासकीय-प्रयोजनार्थं पृथक्तया राजनैतिकदलं विधेयमिति तस्य आशय आसीत्। परन्तु गान्धिनो नाम्न दुरुपयोगं विधाय शासन-प्रशासनसञ्चालनार्थं पाश्चात्त्यनिर्वाचनपद्धतिमवलम्ब्य नेहरु एवं तस्य पुत्री इन्दिरा गान्धीप्रभृतयः नेतारः स्वात्मानं समाजवादीनाम्ना व्यवहरन्तो विकृतां राजनीतिमेव सञ्चाल्य धनार्जनार्थं गान्धिनश्चित्रं कार्यालयस्य भित्तौ एव स्थापितवन्तः । एवमेव मोसेस, जिसस अथवा मोहम्मदादीनां विचारं पश्यामस्तर्हि तु एकः समाजः कथं सञ्चालितो भवति इति विचिन्त्य आरब्धमासीद् परन्तु तदनुयायिनः अस्यानियतं प्रयोगमकुर्वन् । एवञ्च ईशाइकरणं राजकीयप्रयोजनार्थमागतं नास्ति, तथापि चर्च इत्यनेन शासनमपि करतलीकृतमिति ज्ञात्वा विद्रोहं विधाय चर्च अफ स्टेन्ट

इत्याख्यं समाधानमन्विष्टवन्तः पाश्चात्त्याः । इदमस्मासु प्राचीनकाले एव समाधानं जातमासीद् । मुश्लिमजनसमुदायं पश्यामः स्तर्हि कमालुतातुर इति धृतत्वाद् अयं विषयः समाधानचरणे प्रविष्ट इति प्रतिभाति । कतिपयदेशा इदानीमपि एतादृशानुभवितुमशक्यत्वाद् संशययुक्ताः सन्ति । पाकिस्तानस्य दुःखमपि इदमेव । तेऽपि इदानीं शासकीय-प्रशासकीयक्षेत्रस्य तथैव मजहब इत्यस्य क्षेत्रस्य च भेदे संशययुक्ताः सन्ति । एवमेव दुःखानुभूयमानाश्च सन्ति । इस्लामस्य वहमानया धारया आविश्वं दारुल इस्लाम इति नाम्नः मजहबस्य माध्यमेन राजकीय-प्रशासकीयक्षेत्रे च निःशेषेण पीडा प्रदीयमानास्ति । अनेन विश्वस्मिन् शान्तिर्न कदापि भविष्यति ।

वयं स्थितिगत्यात्मकप्रगतिवादस्य दृष्ट्या विलोकयामस्तर्हि एकत्र सामाजिकसांस्कृतिकावयवाः सन्ति । अपरत्र धर्ममाध्यमेन स्थिरत्वाधायका विषया अपि सन्ति । उवमेव निवासस्थानान्तरणकारणेन अथ च प्रविधिकारणेन वा अधुना अर्थतन्त्रस्य स्वरूपं उत्पादनं, वितरणचरित्रस्य च परिवर्तनं जायमानं सद् एतेषु नितान्तं समन्वयः करणीयो भवति । राजनैतकसन्दर्भे स्थितिगत्यात्मकप्रगतिवादं राज्यराष्ट्रसिद्धान्तो व्याख्याति । असम्मेयतादोषस्य सम्भावनानुकूलरूपेण दर्शनानां प्रयोगप्रयासे तु समस्या आपतति । यथा मार्क्सवादस्तु मूलतः कथं सत्ता स्वायत्तीक्रियेत इति सन्दर्भे समागत आसीद् । परन्तु समयक्रमे व्यक्तिविशेषेण, तेन लिखितग्रन्थमाध्यमेन, सङ्गठनेन एवञ्च सङ्गठने सम्लग्नैः जनैश्च सर्वमपि स्वाधीनीकर्तुं मजहबतुल्यमभवत् । विद्यालये, विद्यापीठे मन्दिरे वा राजनैतिकदलस्य का आवश्यकता ? किं वा प्रयोजनं तस्य पश्यामस्तत्र ? वस्तुतः सर्वसत्तावादस्य पिसाचाक्रन्तत्वाद् राजनैतिकदलं सर्वत्र स्वायत्तीकर्तुं प्रयतते । अस्य समाधानं तु सामाजिकी संरचना, सांस्कृतिकी संरचना यथा दृढा भूयाद् तथा विधाय तासां समन्वय एव । समाजोऽपि अग्रे नेयः । नेपाले तु इदानीं सामाजिकी-सांस्कृतिकीसंरचनातः परिवारः, कुलं कुटुम्बः, समुदायः इत्येतद् सर्वमपि क्षीणङ्गतमस्ति । राज्यस्य नाम्ना विभिन्नैः राजनैतिकदलैः अनधिकृतक्षेत्रे हस्तक्षेपं विधाय तान्नि क्षेत्राणि शिथिलीकृतानि सन्ति । एतानि प्रबलानि यथा भवन्ति तथा कर्तुं राज्यस्य दायित्वमस्ति । परन्तु तथा विहितं नास्ति । राज्यशक्तिं राज्ये संस्थाप्य सामाजिकीं शक्तिं च शक्तिबोधात्मिकां विधातुं स्थितिगत्यात्मकप्रगतिवाद एव समर्थ इति न संशयलेशोऽपि ।

सप्तमं प्रवचनम्

व्यक्तिः, समाजो राज्यञ्च

व्यक्तेः समाजस्य एवं राष्ट्रस्य च अन्तःसम्बन्ध एव समाजः कथं अग्रे गच्छति इति निश्चिनोति। भौतिकपरिस्थितेः कारणेन तथैव तस्य सञ्चालने उपभोगे च मानवेन निर्वहमानया भूमिकया च संसार अग्रे नीयते । अनेन प्रगतेः स्वरूपं निश्चीयते। तथाकृतत्वादेव वैयक्तिकतायाः, सामुदायिकतायाः, एवमेव सामूहिकतायाः च माध्यमेन समाजविकासस्याध्ययनं तदनुरूपेणैव कार्यसम्पादनमनिवार्यम्।

व्यक्तेः सामूहिकतया सह स्थितिगत्यात्मकसम्बन्धस्य परिचर्चाया बहुविधो विधिः वर्तते । अस्य सहजार्थं पूर्वस्मिन् चाणक्यस्य पश्चिमस्यां जोन स्टुअर्ट इत्यस्य दृष्ट्या विचारयितुं शक्नुमः । मिलाख्यो जनः उपयोगितावादस्य एवमेव वैयक्तिकस्वतन्त्रताविचारस्य च क्षेत्रे प्रसिद्धो वर्तते। स च दार्शनिकस्य जेम्स मिल इत्यस्य पुत्रोऽस्ति। जेरमी बेन्थन इत्यस्य प्रत्यक्षसुपरिवेक्षणे स प्रावीण्यङ्गतः। स च राजनीतिशास्त्रस्य न्यायशास्त्रस्य च अनेकासु विधासु कार्यञ्चकार। अन लिबर्टी इति तस्य वैयक्तिकस्वतन्त्रतायाः सन्दर्भे सर्वाधिकं महत्त्वपूर्णं पुस्तकमस्ति । अन लिबर्टी पुस्तकेन सिद्धान्तरूपेण वैयक्तिकस्वतन्त्रतायाः कृते एकः मापदण्डः प्रदत्तोऽस्ति। सञ्चितिवादाद् व्यक्तेः विकासार्थं एकमानकरूपेण तद् वर्तते। कस्यापि व्यक्तेः व्यक्तित्वस्य समग्रतया विकासार्थं स्वतन्त्रता अपरिहार्या भवति। प्रत्येकजनस्य स्वशरीरस्योपरि मस्तिकोऽपरि च सम्प्रभुता वर्तते । कयापि दैव्या शक्त्या, जनेन, राज्येन एवञ्च लोकप्रियसर्वकारेणाऽपि व्यक्तेः स्वतन्त्रताया उपरि व्यवधानं वाञ्छनीयं न भवति इत्युक्त्वा तेन वैयक्तिकस्वतन्त्रतायाः पक्षे तर्कः प्रस्तुतोऽस्ति। स्वतन्त्रता च

सुखानुभूतौ सम्बद्धास्ति इत्युक्तम्। सुखस्य विविधानि स्रोतांसि सन्ति। केनचन एकेन पुरुषेण कृतस्य कार्यस्य माध्यमेन समाजे सुखाभिवृद्धिः कर्तुं शक्यते। अतः व्यक्तेः विचाराः न निरोधनीयाः। वैचारिकी स्वतन्त्रता व्यक्तेः मानसिकस्वस्थतायाः कृते अत्यावश्यकी। वैचारिकस्वतन्त्रताया अभावे विचारो दब्धो भवति। तेन एकविधा कुण्ठा, आक्रोशः विध्वंसो वा जन्यते। समाजे एकस्यापि जनस्य कस्मिञ्चन विषये विमतिरस्ति चेदपि तस्य मुखपिधानं कदापि न कर्तव्यं भवति।

विचारस्य अभिव्यक्तेश्च स्वतन्त्रता जन्मसिद्धाधिकारोऽस्ति। अतः कामपि सामाजिकसंरचनां विमतिं वा न कोपि निरोधयतुमधिकृतोऽस्ति। आन्तरिक्या वैचारिक्या च स्वतन्त्रतया सह बाह्यस्वतन्त्रता अथवा कार्यस्वतन्त्रता च महत्त्वपूर्णा भवति। विचारानुसारेण व्यवहारोऽपि प्राप्तव्य एव। ततः कुत्रापि अराजकता नागच्छति वा ? इति आशङ्कायामुच्यते यद् कार्यविचारयोरुभयोरपि स्वातन्त्र्ये पूर्णविकासेन भाव्यमिति। व्यक्तिस्तु समाजे योगदानं ददाति। प्रत्येकजनो जन्मना स्वतन्त्रो महत्त्वपूर्णश्च वर्तते। स्वस्य कृते उपयोगप्राप्तिः उपभोगप्राप्तिश्च जनाधिकार एव। एवमेव प्रत्येकजनेन सुखलाभार्थं विचाराभिव्यक्तिकरणं तदनुरूपं कार्यसञ्चालनञ्च परस्परमन्तःसम्बद्धमस्ति। परन्तु एकस्यामुपरितनकक्षालब्धे सति न खलु मानवकृतकार्याणि नैज्यानि एव भवन्ति। कतिपयकार्याणि सामूहिकानि तथैव अन्यानि कतिपयकार्याणि सार्वजनिकानि च भवन्ति। समूहे तु अपरोऽपि जनः अन्यजनवद् स्वतन्त्रो भवति। अतः अधिकानां जनानां मध्ये अधिकारविषये द्वन्द्वस्य स्थितिः तीव्रेण अग्रे आगच्छति। अतः व्यक्तिगतजीवनेन सह सम्बद्धेषु भोजनपानास्थामतदानादिविषयेषु निःसीमाः स्वतन्त्रता आवश्यकी इति तस्य तर्को वर्तते।

वैयक्तिकस्वतन्त्रतायाः प्रत्याभूतिः व्यक्तेः समाजस्य च कृते हितकारिणी वर्तते। सार्वजनिककार्यसन्दर्भे निःसीमा स्वतन्त्रता न भवति। मिलस्य विचारे जनः स्वस्य कार्ये तावद्पर्यन्तं स्वतन्त्रो वर्तते यावद् पर्यन्तमपरस्य कार्यबाधां न करोति। यदि स्वकीयकार्येण अपरस्य कार्यं बाध्यते तर्हि स्वतन्त्रतानाम्नि अन्ततो गत्वा मत्स्यन्यायस्य स्थितिः आगच्छेद्। व्यक्तिस्तु स्वस्य सुखार्थं स्वतन्त्रतायाः विचारस्य कर्मणश्च प्राप्त्यधिकारपक्षे सप्रमाणं मीमांसते। एवमेव एकेन जनेन उपस्थापितविचारेण कार्येण च समाजे स्थिता अन्ये जनाः दुःखं नाप्नुयुरिति मिलस्य

अवधारणा वर्तते। वैयक्तिकस्वतन्त्रतायाः तर्को नैतिको बन्धनयुक्तश्च वर्तते। का नाम नैतिकता ? सा आचरणे च कथमागच्छति ? इत्यस्मिन् विषये प्रत्येकसमाजे पृथक् पृथक् विचारणा वर्तते। यत्र सामाजिकी संरचना दुर्बला अस्ति तत्र नैतिकसंयन्त्राणि अपि दुर्बलान्येव सन्ति। यथा अमेरिकायां प्रत्येकगृहे भुसुण्डी (हतियार) स्थापयितुमधिकारोऽस्ति। तादृशाधिकारेण सह कर्तव्यपक्षस्य दुर्बलत्वाद् कैश्चिद् विशेषतो विद्यालये विद्यापीठे (कलेज) अन्धवद् गोलबम्बमास्फोट्य व्यक्तिः हता इति कदाचन कदाचन अपश्यामः। व्यक्तिगतस्वतन्त्रतां यदि नैतिकतायाः बन्धने बन्धयितुमशक्तत्वे तादृशी समस्या आपतिता। अस्य नियमनार्थमद्यापि ते प्रयासरताः सन्ति। राज्येन समाजस्य नैतिकनियमनाधिकारापहृतत्वाद् तदा कथं समाजः प्रतिक्रियां विदध्याद् ? अस्माभिस्तु भारते पञ्चायतविषये, पाकिस्ताने, अफगानिस्थाने च अथवा कबिलाख्यसंरचनाः नीतिनियमविपरीततया प्रतिक्रियाः व्यक्तीकृताः इति दृष्टं वर्तते। अस्य समाधानं कथं क्रियते ? इति प्रश्ने चाणक्यस्य विचारः सान्दर्भिको वर्तते।

व्यक्तिगतरूपेण चाणक्यस्य विविधा आयामाः सन्ति। स च कौटिल्यनाम्ना अर्थशास्त्रं प्रतिपादितवान्। वात्स्यायननाम्ना कामशास्त्रम्, एवमेव विष्णुगुप्तनाम्ना राजनैतिककार्यं च कृतवान् एषः। अयञ्च गुरुकुलस्य महान् आचार्यः। तादृशं विशालं राज्यं विधाय राज्यसत्तायाः यद् किञ्चिदपि लोभं सर्वथा त्यक्त्वा स्वशिष्यं सम्राट् इति नाम्ना घोषितवान्। स च त्यागबुध्या वैदिकर्षिपरम्पराम् अविच्छिन्नरूपेण वर्धितवान्। चाणक्यस्य नीतिशास्त्रमपि सहजतया उपलभ्यते।

तेन रचित एकश्लोकः सर्वथा मननीयो वर्तते। तस्य तात्पर्यं किमस्ति चेद् कुलवचनस्य कृते एकः त्यक्तव्यः। ग्रामस्य कृते कुलं त्यक्तव्यम्। देशस्य जनपदस्य च हितार्थं ग्रामः त्यक्तव्यः। आत्मकल्याणार्थं समस्तायाः पृथिव्याः त्यागोऽपि उपयुक्तो भवति इति। सामान्यतया अवलोकने इदं एकविधं प्रावधानं प्रतिभाति। अत्र वैयक्तिकतायाः कृते स्थानं नास्ति वा इति प्रतिभाति। कुलस्य कृते व्यक्तेः त्यागः वैयक्तिकतायाः प्रतिकूलोऽभूद्। कुलस्तु सांस्कृतिकोंऽशः एकः। ग्रामस्तु राजनैतिकोंऽश एकः। तस्मिन् काले ग्रामे एव बहूनि कुलानि भवन्ति स्म। एवं सति एकस्य कुलस्य त्यागे समग्रस्य ग्रामस्य हितं भवति चेद् तदर्थं सज्जीभवितव्यमिति कथनेन तु तदा समूहस्य प्राधान्यं दृश्यते। परन्तु आत्मकल्याणार्थं समस्तायाः पृथिव्याः

त्यागोऽपि उपयुक्तो भवति इति मान्यता तु वैयक्तिकतायाः प्रमाणमस्ति। अनया दृष्ट्या पौरस्त्यः समूहवादी इति मन्यते चेद् अपूर्णा एवेयं मान्यता भवति। अन्धैः हस्तिनः शुण्डस्पर्शे अन्येन कर्णस्पर्शे च किं किंमुक्तम् ? इति कथनवद् एव सा मान्यता। वैयक्तिकतायाः सामूहिकतायाश्च समन्वयरूपमेव चाणक्यस्य मान्यता आसीद् इति ज्ञायते। सामाजिको व्यवहारः समष्टिप्रधानो भूयाद्। परन्तु आध्यात्मिकत्वं तु सदैव व्यक्तिकेन्द्रितं भवति इति ज्ञायते। अनयोर्द्वयो समन्वयानन्तरमेव व्यक्तेः समाजस्य राष्ट्रस्य च अन्तःसम्बन्धस्य चर्चा विहिता अस्ति।

यदि व्यक्तिप्रधानं मन्यामहे तर्हि कथं व्यक्तिः कथं समाजे अवस्थितो वर्तते इति वक्तव्यं भवति। तथैव समाजे राष्ट्रे च तेन कथं व्यवहारो विधेय इति विचारणीयं भवति। अतश्च स्थितिगत्यात्मकता अत्र विद्यते। व्यवहारेऽपि एकस्य जनस्य कारणेन सकलस्य समाजस्य हानिलाभौ भवितुं शक्नुतः। समाजस्य सदस्यरूपेण प्रत्येकजनाः परस्परमन्तसम्बद्धाः सन्ति। अतः सामाजिकव्यवहारे समष्टिर्ध्येया। वैदिकपद्धत्यनुसारं तु केवलं धर्मं विहाय देहावसानानन्तरं मातृपितृकुलकुटुम्बाः सर्वेऽपि हातव्या भवन्ति। धर्म एव सहैव तिष्ठति। जीवनं तु एकाकि एव आगच्छति गच्छति च। पापपुण्ययोः फलञ्च स एव स्वयं भुङ्क्ते। व्यावहारिकजीवने अपि कतिपयजनाः सुखे सहैव भवन्ति परन्तु दुःखकाले तु पलायन्ते। अथ च रुग्णवेलायामपि सहयोगिनः कियद्कालपर्यन्तं तिष्ठन्ति इति निश्चितं नास्ति। चिताज्वलनकालपर्यन्तं कति तिष्ठन्ति इत्यपि विचारणीयमेव। प्रत्येकजनस्य समाजे विविधजनैः सह सम्बन्धो भवति जीवनकाले एव। मरणकाले तु सर्वेऽपि त्यक्तव्या एव। आगमनगमनकाले तु एकाकी भवेन्नाम। परन्तु वैयक्तिकपक्षे तु कथं व्यवहर्तव्यमिति विषये बहुचिन्तनं विहितमस्ति। अत्र मानवस्य लक्ष्यं अधिकज्ञानार्जनं नास्ति अपि तु सत्यज्ञानमेव।

परमसत्यस्य साक्षत्कारार्थमेव शरीरेण सह इन्द्रियाणि आवश्यकानि भवन्ति। इन्द्रियाणि स्थिराणि न सन्ति चेद् सत्यसाक्षाद्कारार्थं भ्रममापादयन्ति। भगवद्गीतायामुक्तं वर्तते यद् इन्द्रियैः मनः प्रायेण अनुचितस्थले नीयते। अत एतेषां वशे न कदापि भवितव्यमिति। बाह्यविषयान् त्यक्त्वा स्वात्मनि एव रममाणो योगी अक्षयसुखं विन्दते। मीमांसापद्धतौ भौतिकमानसिकाध्यात्मिकपक्षाणां समन्वये एव आयासो विहितः। सारतस्तु वैदिकपद्धतौ इन्द्रियाणामपूर्णतापक्षो बोधितो वर्तते। देहात्मनोः पृथक्त्वं, देहस्यानित्यत्वं, आत्मनो नित्यत्वम्, देहस्य साधनत्वञ्च

वर्णितं वर्तते । एवमेव इन्द्रियाणां वशीकरणशीलं मनः, मुक्तिरित्येतादृश्यो मान्यता अत्र सन्ति । पाश्चात्त्येषु दर्शनेषु प्रायश्चेतनस्यात्मनो विषये विकसिता अवधारणा नास्ति। प्राच्यसभ्यतायां तु मनः साधनमिति मत्वा अनुशासनस्य पद्धतिरपि विकसिता वर्तते । तस्माद् हेतोः प्रथानलक्ष्यं प्रति गमने दिग्भ्रमो मास्तु । ये च तत्र निरोधकाः सन्ति ते त्यक्तव्याः । वैयक्तिकजीवने तु धर्मार्थकामक्रमेण मोक्षपर्यन्तमनुधावनं कर्तव्यं भवति । तात्कालिकसुखप्रदेषु सत्स्वपि मोक्षप्रतिबन्धकाः त्यक्तव्या एव । संस्कारिताश्च भवितव्याः ।

वैयक्तिकस्वतन्त्रता सुखलाभार्थमस्ति । परन्तु न क्षणिकसुखार्थमपि तु अक्षयसुखार्थमेव । सुदीर्घाध्यात्मिकयात्रायां सुखदुःखे कर्मानुसङ्गिके एव । तस्माद् हेतोः भौतिकविषये एव सम्लग्नो जनस्तु तत्रैव सर्वं लक्ष्यं निश्चिनोति । तदनन्तरं तस्यालाभे विचलितो भवति। कदाचन अवसाद (डिप्रेसन) दशायामापन्नो भवति। एवमेव कदाचिद् आत्महोऽपि भवेद्। आध्यात्मिकलक्ष्यं तु तावद् विशालं वर्तते तत्र धर्मार्थकामास्तु वर्तते एव। परिणामतः कर्मफलं स्वतमागच्छति। फलमेव लक्ष्यीकृत्य निवसनं तु मौढ्यमेव । आध्यात्मिकोत्थानाय शारीरकं मानसिकञ्च स्वास्थ्यं दृढमावश्यकम् । समुचितभोजनपानवासोपरिधानादिसर्वमपि कार्यं तदर्थमावश्यकं भवति। सामूहिकतायाञ्च कीदृशमित्रं विधातव्यम् ? विवाहश्च कीदृशः कर्तव्य केन कुटुम्बेन सह कीदृशः सम्बन्धः स्थापनीयः ? आर्थिकसम्बन्धश्च कथं स्थपनीय इत्येताः सर्वेऽपि विषयाः समागच्छन्ति । व्यक्तिसदृश एव समाजोऽपि अन्तर्मुखी बहिर्मुखी भवेत् इति सम्भावना आगता एव। अद्यतनपाश्चात्यसभ्यतायामपि उभयविधा प्रवृत्तिः वर्तते। तथा सति आर्थिकोन्नतये एव अधिकं यतनीयमभूत्। तथैव भौतिकविकासार्थं, प्रविधौ, आविष्कारे, तर्कपद्धतौ च अधिकं यतनीयम् । एतदुभयविधसभ्यतायाः संयोजनमेव अद्यतनयुगस्य स्थितिगत्यात्मकं समाधानमस्ति । एके तु विज्ञानस्य प्रविधेःश्च भौतिकविचारान् प्रस्तूय एव अन्यान् निषेधितुं प्रयतमानाः सन्ति। इदं तु द्विदल (बाइनरी) चिन्तनस्य अतिवादरूपम् ।

ईशावाश्योपनिषदि अविद्याविद्ययोश्च प्रयोजनं दर्शितमस्ति । अविद्यया मृत्युं तीर्त्वा विद्यया अमृतप्राप्तिरेव प्रयोजनम्। परब्रह्मप्रापकं ज्ञानमेव विद्या वर्तते। तदतिरिक्ता सर्वा अपि अविद्या एव। भौतिकशास्त्रम्, रसायनशास्त्रम्, जीवशास्त्रम्, इत्येतानि सर्वाण्यपि अविद्यान्तर्गतानि सन्ति । परन्तु अविद्याशब्दस्य अकारस्य

अनुपयुक्त इति अर्थो नास्ति । अपि तु विद्याभिन्नार्थस्तस्य । अविद्यया मृत्युं जेतुं शक्नोति इत्यस्य तात्पर्यं तु भौतिकशरीरस्य समुचितरूपेण उपयोगः क्रियते चेद् मृत्योः मुक्तिलाभार्थं पात्रता आगच्छति इति । शरीरमाध्यं खलु धर्मसाधनमिति कथनस्य कारणमपि इदमेव । परन्तु अविद्याक्षेत्रे शारीरिकमानसिकस्तरे कार्याभ्यासवेलायामपि अन्त्ये तु तद् गन्तव्यं स्थलं नास्ति इति ज्ञातव्यमेव भवति । शैत्यातिशये मम अन्तिमं गन्तव्यं तन्नास्ति इत्युक्त्वा गृहं न प्रविशति जनस्तर्हि का दशा भवेद् ? गृहं प्रविश्य स्थितेऽपि पुनः समुचिते काले समागते ततः अन्यां यात्रां प्रति सम्लग्नो भवति चेद् लक्ष्यप्राप्तिर्भवति । इयमेव स्थितिगत्यात्मकता वर्तते । तस्माद् हेतोः विद्याविद्ययोः एवमेव आधिभूताधिदैविकाध्यात्मिकविषयाणाञ्च संयोजिका परमप्राप्तिः मुक्तिरेवेति अवगन्तव्यं भवति । एते सर्वेऽपि विषयाः सहायकरूपेण विद्यमानत्वाद् वैयक्तिकताया एव प्राधान्यमागच्छति । जन्मन आरभ्य मोक्षपर्यन्तं सर्वेऽपि विषया वैयक्तिकाः सन्ति चेद् तन्मध्ये समागताः विषयाः सामूहिका सन्ति इति सामूहिकी दृष्टिः तत्र न विधेया । वैयक्तिकस्य स्थानमेव नास्तीति कथनं तु तात्पर्यबोधे अक्षमत्वमेव । मोक्षं तु न कोपि नियमः स्पृशति इति कथनस्य कारणमपि एतदेव । अत एव तु चाणक्यः स्वात्मकल्याणार्थं सम्पूर्णायाः पृथिव्यास्त्याग कर्तव्य इति अवोचत् ।

यथा दृश्यतां पृथक् पृथक् पृष्ठभूम्यामवस्थितयोरनयोः चाणक्यमिलयोर्विषयप्रस्तुतिसन्दर्भे भेदस्य विद्यमानत्वेऽपि तयोः विचारास्तु बहुत्र साम्यं भजन्ते । भेदस्तु एतावान् एव यद् मिलाख्यो महाभागो वैयक्तिकस्वतन्त्रतां भौतिके मानसिके च स्तरे अपश्यद् । चाणक्यस्तु आध्यात्मिकस्तरपर्यन्तं पश्यतीति । धार्मिकी सांस्कृतिकी च पृष्ठभूमिः चाणक्यस्य वर्तते । अतः तस्य बृहत्तरा दृष्टिः । बृहत्तरायाः दृष्टेः विद्यमानत्वाद् कस्यां परिधौ तेन कार्यं विहितमस्ति इति महत्त्वपूर्णम् । चाणक्यस्य परिधिः बहुविस्तृता विद्यते । तस्माद् हेतोः जोन स्टुअर्ट मिल महाभागस्य दर्शनस्य निवेशः चाणक्यदर्शनस्य उपसमूहे क्रियते चेदपि विरुद्धं न भवति । वैदिकविधौ मोक्षस्य बौद्धपद्धतौ च निर्वाणस्य मान्यता यथा वर्तते तद्वत् पाश्चात्त्यदर्शने तादृशविधेरभावात् स्वर्गः जन्नत, हेभेन, इत्येतादृशशब्दकथनेऽपि तत्र चिन्तनस्य सीमा वर्तते । अस्माकं पक्षे तु मोक्षः परमार्थरूपेण अवस्थितः । वैयक्तिकस्वतन्त्रतायाः सफलता मोक्षप्राप्तिरेव । अतः सामाजिकव्यवहारार्थं कार्ये कृते अपि सामूहिकतया सह व्यावहारिकतायै अपि महत्त्वं प्रदेयमिति वैदिकी मान्यता अस्ति ।

तस्माद् हेतोः वैयक्तिकचिन्तनं पाश्चात्त्यकथनेन पौरस्त्यकथनेन सामूहिकचिन्तनमिति विवेकस्तु सवर्था अपूर्ण एव। अस्माकं तु अर्थस्य कामस्य च क्षेत्रं सामूहिकतायाः वर्तते। परन्तु धर्मे मोक्षे च पूर्णा वैयक्तिकता अस्ति। अर्थस्य कामस्य च क्षेत्रे वैयक्तिकतां मा त्यज, दक्षो भव, जागरूको भव इत्युक्तत्वाद् वैयक्तिकता च अधिका वर्तते। पौरस्त्यसमाजे अथवा हिन्दुसमाजे च वैयक्तिकतायाः स्थानं नास्ति इति कथनं तु वैयक्तिकतायाः स्वरूपस्य अज्ञानमेव। व्यक्तिं व्यक्तिं संयोज्य परिवारः, कुलम्, कुटुम्बः, समुदायः, राज्यम् इत्येतानि भवन्ति। अतः एकस्याचरणं कस्यापि सुखे प्रतिबन्धकमाभूद् इत्येतदर्थं समुन्नता नीतिः, पद्धतिर्वा निर्मातव्या भवति। अस्यैव नाम सहृदयतायाः सम्बन्ध इत्युक्तमस्माभिः। अस्यैवाधारे राजनैतिकायामे राज्यराष्ट्रसिद्धान्तो निर्मितः। तत्र सर्वदा सर्वांशेन स्थितिगत्यात्मकता वर्तते। एवञ्च मोक्षस्य तात्पर्यमपि विपरीततया न बोद्धव्यम्। ह्यधिकस्य आग्रहस्य तात्पर्यं भौतिकजगद्विषयिकी घृणा नास्ति। परन्तु वैदिकमतानुसारम् आधिभौतिक-आधिदैविक- आध्यात्मिकसमन्वय एव तात्पर्यं ज्ञेयं भवति।

इन्द्रियजनितमोहं प्रति अनिच्छा वर्तत एव। परन्तु वैदिकमते मानवचेतनायाः अगाधमहिमाऽस्ति। अत एव सामाजिकव्यवहारे जनहितापेक्षया समाजहितार्थं महत्त्वं प्रदेयम्। ततश्च पौरस्त्यं पाश्चात्त्यञ्च चिन्तनमिदमित्थमिति कृत्वा निष्कर्षप्रदानं तु अनुपयुक्तमेव। कतिपयेषु विषयेषु मतभेदो दृश्यते चेदपि समाजस्य कल्याणार्थं समाना हितकारिणो विषयाः ग्रहणीयाः। विषयोऽयमस्माकं क्षेत्रे बहुभिः जनैः बहुवारमुक्तमस्ति। पाश्चात्त्येऽपि नोक्तमिति न। तत्रापि अस्माकं मित्रशक्तयः सन्ति। यथा फ्रेञ्च दार्शनिको रोम्यारोला वदति यत्- कतिपयवर्षेभ्योऽहं युरोप-एसियामहादेशयोः परस्परं सामीप्यता आनेतव्या इति अनुभूयमानोऽस्मि इति। तस्य दृष्टौ अनयोर्देशयोस्तस्मिन् सन्दर्भे वैचारिकसाम्यं भवतु इति महदुद्देश्यम्। एतद् तु पाश्चात्त्यैरपि अनुभूतम्। उपनिवेशं विस्तार्य संसारे वर्तमानविविधसमुदायानां सभ्यतानाञ्चोपरि आक्रमणकारकाणां पलम्पप्रभृतीनां दुष्टानामपि तत्र उदाहरणमस्ति परन्तु तेन सहैव सहृदयताया विषया अपि तत्र सन्ति। तेषां विषयाणां मूलरूपेण प्रवाहीकरणे जाते पाश्चात्त्यानामपि आत्मावलोकनस्य अवसरप्रदानं भविष्यति। धर्मार्थकाममोक्षप्रसङ्गे धर्मेण गुणः, वैशिष्ट्यं, पात्रता, पद्धति च प्रदीयते। अर्थस्तु धर्मपूर्वकमेव उपार्जनीयः। कार्यमपि धर्मपूर्वकमेव विधेयम्। धर्मस्य मार्गनिर्देशनेनैव मोक्षपर्यन्तं गम्यते। इदमेव तथ्यं वैदिकमतानुकूलमस्ति।

अर्थेषु कामेषु च वैयक्तिकता न भवतीति नार्थः । धनस्याधिकार्जकस्तु करं वञ्चितवान् । कृष्णविपणनं कृतवान् भवेद् तर्हि तस्य कृते दण्डो भवति । परन्तु धर्मपूर्वकं न्यायोचितं ह्यधिकधनार्जितमस्ति चेदपि तस्य सम्मानमेव क्रियते । एतच्चास्माकं प्रचलनमस्ति । बुद्धकालिकवाङ्मयेऽपि अस्य पृथक् महत्त्वं वर्तते । तस्य धनकारणेन उद्यमे निवेशो वर्धते । नराः वृत्तिं लभन्ते । ते च बुभुक्षारहिताः निर्वस्त्राश्च न भवन्ति । दुःखे निमग्नानां जनानां अथवा कष्टेन पीडितानां जनानाञ्च ततो विमुक्तौ साहाय्यप्रदानमपि महत्पुरुषार्थरूपम् ।

जनः यस्मिन् कस्मिन् अपि क्षेत्रे यावद् कार्यं कर्तुं शक्नोति तावद् करोतु इति कथनमपि पुरुषार्थस्य सम्मानमेव । तदर्थं स्वतन्त्रतया आपणमवश्यमपि आवश्यकं भवति । स्वतन्त्रं आपणं नाम इदानींतनसञ्चितिवादयुतायाः पद्धतेः परिभाषानुसारमेव न अपि तु स्वतन्त्रापणस्य विभिन्नानि स्रोतांसि कानि कानि सन्तीति विचिन्त्य वैयक्तिकतां ज्ञात्वा वयं विचारयामस्तर्हि प्राचीनकाले अपि स्वतन्त्रापणस्यावस्थितिर ासीद् । जनेन तु श्रम-शिल्प-क्षमता-नवाचाराणां प्रयोगं विधाय सुमहद्साफल्यार्थं विहिते प्रयत्ने राज्येनापि साहाय्यं विधेयं भवति । कर्मणि तस्याधिकारस्तु अवश्यमेव । परन्तु तस्य नियमने कृते करवञ्चनं, कृष्णविपणनं (कालो बजारी) अनुचितरूपेण प्रतिस्पर्धा इत्येतद्विधायकानां कृते दण्डो दीयते स्म । तथापि धर्मपूर्वकधनार्जनरतानां तु संरक्षणं राज्यस्य कर्तव्यमपि आसीद् । धर्मपूर्वके विहिते व्यवसाये हस्तक्षेपो न करणीय इति ह्येषा प्रवृत्तिस्तदा । अतः स्वतन्त्रस्य आपणस्य नीतिरस्माकं नासीद् इति न, वस्तुत आसीद् एव, परन्तु स्वतन्त्रापणस्य नाम्नि केचन धनाढ्याः स्युरिति ह्यधिका लाभमुखी प्रवृत्तिस्तु नासीदेव ।

स्वतन्त्रतायां नियमनमासीद् । सति सम्भवे आत्मिकनियमनं भवति स्म । तदनन्तरं सामाजिक-नैतिकमान्यतानुसारं ततश्च दण्डनीत्यनुसारं भवति स्म नियमनम् । आगच्छता कालेन अद्यत्वे तु केवलं विधिनियमानुसारमेव (कानुन अनुसार) भवति । शरीरे पूर्णाधिकारस्य प्रसङ्ग आगतः । मम शरीरे ममैवाधिकारः (माइ बडी माइ राइट) एतत्तु अस्माकं चिन्तने मोक्षपर्यन्तं कथं साधनायां शरीरसन्निवेशो भवेद् इत्येतदर्थमति । परन्तु मच्छरीरे मेऽधिकारः "माइ बडी माइ राइट" इत्यनेन यदि शरीरस्य हानिः प्राप्येत, एवमेव तेन भौतिकरूपेण मानसरूपेण च अन्यजनस्य आघातो भवति चेद् तन्नोचितम् । तस्मादेव वैयक्तिकतायाः सामूहिकतायाश्च समुन्नतः सम्बन्धः

सदापि स्थितिगत्यात्मको भवति। कथं स्थितिगत्यात्मक इति चेद् उच्यते, समाजस्य मूलं तु व्यक्तिरेव भवति इति। वैयक्तिकता जागरूका सुदक्षा च भवतु इति स्थितेः पक्षः। व्यक्तेः परिवारः, समुदायः कुलम्, कुटुम्बः, राजनैतिकः, आर्थिकश्च पक्षो गत्यात्मकः। अतः स्थितिगत्यात्मक इति उक्तम्। अन्यसामाजिकसंरचनागतचरणे अपि कर्तव्येन सह सम्बन्धाधिकारपरिस्थितीनामप्यवलोकनं विधाय समुचितनिर्णयकरणमेव गत्यात्मकता अस्ति। स्थितिगत्यात्मकता तावद् अस्माकं समाजस्य, व्यक्तेः राष्ट्रस्यं च कृते मार्गं निर्दिशति।

अष्टमं प्रवचनम्

स्थितिगत्यात्मकः समन्वयः

स्थितिगत्यात्मकस्य प्रगतिवादस्य विविधा आयामाः सन्ति । जीवनं जगच्च कथमस्माभिरवलोकनीयम् ? प्रगतिर्नाम का ? इति विषये विविधा दृष्टयः सन्ति चिन्तकानाम् । केचन पदार्थ एव मुख्यमिति वदन्ति । अपि च ते पदार्थेषु समागतरासायनप्रतिक्रियया सृष्टौ परिवर्तनं भवति इति मन्यन्ते । थेसिस इत्यस्य एन्टिथेसिस एवम् सिन्थेसिस भवति इति केचन मन्वते । केचन चेतनायाः प्राधान्यं स्वीकुर्वन्ति । चेतनाया प्राधान्यं स्वीकर्तृणां मध्ये केचन दैवीचेतनायाः प्राधान्यं स्वीकुर्वन्ति । सा च जगति न दृश्यते अथवा जगतः परे अन्यत्र कुत्रचिद् वर्तते तया एव सर्वमपि कार्यजातं निर्धार्यते इति ते मन्वते । एवञ्च अपरे तु जगति विद्यमानप्राणिनि अवस्थिताया चेतनायाः परिभाषां विधाय तत एव संसारस्य प्रगतिः परिवर्तनञ्च भविष्यति इति वदन्ति । अत्रापि केचन आकस्मिकतायाः सिद्धान्तं स्वीकुर्वन्ति । अस्मिन् सिद्धान्तेऽपि व्यक्तेः प्राधान्यं स्वीकृत्य इतिहासस्य कस्मिँश्चिद् कालखण्डे कस्यचन व्यक्तिविशेषस्य कर्महेतुना स काल एव तदाकारं गृह्णाति तदनु एव इतिहासस्य चक्रं अग्रे धावति इति कैश्चिद् मन्यते । अन्ये च सामूहिकतायाः सिद्धान्तमादाय कस्मिँश्चिद् समाजे एवं सामूहिकतायां विद्यमानानामुत्पादनसाधनानां जीवननिर्वाहशैल्या एवं कतिपयसभ्यतायाश्च विलीनत्वावस्थायां पर्यावरणीयपरिवर्तन-जलस्योपलब्धतातः बहुविधाङ्गानां भूमिका तत्र भवति इति धिया विश्लेषयन्ति । तदितरद्वन्द्वात्मकभौतिकवादस्य पक्षतः विचारे भौतिकपदार्थेषु जायमानायाः प्रतिक्रियाया आधारे एवं समाजस्य

उत्पादनसाधने कस्य स्वामित्वं वर्तते ? केन च तद् परिचालितम् उपभुक्तञ्च ? कस्य च स्वार्थे तद् जायमानमस्ति ? इत्यतः तन्निर्धारितं भवतीति मन्यते। तत्र परिवर्तनेन तु विद्रोहात्मिका परिस्थितिः सृज्यते इत्यपि मन्यते। अपरपक्षे तु विचाराभिव्यक्तौ पुरुषार्थे च यदि व्यक्तिः स्वातन्त्र्यमाप्नुयाद् तर्हि तत्र समाजेन राष्ट्रेन च सहजीकरणार्थं नियमनात्मिका उपयुक्ता परिस्थितिः सृष्टा भवतीति मान्यतापि अस्ति।

उपर्युक्तप्रसङ्गैः समाजस्य राष्ट्रस्य च महत्त्वाधायिका अङ्गभूता व्यक्तिरिति स्मरणीयम्। व्यक्ति-परिवारानन्तरं कुटुम्ब-समुदायसमाजक्रमेण राज्यसंरचनायाः परिभाषा विधेया भवति। एतेषु स्थिरा संरचना व्यक्तिः वर्तते। व्यक्तेर्जीवनं क्षणभङ्गुरमस्तीति वक्तुं शक्यते, परन्तु एकस्य जनस्य गमनानन्तरं पुनरन्यस्यागमनाद् अथवा गमनागमनयोः नैरन्तर्याद् समाजे व्यक्तेस्स्तरः सर्वापेक्षया आधारभूतो महत्त्वपूर्णश्च वर्तते। एवं सति सर्वापेक्षया कृशा संरचना राष्ट्रस्य दृश्यते। राज्यस्य अस्तित्ववेलायां तु सर्वाधिकारः विधिनियमं अन्याः संरचनाश्च निर्माय स्वाधिनीक्रियते। अतः राज्यं सबलं भवति तदा। एतद् तु क्षणिकमेव। तात्कालिक्यां परिस्थितौ तन्न दृश्येत। परन्तु मानवसमाजस्य इतिहासं दीर्घकालखण्डे पश्यामस्तर्हि सर्वापेक्षया अन्ते समागता संरचना एव राज्यस्य वर्तते इति जानीमः। राज्यमस्थिरं परिवर्तनशीलञ्च संरचनारूपम्।

प्राणिजगत्यपि वृक्षवनस्पतिषु च एकस्य समूहस्य अपरसमूहेन सह सम्बन्धस्थापनार्थं नैसर्गिकी प्रवृत्तिः दृश्यते। सरलतया नरशक्तिं नारीशक्तिञ्च वदेम। एकस्मिन्नेव न दृश्यते इति न, अपि तु सामान्यतया सहास्तित्वे तथा दृश्यते। अत्यल्पमपवादं विहाय तेषां समन्वयात्मिका प्रवृत्तिर्दृश्यते सर्वत्र। इदानीं वयं पृथक् लिङ्गमध्ये एकविधसम्बन्धमपि चर्चाराहित्येन पश्यामस्तर्हि कोऽपि समूहात्मकोंऽशः युगलार्थं प्रवृत्तो दृश्यते। संचारविधायामपि जनद्वयमेव तिष्ठति। सञ्चारक्षेत्रे गन्तुकामया प्रवृत्या एव परिवारस्य संरचना आनीता। नो चेद् एकांश एव पूर्ण इति मन्यते तर्हि सामूहिकतायां गमने हेतुरेव नासीद्। अतः सामूहिकतायाः प्राकृतिक्याः प्रवृत्याः माध्यमेन पश्यामस्तर्हि परिवारोऽपि स्थिरसंरचनारूपेण अवस्थिता दृश्यते।

समाजापेक्षया राज्यापेक्षया च परिवारोऽपि स्थायिसंरचनारूपेण अवस्थिता दृश्यते। एका सभ्यता अपरां सभ्यतां पराजयते तदा प्रथमः प्रहार एव परिवारं विक्षिप्तं विधातुं क्रियते। विक्षिप्ते परिवारे व्यक्तेर्जीवनेऽपि विक्षिप्तता आगच्छति। जनः

यदि पात्रतां न भजते तर्हि जनस्तरे एव विचार-व्यवहार-भोजन-पानादिबहुविधेषु आयामेषु विचलनमेवान्तिमो कम्पो भवति तस्य। प्रगतिः अथवा परिवर्तनं राज्यस्तरे सामाजिकस्तरे च भवति। मूलतस्तु व्यक्तिस्तरे एव भवति तद्। व्यक्तौ परिवर्तनं नागच्छति चेद् परिवारे, समाजे अथ च राज्येऽपि परिवर्तनं नागच्छति।

नेपाले, भारते, चीने श्रीलङ्कादिदेशेषु च कुटुम्बस्तरीया संरचना सुदृढा आसीद्। परन्तु इदानीं तु शैथिल्यङ्गता। यद्यपि कतिपयेषु जातीयसमुदायेषु एवं भौगोलिकक्षेत्रेषु च तस्या विद्यमानत्वेऽपि कुटुम्बात्मिका संरचना क्षीणत्वञ्जायमाना विलोक्यते। इदानीं तु अस्माकं क्षेत्रे विवाहोऽपि राज्येन निर्मितविधानानुसारेण नियाम्यो भवति। व्यक्तेः विचाराभिव्यक्तौ स्वतन्त्रताया आस्थायाश्चैवमेव सङ्गठननिर्माणाद्यधिकारस्य च राज्येन सुनिश्चितत्वे सति सुदृष्ट्या विलोक्यते चेद् केऽपि तादृशाधिकारेण वञ्चिता न दृश्यन्ते। परन्तु आलोचनात्मिकया दृष्ट्या तु व्यक्ति-परिवार-कुटुम्ब-समाजादिसंरचनाः भृशं कृशाः सन्ति यतः नैसर्गिका प्रवृत्तिरपि राज्यसंरचनायाः नियमेन अग्रे वर्धनीया अभूत्।

राज्यविषये अस्माकं शास्त्रे उपलब्धविषयाणामवलोकनेन एवमेव मानवीयेतिहासान्वेषणेन च व्यक्ति-परिवार-कुटुम्ब-समाजादिभ्यो बहुकालानन्तरमेव राज्यमागतमस्तीति ज्ञायते। अस्माकमद्यतनयुगे अन्ताराष्ट्रियसन्धिहेतोः राज्यस्य सीमा-अधिकाराख्यानामन्ताराष्ट्रियसम्बन्धानामेकं स्वरूपं निर्धारितमस्ति। तेन च ह्यत्यल्पकाले राज्यपरिवर्तनं न दृश्यते। शतं वा द्विशतवर्षपूर्वं गत्वा विचारयामस्तर्हि अस्थिरा राज्यसंरचना आसीद् तदा। अनेनैव हेतुना इदानीमपि कतिपयक्षेत्रे पृथक्देशस्य दृढोक्तयः तत्र वर्तन्ते। अस्माकं नेपालदेशस्य सन्दर्भेऽपि सीमासमस्या दृग्गोचरीभूता वर्तते। विश्वस्मिन् रुसयुक्रेनदेशयोः मध्यभूभागे द्वन्द्वो दृष्टः। भारतीयराजरङ्कानां संरचनातः ईशवीये १९४७ तमे वर्षे द्विराष्ट्रियतायाः सिद्धान्तमाधारीकृत्य भारताद् (इण्डिया) पाकिस्तानञ्च विभक्तमभूत्। भारतपाकिस्तानयोः निर्माणक्रमे राष्ट्रियताया आधारस्य व्याख्यानम् एवं समाजस्य परिस्थितिश्च पृथक् आसीद् परन्तु धार्मिकपरिचयाधारे (पहिचान) पाकिस्तादेशो निर्मितः। तदा धर्म एव राष्ट्रियताया निर्धारक इत्युक्तम्। इदानीं तु एकस्य निश्चितधर्मस्य मजहब इत्यस्य च आधारे जातस्य राष्ट्रस्य एवं तत्र निवसतां जनानाञ्च प्रवृत्तिः चरित्रञ्च पृथक् पृथक् वर्तेते। एकत्र एक एव मज़हब अनुयायिनां जनानां मध्ये जातीय-प्रजातीय-वर्णीय (नस्लीय)

वैविध्यं जातमिति चेद् अपरत्र तु भाषायाः कारणेन उपर्युक्ता स्थितिरभूत्। सङ्ख्याया आधारे तु स्वात्मानं मुस्लिम इति अमन्यमाना जना अपि तत्र आसन् । अस्य प्रत्यक्षप्रभावोऽद्यापि दृश्यते । द्विराष्ट्रियतास्वीकारे पृथक् देशो जातः । समुदायस्य समाजस्य च स्तरदृष्ट्या नैसर्गिकरूपेण कस्मिन्नपि क्षेत्रे सहस्राधिकवर्षेभ्यो निवासे विहितेऽपि राज्यस्य एकविधचरित्रविनिर्मिते अल्पसङ्ख्यकत्वं जातम्। परन्तु मजहब इत्यस्याधारे एव न खलु देशो निर्मितो भवति। यदि तथा स्याद् तर्हि बङ्गलादेशो विभक्तो न स्यात्। बङ्लादेशविभजनानन्तरं तत्रत्यानां कतिपयजनानां कतिपयसमुदायानाञ्च सामाजिकरूपेण नैसर्गिकाधिकारापेक्षया प्रबलरूपेण राज्यस्याधिकारः समागतः । राज्येन च तेषां संरक्षणं न विहितम्। स्वीयमुत्तरदायित्वञ्च न पूरितम्। तस्माद् ते ततः पलायनं कृत्वा शरणार्थिनो जाताः। सहस्राधिकवर्षेभ्यः तत्र तेषां स्थितिरासीद्, परन्तु राज्यस्यास्थिरतायां सत्यां तस्याः कियान् प्रभावः समाजे मानवजीवने च भवतीति चेद् ते तत्र स्थातुमशक्ता अभवन्। कतिपयवर्षेभ्यः प्राक् स्वाभाविकरूपेण तीर्थव्रतादिकार्यार्थं गमनागमनं यत्र भवति स्म । एकस्यैव राज्यप्रणल्याः अंशतया विद्यमानस्थले अपि शरणार्थिस्वरूपेण तत्र गन्तव्यमभूत् । दीर्घकालपर्यन्तं स्थितेषु सत्स्वपि शरणार्थिनामागमनकारणेन मुस्लिममतिरिच्यान्यैः सम्मानार्थं राज्यं न लब्धम् । दीर्घकालाद् पीड्यमानानां कृते वयं नागरिकतां दद्म इति न्यायोचिते निर्णये विहिते अपि तत्र समस्या दृष्टा। अयं तु भिन्नदेशाद् समागत इति कथयतां एवमेव समाजदृष्ट्या आस्थादृष्ट्या च न्यायोचितमिति कथयतां जनानाञ्च मध्ये एकस्मिन् देशे एव द्विविधमान्दोलनं जायमानं वर्तते।

अस्माकमुत्तरत्र देशे उइघुरसंज्ञकमुसलमानानां चर्चा-परिचर्चा आगता वर्तते । तथ्ये पृथक् पृथक्रूपेण दृढोक्तयः सन्ति । परन्तु एकस्यां दृढोक्तौ उइघुर मुसलमानस्य १० प्रतिशतजनसङ्ख्याः प्रशिक्षणार्थं निर्मितकक्षे स्थापिताः सन्ति । अपरस्यां दृढोक्तौ तु कारागारे स्थापिता सन्तीत्यपि आगतमस्ति। मूलतस्तु एतदपि राज्यचरित्रस्य समाजचरित्रस्य च मध्ये तादात्म्याभावे द्वन्द्वरूपेण आगतम्। राज्यं तु सर्वापेक्षया अनन्तरमागतम् स्वाभाविकरूपेण । तस्य सर्वापेक्षया अस्थिरत्वेऽपि इदानीं राष्ट्रिय-अन्ताराष्ट्रियपरिवेशाद् सुदृढत्वमागतम्। तस्य च सर्वत्र हस्तक्षेपो वर्तते इदानीम्। प्रत्येकक्षेत्रे हस्तक्षेपे सति एकविधराजनैतिकमताग्रहस्य आर्थिकप्रणाल्या बलेन च एकविधशैक्षिकाकारनिर्माणार्थं प्रयतितं वर्तते।

प्राचीनकाले समुदायस्य सहयोगे यथा स्वातन्त्र्येण गुरुकुलसञ्चालनविधिर ासीद् तद्वद् इदानीं तादृशो विधिर्नास्ति। तदा गुरुकुलस्य कपाटाद् अन्तःप्रवेशानन्तरं गुरोरग्रे राजभिक्षुबालाः सर्वेऽपि एकस्यां कोटौ भवन्ति स्म। तादृशी परिस्थितिरिदानीं नास्ति। इदानीं तु विद्यालयविश्वविद्यालयव्यवस्थापनसञ्चालनवित्तनिर्धारणदिकार्याणि प्रामुख्येन राज्यमेव व्यवस्थापयति। तदर्थं कुत्रापि पञ्जीकरणीयं भवति। तदर्थञ्च करं दातव्यम्। अथवा मुष्टिदानादिना सञ्चालितमस्ति चेद् तत्रापि राज्यस्य स्वीकृतिरपेक्षिता।

जनस्वास्थ्यमपि राज्यस्यैव कार्यक्षेत्ररूपेण आपणस्य समन्वये सञ्चालितम्। परन्तु आपणेन राज्यमेव जानुपातनदशायां प्रापितमित्यपि वयं पश्यन्तः स्मः। स्वीया वृत्तिरापणेन राज्येन राज्यनिर्णायकतत्त्वेन च सह संयोजनं विधाय सञ्चाल्यमाना वर्तते। यथा गुगलाख्यसंस्थानविषये यदि वयं पश्यामस्तर्हि नेपालदेशत अन्विष्यमाणे गुगलमध्ये या या सूचना लभ्यते चिनदेशाद् अन्वेषणेऽपि ता ता सूचना तथैवागच्छति वा ? नूनं न आगच्छत्येव। तादृशमेव नागच्छति किल। राज्यस्य स्वार्थं स मनुते। नेपाले तु समाजस्य संरचना अपि दुर्बला कारिता एवं राज्यस्यापि संरचना सुदृढा नास्ति। तस्मिन् काले राज्यस्य अवैधानिकराज्यपक्षतया आपराधिकसमूहोऽथवा इन्टरेस्ट ग्रुप नागरिकसमाजः आइएनजिओ इत्येतेषां मिसिनरीरूपेण हस्तक्षेपो जायमानो भवेद्। पाश्वस्थदेशाभ्यामपि नेपालस्य ज्ञप्तिं विनैव लिपुलेकसम्बन्धिनी सन्धिः (सम्झौता) विहिता। यदि देशः सुदृढो न भवेद् तर्हि अत्रत्यं समाजं पृष्ट्वा अथवा अपृष्ट्वैव सहमतिं कृत्वा अथ च सहमतिं विनापि स्वानुकूलं विधानं स देशो निर्माति। समाज-कुटुम्ब-परिवार-व्यक्तीनां संरचनाः राज्येन जिताः। अस्यामद्यतनावस्थायां ईदृशाः क्रियाकलापाः घातकाः सन्ति।

अस्माकं पुराणे वेनस्य हिरण्यकशिपोश्च शासनवेलायां पाश्चात्त्ये अपि अहमेव राज्यमस्मि इति कथयतां लुई चौधौँ सदृशानां शासकानां काले राज्येन सर्वोऽपि विषयः स्वेनैव गृहीत आसीदीति दृश्यते। मानवस्य इतिहासे सर्वापेक्षया अल्पयुद्धे जाते सति इदानीं यद् किञ्चिद् स्थैर्यमागतमस्ति। अतः साधनस्रोतांसि समुचितक्षेत्रे प्रयोक्तुं शक्यन्ते। इदानीमपि भारत-चीन-नेपाल-अफगानिस्थानादिदेशाः सांस्कृतिक-राजनैतिकाधिकारस्य समन्वयं विधातुं यदि असमर्थाः तर्हि सहृदय-अर्थतन्त्रसम्भवे भारत-चीनयोः मध्ये भारतपाकिस्तानयोः मध्ये च अमेरिकादेशेन स्थाने

स्थाने च कृतस्य सैन्यसंरचनायाः एवं शक्तेश्च निवेशः वैज्ञानिकानुसन्धान-स्वास्थ्य-शिक्षा-पर्यावरणानां समुचितव्यवस्थापने प्रयोक्तुं शक्यते चेद् तदा मानवसमाजः कियान् सुखमयो भवेद् इति कल्पयन्तु भवन्तः । विज्ञानप्रविध्योः विकासेन प्राप्तावसरे राज्यसंरचनायाः विवेकराहित्येन तथा सहृदयदृष्टिराहित्येन च सर्वमपि क्षेत्रं हस्तक्षेपरहितं न दृश्यते । अस्माकं क्षेत्रे राज्यस्य चरित्रमपि इदमेव । मन्दिरस्य व्यवस्थापनं विद्यालयस्य व्यवस्थापनं, समितेः सञ्चालकसमितेश्च निर्वाचनमपि दलीयहस्तक्षेपे भवतीति वयमिदानीं पश्येम । अनेन खलु स्वाभाविकी,कौटुम्बिकी, अथवा सामुदायिकी, सामाजिकी च संरचना दुर्बलीकृता ।

राज्यपरिवर्तने जाते नवीनाधिकारिकतया एवमाधिपत्येन च समाजस्य विषयेषु स्वामित्वं ग्रहणीयं भवेद् । अथवा साहाय्यविधानपक्षे कार्यं न कृतं चेत् स्वस्य मौलिकता स्थातुं न शक्नोति । विश्वेतिहासे विलोकिते सति या याः सभ्यताः स्वस्य समस्ताधिकारं राज्याय अथवा शासकाय अर्पयन्ति ताः ताः सभ्यता नष्टा सन्ति । समाजस्य विषया अपि राज्यस्यैव अङ्गरूपेण स्थिताः भवन्ति । अतो नूतनशासकेन ते सर्वेऽपि विषयाः ध्वंस्यन्ते । मानवस्य इतिहासेऽपि अट्टिला, क्षेयार्स, अलेक्जेन्डर, चङ्गेज, खान, तैमुर, लङ्गादीनां प्रवृत्तिस्तु शासकम् आवासक्षेत्रञ्च वृत्वा तत्र दाहविधायिका दृश्यते । तेषां दृष्टौ कस्यापि राज्यस्य शासनान्तर्भूतत्वे सति पराजितशत्रुवद् व्यवहर्तव्यञ्चेति मान्यता वर्तते ।

अपरस्यां मान्यतायां दृष्टिपाते सति राज्यं तु सर्वापेक्षया कनिष्ठा संरचना अस्ति । मत्स्यन्यायो मा भूत्, समाजे च उचिता व्यवस्था भवतु इति विचार्य एव राज्यं वाञ्छितम् । राज्यसत्त्वे समस्यापि अस्ति । तथापि राज्यसत्ताया अनिवार्यत्वे अथवा नियतप्रयोजनार्थं तस्य आवश्यकत्वे सामाजिकी संरचना स्वीयप्रक्रियया क्रियाशीला भवति । अतो न्यूनातिन्यूनं हस्तक्षेपं करोति । यथा-अस्माकं गोरखाली राजा नेपाले पुनर्जागरणस्य समारम्भमकरोत् । अतिप्राचीनकालात् अविच्छिन्नरूपेण सार्वभौमसत्तासम्पन्नस्य नीपजनालयभूतस्य नेपालदेशस्य पुनर्जागरणकारकस्तावद् पृथ्वीनारायणशाहो वर्तते । प्रारम्भकाले स गोर्खायाः राजा एव आसीद् । परन्तु स यदा कान्तिपुरराज्यस्य राजसिंहासने विराजितः, तदा कुमारीं झटिति अनमत् । खड्गस्य विनिमयकारकेन सह स खड्गस्य विनिमयमकरोत् । भोटोविलोकनार्थं यत्र गन्तव्यं भवति स्म तत्र तेन गतमेव । यत्र यद् अर्पणीयं तत्र तदर्पितमेव । तर्हि

तत्र पार्थक्यं किञ्जातमिति चेद् एकस्य राज्ञ स्थाने अपरो राजा आगत एतावदेव। एकस्य परिवारस्य अथवा एकस्य वंशस्य नृप आसीद्। अपरवंशस्य नृप आगतः। परन्तु समाजस्य स्तरे तस्य कोऽपि प्रभावो नाभूत्। महाभारतसदृशे बृहत्युद्धेऽपि तदा योद्धारः युध्यन्ते स्म परन्तु कृषकान्, गुरुकुलं, स्वास्थ्यकेन्द्रादीनि च न स्पृशन्ति स्म। अधुना तु ड्रोनमाध्यमेन बम्बप्रहारे तेन आबालवनिता-वृद्ध-वृद्धादीन् जनान् योद्धारश्च न पृथक्पृथक्तया ज्ञायते। राज्यमेव प्रधानमिति मन्वानस्तु स्वात्मानं सर्वसत्तावादिनञ्च मत्वा अग्रेसरो भवति। तेषां दृष्टौ विकासो नाम नियन्त्रिता योजनाबद्धा च परिघटना अस्ति। विकासस्य निश्चिता एका परिभाषा, पद्धतिर्वा भवति। तां विहाय बहिर्धावमानास्तु यद्वा विद्रोहिणोऽथवा पश्चगामिनः सन्ति। पश्चगमनस्यावसानो यदि विधेयस्तर्हि विद्रोहिणो ध्वंसनीया इति मान्यतां वहमानो द्वन्द्वे हिंसात्मके च मार्गे लगति जनः। स्वीयातिरिक्ततया परकीयप्रदर्शनेन ध्वंसात्मिकी प्रवृत्तिस्तस्य प्रवर्तते।

राज्यं नियमनकारि सहजत्वनिर्वाहकमात्रं विधाय शक्तिस्तु आपणे एव यदि निक्षिप्यते तथापि तत्र साधनश्रोतेषु च स्वाधिकारस्य विद्यमानत्वात् निर्लज्जतया लाभार्जनसञ्चालकरूपेणैव राज्यं तिष्ठेत्। इदानीं तु नेपालः द्वन्द्वात्मकभौतिकवादिनां तथा आपणवादिनाञ्च (बजारवादी) साङ्कर्येण कृतविषाक्तकपूतन्त्रस्य परिधौ वर्तते। अनेनैव हेतुना प्राचीनराजपरिवारस्य स्वामित्वे विद्यमानसम्पदः नेपाल ट्रस्ट इत्यस्य नाम्नि आनीय राज्याधीने सा सम्पद् विहिता। परन्तु राज्याधीने कृतेऽपि यद् वा तद् वा विधानं निर्माय परिभ्राम्य च सत्तावृत्ते स्थितानां राजनैतिकदलानां चन्दासमर्पकेभ्य एव उपभोगार्थं सा सम्पद् प्रदत्तास्ति। सा च सम्पद् ह्यदिने राज्ञः राजपरिवारस्य वा स्वामित्वेऽपि समुदायाद् अपहृत्य एव गता आसीद्। एकस्मिन् स्तरे समुदायोऽपरि राज्यस्य हस्तक्षेप एव तद्कार्ये। अथ च अद्यत्वे ततोऽपि विकृतरूपेण निर्लज्जतया च लाभमुखिनां (नाफाखोर) जनानां हस्ते गतमस्ति सर्वमपि। समुदायस्तु निर्निमेषतया पश्यत्येव। अथवा बहुसहस्रवर्षेभ्यो स्वकीयैः पूर्वजैः प्रयुक्तक्षेत्रे चिटिकां गृहीत्वा एव गन्तव्यमभूत् जनेन इति तु पश्यन्तः स्मः। किञ्चन मन्दिरमथवा श्रोतांसि च स्वाधीनं विधाय चिटिकां सम्पाद्य व्यापाररूपेण निर्लज्जतया लाभग्राहिणे आपणाय प्रदातव्यमिति नार्थः। राज्यमपि दुर्बलं मा भूद् एतदर्थं राज्यस्य भूमिका कुत्र कति च भवेद् ? समाजस्य का भूमिका ? एतद्सर्वं

विचार्य उच्यते चेद् मूलतस्तु समाज एव राज्यापेक्षया आधारभूतो स्थिररूपः। सहस्रवर्षेभ्यः तेन स्वस्य सुव्यवस्थायाः सञ्चाल्यमानत्वाद् कथं राज्येन सहजीक्रियेत इति दृष्ट्या पश्यामस्तर्हि अधुना विश्वस्मिन् जायमानं द्वन्द्वं स्वतः समाधानं भवेद्।

सामाजिकस्तरः कथं केन दर्शनमाध्यमेन चलति तद् विचारणीयं भवति। अस्माकं तु वैदिकबौद्धकिराँतबोनजैनप्रभृतीनां सभ्यतानां सहास्तित्वे विकसितायां पद्धत्यां प्राकृतिकसंसाधनस्य, कस्यापि राजवंशस्य, व्यक्तेः समूहस्य वा पुरुषार्थहेतुना निश्चितो भूखण्डः सार्वजनीनायां संरचनायां समागतश्चेद् राज्यमित्यभिधीयते। इत्थं संरचनानिर्माणकाले अथवा तस्या निर्वहनकाले स्पर्धा अपि जायन्ते स्म। परन्तु निश्चिताधिकारिकतायां ह्याधिपत्ये वा समागते सति तत्रस्था याः काश्च जातिः प्रजातिः भाषाभाषिणश्च वा भवन्तु। तेषां समेषां समस्वामित्वं तत्र भवितव्यमिति मान्यता आसीद्। राज्यस्य शासकस्य वा समाजे कुटुम्बे च फौजदारीसंज्ञकोऽपराधो न जातश्चेद् तत्र हस्तक्षेपो न विधातव्य इति पद्धतिरासीत्। अस्यां पद्धतौ द्वन्द्वावस्थाः न्यूना भवन्ति। चिरकाले च यदि राज्यानां द्वन्द्वहेतुना उक्तसमाजो भूखण्डो वा अन्यस्मिन् राज्ये गतेऽपि विस्थापनस्य भीतिः अथवा शरणार्थित्वप्राप्तिरूपा समस्या न भवति। कथमिति चेद् राज्यं तु यत्र क्वापि भवतु परन्तु समाजस्तु तत्रैव तिष्ठति। समाजस्तु स्वीयसंरचनातः पीडादायिकां दुःखकारिकां वा स्थितिं निराकर्तुं शक्नोति। अतोऽस्माकं पूर्वत एव समाजस्य कृते आधाररूपा मुख्यांशा एकत्रैव स्थाप्यन्ते स्म।

कुलं सामाजिक-सांस्कृतिकबिन्दुरूपेण अवस्थितम्। एवमेव ग्रामस्तु राजनैतिक बिन्दुरूपेण स्थितः। कुलपतेः ग्रामपतेर्वा आगमनस्य स्वीया एकविधा पद्धतिरासीद्। अनया पद्धत्या कारणेन ग्रामः कस्मिन् राज्ये जनपदे वा समाविष्टोऽस्ति ? इति विषयस्य न्यूनातिन्यूनप्रभावाद् अल्पा एव क्षतिर्भवति स्म। राज्यस्य संरचनायां गत्यात्मकता ह्यधिका अस्ति परन्तु समाजस्य, कुटुम्बस्य, परिवारस्य, व्यक्तेश्च संरचनायां स्थितेः पक्षः प्रबलोऽस्ति। अद्यतनयुगं ॠताद् धर्मं, धर्माद् दण्डनीतिं, ततश्च विधियुगं प्रति क्रमेण समागतम्। अतोऽस्माकं राष्ट्रियतां सुदृढां विधाय विश्वबन्धुत्वपर्यन्तं प्रथमचरणे गमनार्थं सोपानरूपेण सन्नद्धा भवेम इत्यावश्यकमिदानीम्। परन्तु अन्धवत् राष्ट्रवादिनः सर्वसत्तावादिनश्च यदुक्तवन्तः तद्वत् राज्यं विहाय अन्यत् न किञ्चिदस्ति, सम्पदः स्वामित्वमपि राज्यस्यैव इति कथयतां पद्धतिः प्राकृतिकी नास्ति।

स्थितिगत्यात्मकप्रगतिवादे सर्वं तथ्यं विश्लिष्य समन्वये कृते विशिष्टीकरणं समागच्छति । व्यक्तेः भूमिकायाः प्राधान्यं यत्र आवश्यकं तत्र व्यक्तेरेव प्राधान्येन भवितव्यम् । परिवारस्य भूमिकायाः प्राधान्यस्थले परिवारस्यैव प्राधान्यमागतम् । कुटुम्बस्य, समाजस्य वा भूमिकायाः यत्र प्राधान्यमपेक्षितम् तत्र कुटुम्बेन समाजेन च प्राधान्येन भवितव्यम् । राज्यस्यैव आवश्यकस्थले राज्येनैव प्राधान्येन भवितव्यम् । स्थितिगत्यात्मकप्रगतिवादस्य दृष्ट्या यथा मानवशरीरस्य विभिन्नानामङ्गानां स्वकीयं स्वकीयं महत्त्वं वर्तते तानि च परस्परसम्बद्धानि भवन्ति । प्राणेन च सर्वाणि अङ्गानि सक्रियाणि भवन्ति तद्वदेव व्यक्तेः चेतना, तत्रस्थो सिद्धान्तः, दर्शनं वा प्राणभूतम् । सहृदयतायाः भावना, अवधारणा, दर्शनञ्च मूलम् । अस्य व्यावहारि करूपेण क्रियान्वयने व्यक्तेः सुखित्वे कल्याणात्मिका पद्धतिरियमस्ति । प्रतिव्यक्तौ सुखानुभूतिर्विधातव्या । भावनात्मकरूपेण प्रतिव्यक्तेः सम्बन्धेन केनचिद् अभुक्तेऽपि इतरेण केनचिद् भुक्ते सत्यपि प्रथमेन आनन्दानुभूतये भूमिका अस्यैव भवति । वस्तुतस्तु व्यक्तिरेव प्रधाना । व्यक्तिस्तु आधारभूता प्रधानांशभूता च । तथापि सा न एकाकिनी । प्रतिव्यक्तेः सम्बन्धस्य सत्त्वाद् परिवारः, कुटुम्बः, समाजः, राज्यञ्चेत्येतेषु स्तरेष्वपि सहृदयतायाः सम्बन्धत्वमापादयितुं शक्यते । अयमेव स्थितिगत्यात्मकः प्रगतिवादः ।

नवमं प्रवचनम्

स्थितिगत्यात्मिकी संरचना

अथ स्थितिगत्यात्मकप्रगतिवादे स्थितानां स्थितिगतिप्रगतिवादशब्दानाम् अर्थं विश्लेषयामः।

स्थितिशब्दस्य नेपाली बृहत्-शब्दकोशे पञ्चविधा प्रविष्टिः प्रदत्तास्ति।

यथा-

प्रथमा- स्थिर रहने काम, स्थायी रहने काम (स्थिरत्वकार्यम्, स्थायित्वकार्यम्)

द्वितीया-थातथलो, बसोबास, (स्थितस्थलम् आवासनिवासः)

तृतीया-चालचलन, रीतिस्थिति,अवस्था

चतुर्थी- चाँजो पाँजो, बन्दोबस्त

पञ्चमी- प्राकृतिक वा मानवीय अवस्था,

नेपाली शब्दसागरेऽपि तद्सदृशा एव अर्था निरूपिताः सन्ति।

यथा-स्थायी रहने काम, थातथलो, बसोवास, रीतिस्थिति, अवस्था, प्रबन्ध

राष्ट्रियनेपालीशब्दकोशे- स्थिति हुने क्रिया वा भाव रहनु, वा हुनु, अवस्थान, अस्तित्व, एउटै ठाउँमा वा एउटै रूपमा रहिरहनु, आर्थिक सामाजिक आदि दृष्टिले हुने अवस्था, दशा, हालत। त्यस्तै सत्ता रहनु स्थिति, नियम इत्युक्तं वर्तते।

नेपालीबृहद्-शब्दकोशे गतिशब्दस्यार्थः-

१. स्थिति, रूप आदिबाट अर्को स्थिति, रूप आदि सम्मको परिवर्तन वा एक ठाउँदेखि अर्को ठाउँसम्मको गमन, चाल हिँडाइ, सराइ, वेग।

२. कुनै पनि वस्तु वा प्राणीको दशा, अवस्था।

३. सम्भावित प्रयासको सीमा, क्षमता शक्ति, तागत ।

४. जीवात्माले मृत्युपछि प्राप्त गर्ने अवस्था ।

५. मृतकको देहावसानपछि दाह संस्कारदेखि दश दिन सम्मको काजक्रिया ।

६. ईश्वरीय स्वरूप, मोक्ष, मुक्ति,

७. प्रवेश, पहुँच

८. मार्ग, बाटो

९. वास्तु तथा मूर्तिकलामा तीस अङ्गुल, वा प्रादुर्भावको तीन गुणा बराबरको नापो

नेपालीशब्दसागरे गतिशब्दस्यार्थः-

गमन, हिँडाइ, बाटो, मार्ग, अवस्था, दशा, स्थिति, चाला, चलमल, हलचल, स्पन्दन, अनि क्षमता, सामर्थ्य, ज्ञान, बोध, होस्, चेतना, यात्रा, दुई खुट्टाको काम, उन्नति, वा अभ्युत्थानका निम्ति सक्रियता, धर्म, कर्मबाट प्रगति गर्नु, अभ्युन्नति, मोक्ष, मुक्ति,

कुनै प्रिय वा वाञ्छित वस्तुका निम्तिको प्रयत्न, परलोक, पार, प्रवेश, पहुँच, आधार, आड, माया, लीला, चमत्कार, चमत्कारी कर्म, दशक्रिया, काजक्रिया, ग्रह, नक्षत्रको चाल, वा ठाउँ सराइ, वेग प्रगति, नाडि, स्वासको क्रम ।

राष्ट्रियनेपालीशब्दकोशे गतिशब्दस्यार्थः-

एक ठाउँबाट अर्को ठाउँमा जानु, चाल, हिँडाइ, गमन, अवस्था, दशा, वाहन वा वेश, प्रवेश, प्रयत्नको हल, अन्तिम उपाय, मृत्युपछि जीवात्मालाई प्राप्त हुने अवस्था ।

नेपालीबृहत्शब्दकोशे प्रगतिशब्दस्यार्थ-

राम्रो सँग अगाडि बढ्ने क्रिया, माथि उक्लने क्रिया, राम्रो सँग अगाडि बढ्नुको भाव, क्रिया वा प्रक्रिया, उन्नति, विकास, उत्थान ।

नेपालीशब्दसागरे प्रगतिशब्दस्यार्थः-

अधि लाग्ने वा बढ्ने काम वा क्रिया वा प्रक्रिया, उन्नति, उत्थान, विकास, बढीबढाउ ।

राष्ट्रिय नेपाली शब्दकोशे प्रगतिशब्दस्यार्थः-

अघिल्तिरको गति, अगाडि बढ्नु, अघि सर्नु, अग्रसर हुनु, उन्नति, बढीबढाउ, बनिबनाउ ।

एतेषु त्रिषु शब्दकोशेषु मध्ये नेपालीबृहत्शब्दकोशे तथा नेपालीशब्दसागरे च प्रगतिवादशब्दस्य प्रगतिशीलशब्दस्य च मार्क्सवादेन सह योक्तुं पूर्वाग्रहो दृश्यते । एतेन च वयं नेपाले वैचारिकजालस्य सुदृढा उपस्थितिर्वर्तते इति जानीमः । नेपालीशब्दकोशे प्रगतिशब्देन सह मार्क्सवादस्य संयोजनेन बौद्धिकक्षेत्रे वैचारिकजालस्य बलात् प्रवेशः जात इति तदुदाहरणरूपेण वयं पश्यामः । प्रगतिशब्दो न खलु अनिवार्यतया मार्क्सवादेन सह योजनीय आसीद् । न तथा करणीय आसीद् । परन्तु तथैव कृतः । येन खलुं परिभाषाकारिका शक्तिः गृहीता, तस्यैवोक्तिः संस्थापिता भवतीति विषयस्य एतदेवोदाहरणम् । पाठ्यक्रमस्य अन्यसार्वजनिकसङ्कथनस्य च माध्यमेन क्रुसेडिमानसिकताया मिसिनरीजनाः अथवा जिहादीजनाः स्वात्मानं वामपन्थिनं तथैव आपणवादस्य (बजारवाद) अनुयायिनः कथयन्तो ते मानवस्य मस्तिष्कपर्यन्तं अनुचितदृष्टिकोणस्य प्रवेशं कारितवन्त इत्यस्य बहूदाहरणं द्रष्टुं शक्नुमः । प्रगतिशब्दस्य अर्थापनक्रमे ते राजनीतेः प्रवेशं बलात् कारितवन्तः ।

वादशब्दस्य नेपालीबृहत्-शब्दकोशे अर्थः-

तत्त्वदर्शीहरूले निश्चित गरेको कुनै विशिष्ट कुराको मत वा सिद्धान्त । जस्तै-प्रगतिवाद, भौतिकवाद, समाजवाद इत्यादिरीत्या कृतोऽस्ति ।

उदाहरणदानकालेऽपि एकविधोदाहरणप्रस्तुतीकरणरूपवैचारिकजालस्य एवञ्च मताग्रहमेव कुर्वाणानां जनानाञ्च कार्यशैलीत्थमस्ति । अवश्यमपि शब्दकोशनिर्माणक्रमे तद्सम्पादनक्रमे वा एकविधा एव जना न आसन् । परन्तु ते तदा अनभिज्ञा आसन् अथवा स्पाइरल अफ साइलेन्स इत्युक्तिवद् किमर्थं वक्तव्यम् ? इति विचार्य स्तुष्णीं स्थिताः । एतेन ज्ञायते यद् एकविधमताग्रहेण तद् कार्यं जायमानमस्तीति । शब्दकोशपर्यन्तमपि वैचारिकजालस्य उपकरणं प्रसृतम् इत्यस्य एतदेवोदाहरणम् । इत्थमेव अन्यार्थोऽपि तत्र दर्शितः ।

यथा- सार कुरा पत्ता लगाउन गरिने तर्क, शास्त्रार्थ, विचार, बहस, विवाद, कथन, वर्णन, अदालतमा उपस्थित गरिएको अभियोग, कुनै पनि कुराको निरूपण गर्नु ।

नेपालीशब्दसागरे वादशब्दस्यार्थः

महान् दार्शनिकहरू वा तत्त्वदर्शीहरूले कुनै खास कुराको बारेमा निश्चित गरिएको मत वा सिद्धान्त, सार कुराको पत्तो पाउन गरिने तर्क वा विचार, शास्त्रार्थ,

बहस, विवाद, वितण्डा, वर्णन, कथन, कथन, अदालतमा उपस्थित गरिएको अभियोग, निरूपण, बजाई, घनक, गुञ्जन,

राष्ट्रियनेपालीशब्दकोशे वादशब्दस्यार्थः

यथा- कुनै तथ्य वा तत्त्वको निर्णयका लागि गरिने तर्क- वितर्क, शास्त्रार्थ, तत्त्वज्ञद्वारा निश्चित गरिएको तत्त्व वा सिद्धान्त, केही संज्ञाका पछिल्लोतिर प्रयोग हुने जस्तै साम्यवाद, पुँजीवाद, अवसरवाद, कुनै निश्चित सिद्धान्त, बहस, विवाद, नाम शब्दका पछाडि प्रत्ययको रूपमा लागेर सिद्धान्तको अर्थ बुझाउने शब्द ।

अथ त्रिषु अपि शब्दकोशेषु यदि स्थितिगतिप्रगतिवादशब्दानामर्थं पश्यामस्तर्हि कैश्चिद् प्रगतिवादशब्दः मार्क्सवादेन सह योजितो वर्तते। एतच्च मताग्रहेण युक्तम् । तस्य पूर्वाग्रहो वा जातः । वस्तुतः प्रगतिवादो नाम प्रगतेः यथार्थव्याख्यात्मको सिद्धान्तो वर्तते । अतश्च स्थितिगत्यात्मकप्रगतिवादे स्थित्यात्मकता, गत्यात्मकता चेति शब्दौ विशेषणरूपेण प्रयुक्तौ स्तः । येन केनापि सिद्धान्तेन तस्य लक्षणं व्याख्यानमाकलनं तन्नियन्त्रणञ्च क्रियते (डिफाइन, एक्सप्लेन, प्रेडिक्ट, कन्ट्रोल) । स्थितिगत्यात्मकः प्रगतिवादः स्थित्या सह गत्या सह च सम्बद्धोऽस्ति । अथवा स्थितिगत्योः समन्वयेन च युक्तोऽस्ति । विशेषतो सिद्धान्तमिमं समाजविकासे योजयामस्तर्हि समाजः कः ? कथं निर्मितः ? स च कथमग्रे वर्धमानोऽस्ति ? कथमग्रे वर्धनं समुचितं भवेद् ? कथञ्च तस्य सुसञ्चालनं भवितुमर्हति ? तस्य परिणतिः का ? इत्यादिविषये स च सिद्धान्तः परिभाषते । एवमेव समाजविकासस्य विविधान् अवयवान् व्याख्याति । किङ्क्रियते चेद् किं भविष्यति ? इत्यप्यनुमिनोति । तदाधारीकृत्य नियमयति च । स्थितिगत्यात्मकप्रगतिवादमेव मार्गनिर्देशकसिद्धान्तं मन्यमानानां जनानां कृते तदनुरूपं सङ्घनिर्माणं विधाय समाजस्य जागरणं, सङ्गठनसञ्जालस्य कार्यं विधाय तदुद्देशप्राप्तये सहृदयतायाः सम्बन्धे स्थित्वा कार्यकरणार्थं मार्गमयं सिद्धान्तो ददाति ।

स्थितिगत्योः वार्ता विचित्राऽस्ति । कदाचन गतिस्थमपि जनः स्थितिस्थं पश्यति । यथा-व्यजनमपि द्रुतगत्या चलति चेद् तेन न भ्रमितमिव तद् दृश्यते । अथवा स्थिरं प्रतीयते । कदाचन स्वस्य गतिः तीव्रा वर्तते चेद् सापेक्षे स्थितानामपि तेषां गतिमत्त्वं जनः पश्यति । यथा सन्ध्यायां चन्द्रमा अस्माभिः सहैव चलतीति भानं जायते । अथवा बसयानादितः यदि पश्यामस्तर्हि मार्गस्थानि गृहाणि समीपस्थाः वृक्षा

वा धावन्तीव दृश्यन्ते। नद्यां प्रतिनिमेषं जलमेतावद् परिमितं उहितमिति मापनं कर्तुं शक्यते परन्तु दर्शने तु स्थिरा प्रतीयते। वस्तुतस्तु कतिपयपदार्थाः सापेक्षतस्थितौ दृश्यन्ते चेद् केचन गतौ दृश्यन्ते। परन्तु जगद् स्थितिगत्योः समन्वयेनैव चलति। वयं किल एकमाणविकं तत्त्वं पश्यामश्चेदपि तत्र कतिपयावयवा अविच्छिन्नगतौ वर्तन्ते। तथापि ते सापेक्षाः सन्ति। गतिकार्ययोः मध्ये अन्तःसम्बन्धस्य विषयमादाय भौतिकशास्त्रे बहु चिन्तितं लभ्यते। यदि कश्चन सशक्तिकः जनः शतकिलोपरिमितं भारं गृहीत्वा तद्भारेण क्लान्तः स्वेदयुक्तो भूत्वापि आवश्यकं गन्तव्यस्थलं यदि न प्राप्नुयात् तर्हि तेन कृतमुपयुक्तं सर्वमपि कार्यं निरर्थकं भवतीति कथनमपि प्रसिद्धमस्ति। भौतिकशास्त्रे गतिविषये अथवा परिमाणविषये प्रदत्तस्य महत्त्वस्य इदं किल द्योतकमस्ति। यद्यपि गतिरथवा परिमाणं रेखीयं वा अरेखीयमिति विषये पृथक् पृथक् मान्यता वर्तते। कतिपयसंस्कृतौ लोककथारम्भे वन्स अपन अ टाइम इत्युक्त्वा समयस्य प्राधान्यं मत्वा एवमेव अपरपक्षे च एकादेशमा इत्युक्त्वा स्थानस्य प्राधान्यं मत्वा विचारकाणां दृष्टिकोणाः पृथक् पृथक् सन्ति। समयस्तु सृष्टेराधारोऽस्तीति वैदिकी मान्यता वर्तते। सृष्टिसञ्चालनार्थमपि गतिरनिवार्यास्ति। दिक्कालयोर्मध्ये कालस्य पक्षो गतिमान् अस्ति। समयश्च गतिशीलः। एटमस्तरे न्युक्लियपदवाच्यस्यापेक्षया इलेक्ट्रोनपदवाच्यं गतौ वर्तते।

प्रमा अथवा ज्ञानेनापि प्रमाणस्य प्रमेयस्य चावलम्बनं क्रियते। ज्ञातव्यस्य प्रमेयस्य ज्ञानं प्रमाणेन भवति। प्रमाणप्रमेययोः तादात्म्ये सत्येव प्रमा भवति। प्रमेयविषये जगति विभिन्नानां दर्शनानां दार्शनिकानां वा स्वीयाः स्वीयाः मान्यताः, दृष्टिकोणाः, उपकरणानि अनुसन्धानविधिश्च वर्तन्ते। प्रमेयेऽपि स्थितिगत्योर्गुणाः वर्तन्ते। कतिपयप्रमेयाणि स्थितियुक्तानि सन्ति। कतिपयानि तु गतियुक्तानि। स्थानं कालश्च उभावपि व्यवहारे मातुं योग्यौ स्तः। अस्योदाहरणार्थं वयं आचार्यकुमारिलभट्टस्य मीमांसादर्शनस्य पद्धतिं स्वीकुर्याम। मीमांसादर्शनस्य सूत्राणि जैमिनिकृतानि। तेषु सूत्रेषु भाष्यं शबरस्वामिना रचितम्। तत्रापि कुमारिल-प्रभाकर-मुरारिमिश्राणां पृथक् पृथक् मतानि सन्ति। कुमारिलभट्टस्य मानमेयोदये पञ्चविधं प्रमेयं परिगणितमस्ति। यथा-द्रव्यम्, जातिः, गुणाः, क्रिया, अभावश्चेति। आधुनिकसन्दर्भे प्रमाणप्रमेयविषयाणामध्ययनार्थमपि ज्ञानमीमांसा (इपिस्टोमोलोजि) तत्त्वमीमांसा (अन्टोलोजी) इत्यादीनां विकासो जातोऽस्ति। स्थितौ गतिः गतौ

स्थितिश्च अन्तःसम्बद्धौ भवत इति अस्माकं वैश्विको दृष्टिकोणो वर्तते। अतो वयं स्थितिगत्यात्मकं प्रगतिवादं मानयामः।

स्थितावपि ऊर्जा निहितास्ति। गत्या अपि ऊर्जा उत्पद्यंते। भौतिकशास्त्रे काइनेटिक इनर्जी पोटेन्सियल इनर्जी रूपेण तत्त्वमिदं मन्यते। साक्षाद् स्थितिरपि ऊर्जायाः स्रोतमस्तीति कथनस्य तात्पर्यमित्थमस्ति- संस्कृतौ निहितस्थायितत्त्वेभ्य एव वयं उर्जां लभामहे इति। पुनर्जागरणे आधारिताधुनिकतातोऽथ च आधुनिकतासहितस्य पुनर्जागरणस्य आयामतः पश्यामस्तर्हि समाजस्य स्थितिपक्षो गतिपक्षश्च मूलाधारतत्त्वरूपेण स्तः। स्थावरजङ्गमात्मकसकलजगतः कल्याणाभिलाषिणा कल्याणानुकूलाः प्रवादाः, तदनुकूलावधारणा, सिद्धान्तः, रीति, स्थितिः एवं व्यवहाराश्च इदानीमपि ग्रहणीया एव। इदानीं ते विषये छायायां पतिताः सन्ति। कथञ्चिदपि ते अग्रे सारणीयाः। देश-कालपरिस्थित्यनुरोधेन परिवर्तनीयाः विषया सहजतया स्वीकरणीया एव। सारतस्तु समाजकल्याणार्थं सर्वेऽग्रेसरणीया एव। वेदे "चरैवेति चरैवेती"त्यस्य तात्पर्यं गतेरवश्यम्भावितायाः प्रदर्शनमेवास्ति। बौद्धे ज़ैने च दर्शने एतद् मन्यते। अतो गत्या सह अस्माकं स्वाभाविकं तादात्म्यं वर्तते। परन्तु न खलु द्वन्द्वात्मकभौतिकवादिनां कथनवत् ध्वंसाद् निषेधात् वा आगच्छति गतिः। अपि तु रूपान्तरणेनैवागच्छति। वयं मूलतस्तु रूपान्तरणवादिन एव। विचारमन्थनम्, निरक्षिरविवेकश्च अत्र प्रधानमस्ति। समाजस्यावयवेषु के सर्वदैव हितकारिणः सन्ति विषया के च समयक्रमे विकृतिङ्गताः ? ते परिमार्जनीया इति विवेकः करणीय एव।

वयमाधारशीलाचतुष्टयरूपेण विज्ञानस्य बुद्धिं, प्रविधेः प्रगतिं, धर्मस्य विवेकं, सहृदयतायाः सम्बन्धं च मन्यामहे। एवमेव विज्ञानयुक्तस्य धर्मस्य, धार्मिकतायुक्तस्य विज्ञानस्य च दृष्टिकोणं स्वीकृतवन्तः। अस्यैवाधारत्वेन समाजहितकारकान् "तन्मे मनः शिवसङ्कल्पमस्तु" इति श्रुतिवाक्यवद् श्रेयोविधायिनो विषयान्नेव स्वीकुर्मः। सर्वे नवीना विषया उपयुक्ता एव न भवन्ति। सर्वेऽपि नवीना विषया अनुपयुक्ताश्च न भवन्ति। कतिपयजनाः नवीने विषये लब्धे सति त्रस्ता जायन्ते। तथैव केचन तु तल्लब्धे उत्साहिता अपि जायन्ते। तदुभावपि दृष्टिकोणौ अयुक्तावेव। वयमत्र विवेकं प्रयुञ्जामहे। विषयस्य तथात्वेऽपि प्राच्यं सर्वमपि अनुपयुक्तमुपयुक्तञ्चेति कथनमपि पूर्वाग्रहग्रस्तम्। विशेषतो मताग्रहग्रस्तानां एवमेव वैचारिकजालेन पीडितानाञ्च जनानामियं समस्या अस्ति। हीनताबोधेनापि जनाः स्वीयसमाजस्य उपयुक्तान् पक्षान्

द्रष्टुं न शक्नुवन्तीतीयं स्थितिः वर्तते । अद्यतनपरिस्थितेः कारणेन सम्प्रदायस्य, भाषायाः भौगोलिकक्षेत्रस्य, तद्पथः, मजहब इत्यस्य च चर्चा विधातव्या अभूत् । परन्तु तेषु जनेषु मताग्रहो न भवेद् तर्हि स्वाभाविकतया वयं तु निखिलं जगद् ब्रह्मतत्त्वस्यैव व्यक्तरूपमिति मन्यामहे । प्रकृतिपुरुषाभ्यामेव सृष्टं सर्वम् । चैतन्यं समेषामेकमेव । वयं सकलजनैः सह सहृदयतायाः सम्बन्धेन जीवितव्यमिति मान्यतां धरामः । एवमेव सर्वे भवन्तु सुखिनः इत्याख्यां मान्यतां विश्वसिमः । अतः कैः सहापि रिपुतां न धरामः । स्थितिपक्षधरत्वमुक्त्वा किमपि परिवर्तनमदिदृक्षूणामथवा परिवर्तनत्वं स्वीकर्तृणां जनानाञ्च चिन्तनवद् समाजस्य संरचनोपरि तद्स्थापनोपरि एवमेव धर्मोपरि संस्कृति-परम्परा-भाषा-नैतिकतादीनामुपरि च यथाशक्यं प्रहर्तव्यमेवेति दृष्टिकोणेन सह वयं सहमतिं न विदधामः । प्रकृतिपर्यावरणेन सह स्वीयराष्ट्रस्य कृते अगाधा स्पृहा तथैव सम्मानभावप्रकटनञ्चेत्येतादृशेन अस्माकं चरित्रेण भवितव्यम् । अनावश्यकं दोहनं न कर्तव्यम् । उपभोक्तावादो न युक्तः । आपणवादश्च नोचित इति वयं मन्यामहे । समाजवादस्य नाम्नि मधुरभाषणम्, तथैव समाजं च केषाञ्चन जनानां दलानां वा वशे आनीय यद्वा तद्वा शासनसञ्चालनादिकार्यञ्च न खलु वयं स्वीकुर्मः । दृढाङ्कनं विधाय एकेनैव दृष्टिकोणेन अवलोकनतुल्यमताग्रहत उत्थानं नितान्तमावश्यकम् । गुणग्राहिणं दृष्टिकोणं स्थापयति स्थितिगत्यात्मकः प्रगतिवादः । परन्तु निर्लज्जतया लाभग्राही सञ्चितिवादो वा भवतु, उत सर्वसत्तावादी समाजवादो वा भवतु, अथ च अनुवादे साम्यवादत्वेनोक्त(वामपन्थवादो) कम्युनिजम् वा भवेद्, एते वादास्तु समाजस्य स्थितेः गतेश्च पक्षानां साधुत्वेन समन्वये असमर्था जाताः । अतः स्थितिगत्यात्मकः प्रगतिवाद आगतः । अयञ्च सिद्धान्तः प्रकृतावपि योक्तुं शक्यते । प्रकृतेर्व्याख्यानेऽपि प्रयोक्तुं शक्यते । परन्तु अस्माकमिदानीं मूलमुद्देश्यं तु समाजस्य व्याख्यानम् । समाजे स्थितेः स्थायित्वपक्षस्य गतिपक्षस्य च समुचितरूपेण संयोजकसिद्धान्त एव स्थितिगत्यात्मकः प्रगतिवादोऽस्ति । इति शम् ।

२६	छवि पौड्याल - आत्रेय	नीशीखोला गाउँपालिका - २, बाग्लुङ	स्व. पिता डिलाधर उपाध्याय	२०००
२७	सुरेन्द्र पाल ठकुरी - शौनक	लेकम गाउँपालिका - ४, पौंतोली, दार्चुला	स्व. हजुरबुवा धन बहादुर पाल	३३३३
२८	दीपक भुसाल - वशिष्ठ	सुनवल नगरपालिका - १३, नवलपरासी	स्व. माता चन्ददेवी भुसाल	२२२२
२९	प्रकाश/विकाश बोलाखे - कौशिक	कुशादेवी पनैती - २, काभ्रे	स्व. हजुरबुवा देवी प्रसाद बोलाखे, स्व. हजुरआमा भिमकुमारी बोलाखे	३५००
३०	शंकर धमला - धनञ्जय	नेत्रवती डबजोङ गाउँपालिका - ५, धादिङ	स्व. हजुरबुवा गंगा बहादुर धमला, स्व. हजुरआमा शुव/यथाकुमारी धमला	५०००
३१	रीना कार्की	मन्थली - १३, रामेछाप	स्व. पिता तुल बहादुर कार्की	५०००
३२	लव अधिकारी - काश्यप	हेटौंडा उपनगरपालिका - ४, मकवानपुर	स्व. माता चन्द्रकला अधिकारी	११११

सहृदयतासमाजेन सामोदं प्राकाश्यम् आनीतं संस्कृतपुस्तकद्वयम्





मूल्य रू. १२५।-

9 789937 147453

सहृदयता-समाज-नेपालः

भक्तपुरम्, नेपालः